THE MÂLAVIKÂGNIMITRA OF KÂLIDÂSA

EDITED

With the commentary—Kumāragirirājīya of Kāṭayavema, considerably enlarged

AND

an Introduction, critical and explanatory Notes, Various Readings, and an English Translation

BY

M. R. KALE, B. A.

Author of *A Higher Sanskrit Grammar, Sàhityasâra-sangraha, A Smaller Sanskrit Grammar,* a commentary on *Báṇa's Kádambarí,* &c. &c.

THIRD EDITION, REVISED

PUBLISHED BY

GOPAL NARAYEN & Co.

PRINCESS STREET, BOMBAY.

1933

Rs. 3-8-0

Printed by S. V. Parulekar, at the Bombay Vaibhav Press, Servants of India Society's Home, Sandhurst Road, Girgaum, Bombay.

And

Published by D. V. & B. D. Mulgaonkar, Proprietors, Gopal Narayan & Co. Book-sellers, Princess Street, Bombay.

PREFACE TO THE FIRST EDITION

The present edition of Kâlidâsa's *Mâlavikâgnimitra* is specially prepared with a view to meet the wants of students reading for the First Year Arts Examination, but at the same time care has been taken to include matter that would interest and help the general reader as well. The method adopted here of printing the Sanskrit rendering of the Prákrit passages along with the text, the original Prákrit being printed below, will be found to be of great practical convenience. The commentary of Kâṭayavema being too meagre has been copiously amplified with additions, which are indicated by being enclosed in rectangular brackets, so as to make it complete without being tiresomely prolix. I have to record my general obligations to the editions of S. P. Pandit, Appâs'àstrî Ráshivdekar and S. S. Ayyar, and to the scholarly Translation of the play by Prof. Tawney. Lastly I must thank a friend of mine who greatly assisted me in the preparation of this edition and also in the correction of the proof-sheets. For this (second) ed. the translation has been thoroughly revised and many additions made in the Notes; it is therefore hoped that the book will be found increasingly useful by those for whom it is intended.

GIRGAUM, BOMBAY. } M. R. KA'LE.

PREFACE TO THE THIRD EDITION

The translation has been thoroughly revised and the notes have received many additions. We hope it will make this edition even more useful than the 2nd.

Bombay
1st April 1933. } GOPAL NARAYEN & CO.

Dramatis Personæ.

MALES.

सूत्रधारः—The stage-manager.

पारिपार्श्विकः—The assistant of the Sûtradhára.

राजा (अग्निमित्रः)—The Hero, the King of Vidiśâ.

विदूषकः (गौतमः)—A Bráhmaṇa, the King's personal friend and court-wit.

अमात्यः (वाहतवः)—The chief minister of Agnimitra.

हरदत्तः (आचार्यः)—A dancing-master attached to the Court.

गणदासः (आचार्यः)—Another dancing-master attached to the Court, and a rival of Haradatta.

कञ्चुकी (मौद्गल्यः)—The Chamberlain.

सारसिकः—A servant of Queen Dháriṇî.

वैतालिक. (०कौ)—A bard (or bards) attached to the Court.

Attendants.

FEMALES.

मालविका—The Heroine, sister of Mâdhavasena.

धारिणी (देवी)—The principal wife of Agnimitra, and the Queen.

इरावती—Another wife of Agnimitra, junior to Dháriṇî.

परिव्राजिका (कौशिकी)—A female ascetic, attached to Dhâriṇî's court.

प्रतीहारी (जयसेना)—The door-keeper of the palace.

बकुलावलिका—A maid-servent of Queen Dhâriṇî and a friend of Málaviká.

कौमुदिका, नागरिका—Maid-servants of Dhâriṇî.

निपुणिका—A maid-servant of Irâvatî.

समाहितिका—A servant of the Parivrájikâ.

उद्यानपालिका (मधुकरिका)—Gardener of the *Pramadavana*.

ज्योत्स्निका—, मदनिका— } Artisans from Yajñasena's Court; originally the maid servants of Mádhavasena.

Attendants.

OTHER PERSONS MENTIONED.

यज्ञसेन—The King of the Vidarbhas.

माधवसेन—A cousin of Yajñasena, and the brother of Mâlavikâ.

सुमति—Mâdhavasena's minister.

पुष्पमित्र—Agnimitra's father.

वसुमित्र—Agnimitra's son.

वीरसेन—Agnimitra's brother-in-law, the brother of Queen Dhâriṇî.

मौर्यसचिव—' The minister of the Mauryas '–the brother-in-law of Yajñasena.

ध्रुवसिद्धि—A Court physician, specialist in toxicology.

वसुलक्ष्मी—A princess in the palace.

माधविका—A maid-servant, keeper of the underground cellar.

चन्द्रिका—A maid-servant of Irâvatî.

SCENE.

Vidiśâ and the adjoining gardens.

भूमिका ।

निर्गतासु न वा कस्य कालिदासस्य सूक्तिषु ।
प्रीतिर्मधुरसार्द्रासु मञ्जरीष्विव जायते ॥

—बाणस्य ।

साकूतमधुरकोमलविलासिनीकण्ठकूजितप्राये ।
शिक्षासमयेऽपि मुदे रतलीलाकालिदासोक्ती ॥

—आचार्यगोवर्धनस्य ।

इह खलु सकलविद्याकलाकलापादिपीठेऽस्मिन्भारते वर्षे निजयशःसुरभीकृतदिगन्तरालाः प्रतिभाशालिनः परःशता महाकविपदमारूढाः कवीश्वराः स्वकृतिमण्डनैर्वाग्वधूं मण्डयन्ति स्म । तेषामपि कीर्तिशालिनां सुधांशुरिवोडुपुञ्जमध्यगतः कालिदासोऽग्र्यपदमारोहतीति सर्वेषां प्राचीनार्वाक्तनानां पण्डितानामभ्युपगमः । "पुरा कवीनां गणनाप्रसङ्गे कनिष्ठिकाधिष्ठितकालिदासा । अद्यापि तत्तुल्यकवेरभावादनामिका साऽर्थवती बभूव ॥" इति सुविश्रुतं सुभाषितमेवात्र निदर्शनम् । अयं च कविचक्रचूडामणिः मालविकाग्निमित्र-विक्रमोर्वशीय-शाकुन्तलाख्यानि परस्परापेक्षयावरमध्यमोत्तमगुणानि त्रीणि रूपकाणि, मेघदूत--कुमारसंभव--रघुवंशाभिधानि च त्रीणि सुललितपदविन्यासानि काव्यानि निबबन्ध । ऋतुसंहाराख्यं खण्डकाव्यमप्येतदीयमेवेति प्रायो वादः । नलोदय--श्रुतबोध--शृङ्गारतिलकादयश्च बहवोऽन्ये प्रबन्धाः कालिदासकृतितया प्रसिद्धा अपि न कालिदासीयकाव्यगुणविशेषकक्षामवगाहन्त इति परकर्तृत्वमेवैतेषां पण्डितैः प्रस्थापितम् । कालिदासीया अन्येऽपि केचित्प्रबन्धाः कालवशमित्वाधुना विनष्टाः स्युरित्येतदपि कल्पयितुं शक्यम् ।

एवं सत्यप्ययं महाकविः कं देशं स्वजन्मनालंचकार, कौ वास्य धन्यौ पितरौ, कस्मात्क वाऽसौ विद्याधिगमं कृतवानित्यादि याथातथ्येन नैवैतर्हि ज्ञातुं शक्यते । केवलमयं कृतविद्यो लब्धमहाकवियशाः श्रीमतो विक्रमादित्यस्य राज्ञः सदसमलंचकारेति किंवदन्त्योपलब्धम् । उक्तं च केनापि—"धन्वन्तरिक्षपणकामरसिंहशङ्कुवेतालभट्टघटकर्पर**कालिदासाः** । ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचिर्नव विक्रमस्य ॥" इति । विक्रमादित्यश्च शालिवाहनशकात्प्राक् १३५ मितेऽब्दे राज्यपदमारूढ इति तद्विदुषां निर्णयः । अयमेवास्य कवेः कालः इति मन्यामहे । केचित्तु यूरोपीया ऊरीकृतसंशोधनकर्माणः संख्यावन्तः कविरयं क्रिस्तीयशकस्य) प्रथमशतकादूर्ध्वमित्यपरे चतुर्थपञ्चमशतकयोरन्तरालेऽभवदिति तर्कयन्ति तदहो संशयगहनविनष्टः कविकालाभ्यूहः ।

श्रीमता कालिदासेन सर्वत्रापि वैदर्भी रीतिरेवावलम्बितात्मकृतिषु । तामिमां रीतिं श्रीबिह्लण इत्थं वर्णयति-" अनभ्रवृष्टिः श्रवणामृतस्य सरस्वतीविभ्रमजन्मभूमिः । वैदर्भरीतिः कृतिनामुदेति सौभाग्यलाभप्रतिभूः पदानाम् ॥ " इति । ईदृश्यस्य कवेर्वश्या वाक् यत्-" श्लेषः प्रसादः समता माधुर्यं सुकुमारता । अर्थव्यक्तिरुदारत्वमोजः-कान्तिसमाधयः ॥ " इति दण्डयुक्ताः सर्वेऽपि काव्यगुणाः समुल्लसन्त्यस्य निबन्धेषु । तत्रापि प्रसादः शेखरीभूतः । रसश्च शृङ्गारो मूर्धन्यत्वेन कालिदासीयग्रन्थेषु समुपनिबद्धः । उपमाचातुर्येण कल्पनाविशालत्वेन पदमाधुर्येणासमासभूयस्त्वादिगुणैः सर्वाङ्गीणमनोज्ञतयास्य प्रबन्धानामयमितरकविस्म्यः सुतरां श्लाघ्य इति जानन्त्येव सुधियः । आहुश्च रसिकाः--" उपमा कालिदासस्य " इति ।

एतन्मालविकाग्निमित्रं नाटकं शाकुन्तल-विक्रमोर्वशीयापेक्षया हीनगुणमित्युक्तं प्राक् । अस्य पञ्चाङ्काः । अस्मिन्नपि पदघटना तथा मधुरवर्णोपेता यथा सर्वत्र द्राक्षापाक एवोपलभ्यते । न क्वचिदपि ' नारिकेलफलसंमितत्वं ' वचसाम् । तथा चेदं तत्र तत्रानुप्रासैः क्वचित् श्लेषादिभिः कुत्रचनोचितैरलंकारैरार्थैश्चोद्भासितम् । अत्र नायकोऽग्निमित्रो धीरोदात्तः । नायिका मालविका बाला मुग्धा च । संभोगशृङ्गारः प्रधानो रसः । इतिवृत्तं चास्य प्राय ऐतिहासिकमंशतः कविकल्पनोत्पादितं च । अस्मिन्नाटके वर्णितं कथावस्त्वङ्कविभक्तं सारांशतः सुलभावगमार्थमत्रोपनिबध्यते—

प्रथमाङ्के तावदादौ नान्दीपठनम् । ततः प्रस्तावनायां सूत्रधारपारिपार्श्विकौ कालिदासकृतिर्मालविकाग्निमित्रं नाम नाटकं वसन्तोत्सवसमये प्रयुज्यत इति कथयतः । ततश्च नाटकारम्भः । तत्र चेटीद्वयसंकथायाः " अथैकदा विदिशाधीशो राजाऽग्निमित्रो देव्या धारिण्याः परिजनमध्यगतां चित्र आलिखितां कामपि समुपारूढनवयौवनां कन्यकां प्रेक्ष्य तद्रूपमोहितः संस्तस्या नामधेयादिकं राज्ञीं पप्रच्छ । सा तु साशङ्का राज्ञस्तां निगूहितुमात्तप्रयत्ना न किमप्युत्तरं ददौ । किं तु कुमार्या वसुलक्ष्म्या बालभावसुलभेन चापल्येन मालविकेत्यस्या नामेति राज्ञे कथितम् " इत्यंशो विष्कम्भकादवगम्यते । अथ च मालविकागतैकमना राजा तां द्रष्टुकामो विदूषकेण सह मन्त्रयित्वा धारिण्या देव्या आसन्नचरीं परिव्राजिकां पण्डितकौशिकीं च स्वपक्ष आकार्य प्रयोगं कृतवान् । तद्यथा-विदूषको जनितपरस्परविज्ञानसंघर्षयोर्नाट्याचार्ययोर्हरदत्तगणदासयोः कलहमुत्पाद्य तन्निर्णयाय तौ नृपसमीपं प्रापयामास । तत्र च पण्डितकौशिक्या ' प्रयोगप्रधानं नाट्यशास्त्रम् । उपदेशदर्शनान्निर्णयः । अतो द्वाभ्यामपि युवाभ्यां प्रेक्षागृहे संगीतरचनां कृत्वा शिष्यासंक्रान्त उपदेशो दर्शयितव्यः ' इति निश्चितम् । राज्ञा देव्या च धारिण्या यथाकथंचित्तदनुमतं च ।

द्वितीयाङ्के गणदासशिष्या मालविका नाट्यशालायां नृत्ताभिनयपूर्वकं शर्मिष्ठायाः कृतेरङ्गं चतुष्पदं वस्तु गायति—" दुर्लभः प्रियस्तस्मिन्भव हृदय निराशमहो अपाङ्गको मे प्रस्फुरति किमपि वामः । एष स चिरदृष्टः कथमुपनेतव्यो नाथ मां पराधीनां

त्वयि गणय सतृष्णाम् ॥ " इत्येवंरूपम् । तत्र 'जनमिममनुरक्तं विद्धि' इति अहमेव प्रार्थनाव्याजमुक्त इति राजा मन्यते स्म । एवं तस्यापि तस्यामनुरागातिशयः समजनीति स एवाङ्कान्ते स्पष्टयति " सर्वान्तःपुरवनिताव्यापारप्रतिनिवृत्तहृदयस्य । सा वामलोचना मे स्नेहस्यैकायनीभूता ॥ " इत्यनेन पद्येन ।

तृतीयाङ्के तावत् अन्योन्यसंघर्षितयोर्नाट्याचार्ययोः समानागमित्वेऽपि शिष्यागुणविशेषेण गणदासः प्रशंसित इति, दृढं च मालविकायां साभिलाषो राजा राजन्यपि मालविकेति कौलीनं सर्वत्र राजकुले प्रसृतम्, इति च प्रवेशकादुपलभ्यते । अत्रान्तरे विदूषकेण राज्ञो मनोगतं मालविकायाः सख्यै बकुलावलिकायै ज्ञापयित्वा तस्याः साहाय्यं प्रार्थितं तयापि चास्मै प्रतिश्रुतम् । अथ च प्रमदवनपालिका मधुकरिका चिरायमाणमुकुलोद्गमस्य तपनीयाशोकतरोर्दोहदं पादताडनरूपं धारिण्यै निवेदयामास । किं तु सरुजचरणत्वात्स्वयं तन्निर्वर्तयितुमशक्नुवती सा तत्र मालविकां न्ययोजयत् । यदि चासौ पञ्चरात्राभ्यन्तरे कुसुमं दर्शयति तदाहमभिलाषपूरयितृकं प्रसादं दास्यामीत्यपि देव्या तस्यै प्रतिज्ञातम् । अथ मालविकागतचित्तो राजा सविदूषकः प्रमदवनं प्रविष्टः । तत्र च मालविका बकुलावलिका चाशोकदोहदपूरणार्थमुपागते । अमुं प्रस्तावमुपलभ्य बकुलावलिकया मालविकाया राजन्यनुरागः सुदूरमारोपितः । लतान्तरितः सविदूषको राजा सर्वमेतदालोक्य यावदात्मानं दर्शयति तावत्प्रमदवने दोलाधिरोहणार्थं कृतसंकेता राज्ञो भोगिनी नायिकेरावत्यपि तत्रस्थैतदवलोकयन्ती तत्कालमात्मानमदर्शयत् । तां दृष्ट्वा संभ्रान्तं राजानं च भृशं निर्भर्त्स्यानुनीयमानापि प्रसादमगृहीत्वा सा कुपितैवापससार ।

चतुर्थाङ्के देवीं धारिणीं विज्ञाप्येरावत्या मालविकाबकुलावलिके बन्धनं कारिते भूगृहे निक्षिप्ते च । भूगृहव्यापृता माधविका च देव्या संदिष्टा—मम नागमुद्रिताङ्गुलीयकमदृष्ट्वा न मोक्तव्ये एते इति । वृत्तान्तमिमं विदूषकमुखेन श्रुत्वा परं खिन्नतामापन्नो राजा 'अप्यत्र कश्चिदुपक्रमः स्यात्' इति विदूषकं पृष्टवान् । अस्ति परं कर्णे कथयामीत्युक्त्वा तथा कृतवन्तं तं 'प्रयुज्यतां सिद्धये' इति सपरितोषं राजा विसर्जयामास । स्वयं च प्रवातशयननिषण्णां देवीं धारिणीं द्रष्टुमगात् । ततो विदूषकः केतकीकण्टकैर्दंशपदसदृशमात्माङ्गुष्ठे छिद्रयित्वा 'सर्परूपेण कालेन दष्टोऽस्मि' इत्याक्रोशन् राज्ञोऽन्तिके विषवेगमलीकमेव रूपयामास । तं च राजा ध्रुवसिद्धेर्विषवैद्यस्य विज्ञापनानुरोधेन तत्सकाशं नीयतामयमिति निष्क्रमयामास । ततश्च 'ध्रुवसिद्धिर्विज्ञापयति उदकुम्भविधाने सर्पमुद्रितं किमपि कल्पयितव्यम् । तदन्विष्यताम्' इति तस्मादागतं संदेशं श्रुत्वा ब्राह्मणजीवितस्य संशयदोलारूढ्या जातकातर्या देवी स्वयमेवात्मनो नागमुद्राङ्गुलीयकं संभ्रमाद्दत्तवती । तच्च लब्ध्वा विदूषकेण मालविकाबकुलावलिके बन्धनान्मोचिते । मालविकां च समुद्रगृहं नीत्वा तत्र राज्ञा तां संगमयांचकार । अत्रान्तरे भूयोऽपीरावती उपचारातिक्रमस्य प्रमार्ज-

नार्थं चित्रगतमार्यपुत्रं प्रसादयामीति कृत्वा तदेव समुद्रगृहं प्राप्ता राजानं मालविकया सह कृतप्रणयं निर्भर्त्सयितुमारेभे । किं तु पिङ्गलवानरेण त्रासिताया वसुलक्ष्म्याः प्रकृत्यनवस्थानमस्मिन्नेव समये प्रतीहार्या निवेदितं ज्ञात्वा सर्वे सत्वरं निष्क्रान्ताः । कातरहृदया शङ्किता च मालविकापि तदैवाशोकमुकुलोद्गमवार्तां श्रुत्वा प्रतिश्रुतप्रसादाया राज्ञ्याः सत्यप्रतिज्ञतां प्रति जातप्रत्यया किंचिदाश्वस्तचित्ता सख्यासह निरगात् ।

पञ्चमाङ्के तावत् ‘ राज्ञोऽग्निमित्रस्य दण्डचक्रेण वशीकृतस्तस्यामित्रो विदर्भराजो यज्ञसेनः ’ इति प्रवेशकाज्ज्ञातम् । पश्चात् देवी धारिणी प्रतिज्ञातार्थसंपादनाय मालविकां परिव्राजिकया विवाहनेपथ्येन मण्डयित्वा ताभ्यां सह प्रमदवनं जगाम नृपं च तत्राशोकप्रसूनलक्ष्मीसमवलोकनव्यपदेशात आनीतवती । अस्मिंश्च समये विजितविदर्भनाथविषयादुपायनत्वेनानीते द्वे शिल्पकारिके तत्र कञ्चुकिना प्रवेशं कारिते । ते च मालविकां परिव्राजिकावेषामार्यां कौशिकीं च प्रत्यभिजज्ञाते । ततः कौशिक्या ताभ्यां चाशेषो वृत्तान्तः श्रावितो यस्मान्मालविका राजदारिका माधवसेनस्य कनीयसी भगिनी चेति ज्ञातम् । अत्रान्तरे च राज्ञः पित्रा पुष्पमित्रेण प्रेषिताल्लेखादात्मजं वसुमित्रं सर्वत्र विजयिनं निशम्योभावपि देवो देवी च प्रहृष्टौ । धारिणी च पारितोषिकव्याजेन राज्ञे मालविकां प्रादाद्राजापि तां सव्रीडं ससंमानं च परिजग्राहेति सर्वं शुभोदर्कत्वेन समाप्य कविरग्रे भरतवाक्यमुपन्यबध्नात्— “ आशास्यमीतिविगमप्रभृति प्रजानां संपद्यते न खलु गोप्तरि नाग्निमित्रे ” इति ॥

अथ

मालविकाग्निमित्रम् ।

प्रथमोऽङ्कः ।

एकैश्वर्ये स्थितोऽपि प्रणतबहुफले यः स्वयं कृत्तिवासाः
कान्तासंमिश्रदेहोऽप्यविषयमनसां यः परस्ताद्यतीनाम् ।
अष्टाभिर्यस्य कृत्स्नं जगदपि तनुभिर्बिभ्रतो नाभिमानः
सन्मार्गालोकनाय व्यपनयतु स वस्तामसीं वृत्तिमीशः ॥ १ ॥

वेदादीनां विशुद्धानां विद्यानां जन्महेतवे ।
पार्वतीपरतन्त्राय परस्मै वस्तुने नमः ॥

भाग्यं नाम समग्रमीदृशमतिस्नेहैकपात्रं यतो
वीरं काटयवेम उद्धतरिपुध्वंसे नियुज्य स्वयम् ।
नित्यं नन्दति नर्तनैरभिनवैः कान्तैर्वसन्तोत्सवैः
संतानाभ्युदयैः कुमारगिरिभूपालो नृपालोत्तमः ॥

अत्र कविः कालिदासः प्रारिप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्त्यर्थमिष्टदेवतास्मरणपूर्वकमाशिषं प्रयुङ्क्ते—**एकैश्वर्य इत्यादि** । स ईशः परमेश्वरः सन्मार्गालोकनाय सन् प्रशस्तो मार्गः पन्था मोक्षमार्गस्तस्यालोकनाय दर्शनाय वो युष्माकं तामसीं तमःसंबन्धिनीं वृत्तिं प्रवृत्तिं व्यपनयतु अपाकरोत्विति संबन्धः । कथंभूत ईशः । यः प्रणतबहुफले । बहूनि फलानि यस्मात्तत्तथोक्तं । प्रणतानां प्रणामं कृतवताम् । भक्तानामित्यर्थः । बहुफलं तस्मिन् । एकैश्वर्ये । ईश्वरस्य भाव ऐश्वर्यम् । एकं मुख्यम् । अनन्यसाधारणमित्यर्थः । तच्च तदैश्वर्यं च । तस्मिन् स्थितोऽपि अणिमाद्यैश्वर्ययुक्तोऽपीत्यर्थः । स्वयम् आत्मना कृत्तिवासाः कृत्तिश्चर्म वासो वसनं यस्य स तथोक्तः । यः कान्तासंमिश्रदेहोऽपि कान्तया स्त्रिया संमिश्रः संमिलितो देहः शरीरं यस्य स तथोक्तः तादृशोपि सन् । अविषयमनसाम् न विद्यन्ते विषयाः शब्दादयो येषां तान्यविषयाणि तानि मनांसि येषां ते तथोक्ताः तेषाम् । यतीनां संयमिनां परस्तात् परः श्रेष्ठः । 'दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः' इत्यस्तातिप्रत्ययः । अष्टाभिस्तनुभिः पृथिव्यादिमूर्तिभिः । [पृथिवी सलिलं तेजो वायुराकाश एव च । सूर्याचन्द्रमसौ सोमयाजी चेत्यष्टमूर्तयः ॥ इति यादवः ।] कृत्स्नं सर्वं जगत लोकं बिभ्रतोऽपि धारयतोऽपि यस्य अभिमानः प्रणयो ममत्वं न भवति । एषु विशेषणेषु विरोधालंकारेणास्य लोकातिशायित्वमुक्तं भवति । [स्रग्धरा वृत्तम् ।] १ ॥ अत्र

---

१ ०श्वर्यथिस्तोपि० फलो. २ पुरस्तात्. ३ सर्वं. ४ नः.

(नान्द्यन्ते)

सूत्रधारः—(नेपथ्याभिमुखमवलोक्य ।) मारिष[1] इतस्तावत् ।

(प्रविश्य)

पारिपार्श्विकः—भाव अयमस्मि ।

सूत्रधारः—अभिहितोऽस्मि विद्वत्परिषदा[2] कालिदासग्रथितवस्तु मालविकाग्निमित्रं[3] नाम नाटकमस्मिन्वसन्तोत्सवे प्रयोक्तव्यमिति । तदारभ्यतां संगीतम् ।

पारिपार्श्विकः—मा[4] तावत् । प्रथितयशसां भासकविपुत्रसौमिल्लकादीनां[5] प्रबन्धानतिक्रम्य वर्तमानकवेः कालिदासस्य क्रियायां[6] कथं परिषदो बहुमानः ।

प्रणतबहुफलत्वैकैश्वर्यस्थित्या कान्तासंमिश्रणेन जगद्धरणेन ईश इत्यनेन च लोकोत्तरः कश्चिद्राजास्मिन्नाटके वर्ण्यत इति सूच्यते । सन्मार्गालोकनायेत्यनेनात्र कश्चिन्मार्गाभिनयः प्रतिपाद्यत इति सूच्यते । मार्गो नाम नाट्यविशेषः । यथोक्तम्—'मार्गोऽपि देशी तद्भेदः कथितो नाट्यवेदिभिः । अत्र मार्गो भवेन्नाट्यं नाट्यवेदोक्तलक्षणम् ॥' इति । एष नान्दीश्लोकः । नान्द्यादिलक्षणं तु शाकुन्तलव्याख्यान एवाभिहितम् । अत्र 'पदादिनियमोऽपि वा' इति विकल्पात्पदादिनियमाभावः ॥ अथ प्रस्तावनां विवक्षुस्तदङ्गयोः प्ररोचनामुखयोः प्ररोचनां प्रस्तौति—**नान्द्यन्ते सूत्रधार इत्यादिना** । मारिष इतस्तावत् । आगम्यतामिति शेषः । नटः सूत्रधारेण मारिष इति वाच्यः । 'सूत्री नटेन भावेति तेनासौ मारिषेति च ।' इत्युक्तत्वात् । परिपार्श्वे यथा भवति तथा वर्तते इति पारिपार्श्विकः । नट इत्यर्थः । 'परिमुखं च' इत्यत्र चकाराट्ठक् । **अभिहितोऽस्मीत्यादि** । विद्वत्परिषदा विदुषां विपश्चितां परिषत्सभा तया । अनेन सभाप्रशंसा कृता । कालिदासग्रथितवस्तु कालिदासेन ग्रथितं वस्तु कथा यस्मिंस्तत्तथोक्तम् । [मालविकया सहितः अग्निमित्रः मालविकाग्निमित्रः तमधिकृत्य कृतं नाटकं मालविकाग्निमित्रम् ।] 'अधिकृत्य कृते ग्रन्थे' इत्यण् । यथा मालतीमाधवम् । वसन्तोत्सव इत्यनेन कालनिर्देशः कृतः । संगीतं तौर्यत्रिकम् । तथा चोक्तं संगीतरत्नाकरे—'नृत्तं गीतं तथा वाद्यं त्रयं संगीतमुच्यते ।' इति । आरभ्यतां प्रयोक्तुं यत्नः क्रियताम् ॥ मा तावत् । मा इति निवारणे । भास–कविपुत्र–सौमिल्लकाः प्राक्तनाः कवयः । प्रबन्धान् रूपकाणि । अतिक्रम्योल्लङ्घ्य । परिहृत्येत्यर्थः । कालिदासस्य कालिदासनामधेयस्य कवेः । क्रियायां कृतौ रूपके । कथं बहुमान आदरातिशयः । कथमित्याक्षेपे । विवेक-

---

१ अस्मात्प्राक्–अलमतिविस्तरेण इति एकस्मिन् पु०. २ विद्वत् इति नास्ति क्वचित्. ३ ०मित्रीयम्. ४ भाव. ५ भासकविसौमिल्लकविमिश्रा०; धावकसौ०कवि०; भाससौमिल्लकवि०. ६ कृतौ; कृतौ किं कृतो बहुमानः; क्रियामिमां द्रष्टुं कथं.

सूत्रधारः—अयि[1] विवेकविश्रान्तमभिहितम्[2] । पश्य ।

पुराणमित्येव न साधु सर्वं न चापि काव्यं नवमित्यवद्यम् ।
सन्तः परीक्ष्यान्यतरद्भजन्ते मूढः परप्रत्ययनेयबुद्धिः ॥ २ ॥

पारिपार्श्विकः—आर्यमिश्राः प्रमाणम् ।

सूत्रधारः—तेन हि त्वरतां भवान् ।

शिरसा प्रथमगृहीतामाज्ञामिच्छामि परिषदः कर्तुम् ।
देव्या इव धारिण्याः सेवादक्षः परिजनोऽयम् ॥ ३ ॥

(इति निष्क्रान्तौ ।)

प्रस्तावना ।

(ततः प्रविशति चेटी[3] ।)

चेटी—आज्ञप्तास्मि देव्या धारिण्या । अचिरप्रवृत्तोपदेशं छलितं

विश्रान्तं विवेकदुर्बलम् । विवेकशून्यमित्यर्थः । क्रियाविशेषणं चैतत् । **पुराणमिति** । सर्वं काव्यं कवेः कर्म । कृतिरित्यर्थः । पुराणमित्येव पुराणत्वादेव साधु रम्यं न भवति । नवमिति च नवत्वादेव अवद्यं गर्ह्यं न भवति । [अवद्यपण्य इति निपातनात्साधु ।] किं तु सन्तो विद्वांसः [प्रेक्षावन्त इत्यर्थः] । परीक्ष्य पुराणं नवं च काव्यं गुणतो दोषतश्च परामृश्य अन्ततस्तयोरेकं पुराणं नवं वा । गुणयुक्तमित्यर्थः । भजन्ते स्वीकुर्वन्तीत्यर्थः । मूढः अज्ञस्तु परप्रत्ययनेयबुद्धिः परस्यान्यस्य प्रत्ययेन ज्ञानेन नेया प्राप्या बुद्धिर्यस्य स तथोक्तः । अनेन कविकाव्यप्रशंसा कृता । [उपजातिः छन्दः ।] ॥ २ ॥ **शिरसेत्यादि** । शिरसा मूर्ध्ना प्रथमगृहीतां पूर्वस्वीकृताम् । शिरसो ग्रहणेन भक्त्यातिशयो गम्यते । परिषदः सभाया आज्ञां शासनं कर्तुं निर्वर्तयितुमिच्छाम्यभिलषामि । अत्रोपमामाह—धारिण्या देव्याः । धारिणी नाम कथानायकस्य पत्नी । तस्या आज्ञां सेवादक्षः परिचर्यानिपुणः अयं पुरोवर्ती परिजन इव । परिचारको जनः परिजनः । अनेन पात्राक्षेपहेतुः प्रयोगातिशयो नाम मुखाङ्गमुक्तं भवति । [तदुक्तं दशरूपके—एषोयमित्युपक्षेपात्सूत्रधारप्रयोगतः । पात्रप्रवेशो यत्रैष प्रयोगातिशयो मतः ॥ इति । आर्या छन्दः ।] ॥ ३ ॥ **प्रस्तावना** ॥ [तल्लक्षणम्—नटी विदूषको वापि पारिपार्श्विक एव वा । सूत्रधारेण सहिताः संलापं यत्र कुर्वते ॥ चित्रैर्वाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः । आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनापि सा ॥ इति ।] कविरिदानीमङ्कमारभमाणः कथोपयोगितया प्रथमं मिश्रविष्कम्भं नामार्थोपक्षेपकं प्रस्तौति—**ततः प्रविशतीत्यादिना** । [अचिरं प्रवृत्त उपदेशो यस्य । नाट्यमन्तरेण अवस्थानुकृतिर्नाट्यं तदुद्दिश्य ।]

---

१ अये. २ विवेकश्रान्तं २ बकुलावलिका.

नाम नाट्यमन्तरेण कीदृशी मालविकेति नाट्याचार्यमार्यगणदासं प्रष्टुम् । तत्तावत्संगीतशालां गच्छामि । (इति परिक्रामति ।) (क)

(ततः प्रविशत्याभरणहस्ता द्वितीया चेटी ।)

प्रथमा—(द्वितीयां दृष्ट्वा ।) सखि कौमुदिके कुतस्त इयं धीरता यत्समीपेनाप्यतिक्रामन्तीतो दृष्टिं न ददासि । (ख)

द्वितीया—अहो बकुलावलिका । सखि इदं देव्याः शिल्पिसकाशादानीतं नागमुद्रासनाथमङ्गुलीयकं स्निग्धं निध्यायन्ती तवोपालम्भे पतितास्मि । (ग)

बकुलावलिका—स्थाने खलु सज्जति दृष्टिः । अनेनाङ्गुलीयकेन उद्भिन्नकिरणकेसरेण कुसुमित इव तेऽग्रहस्तः प्रतिभाति । (घ)

कौमुदिका—सखि कुत्र प्रस्थितासि । (ङ)

(क) आणत्तह्मि देवीए धारिणीए । अइरप्पउत्तोवदेसं चलिअं णाम णट्टअं अन्तरेण कीरिसी मालविअत्ति णट्टाअरिअं अज्जगणदासं पुच्छिदुं । ता दाव संगीतसालं गच्छह्मि । (ख) हला कोमुदीए कुदो दे इअं धीरदा जं समीवेण वि अदिकामन्ती इदो दिट्ठिं ण देसि । (ग) अम्हो वउलावलिआ । सहि इदं देवीए सिप्पिसआसादो आणीदं णाअमुद्दासणाहं अङ्गुलीअअं सिणिद्धं णिज्झाअन्ती तुह उवालम्भे पडिदह्मि । (घ) ठाणे खु सज्जदि दिट्ठी । इमिणा अङ्गुलीअएण उब्भिण्णकिरणकेसरेण कुसुमिदो विअ दे अग्गहत्थो पडिभादि । (ङ) हला कहिं पत्थिदा सि ।

अन्तरेणेत्ययं निपात उद्देशार्थे वर्तते । चलितं नाम नृत्यविशेषः । तदुक्तम् ' तदेवतच-(च्छ)लितं नाम साक्षाद्यदभिनीयते । व्यपदिश्य पुरावृत्त स्वाभिप्रायप्रकाशकम् ॥ ' इति ॥ चतुर्विधाभिनयवद्यज्जातिस्वरसंभृतम् । शृंगाररसभूयिष्ठं सलयं चलितं विदुः ॥ इति व्याख्यान्तरम् । हला—हलेति सख्या आह्वाने ' हण्डे हञ्जे हलाह्वाने नीचां चेटीं सखीं प्रति । ' इत्यमरः । शिल्पी सुवर्णकारविशेषः । नागमुद्रया नागविषहारिमणिरचनाविशेषेण सनाथं युक्तम् । स्निग्धं सप्रेम । निध्यायन्ती पश्यन्ती । उद्भिन्नाः किरणा एव केसराः किञ्जल्का यस्य तेन । कुसुमितः जातकुसुमः । कुसुमान्यस्य संजातानि । ' तदस्य संजातं तारकादिभ्य इतच् ' इति इतच् । अग्रहस्तः अग्रश्चासौ हस्तश्चेति समानाधिकरणः समासः । हस्ताग्राग्रहस्तयोर्गुणगुणिनोर्भेदाभेदादिति वामनः ।]

---

१ अपरा चेटी आभर०. २ अइरोवणीदा छलिअण०. ३ छलिअं (छलिकं); सुच०. ४ जाव (यावत्). ५ समीवे वि. ६ सप्प. ७ ठाणे सज्जदे दे. ८ तुमं कहिं.

बकु०—देव्या वचनेन नाट्याचार्यमार्यगणदासमुपदेशग्रहणे कीदृशी मालविकेति प्रष्टुम् । (क)

कौमु०—सखि ईदृशेन व्यापारेणासंनिहितापि दृष्टा किल सा भर्त्रा । (ख)

बकु०—आम् । देव्याः पार्श्वगतः स जनश्चित्रे दृष्टः । (ग)

कौमु०—कथमिव । (घ)

बकु०—शृणु । चित्रशालां गता देवी प्रत्यग्रवर्णरागां चित्रले-खामाचार्यस्यावलोकयन्ती तिष्ठति । तस्मिन्नन्तरे भर्तोपस्थितः । (ङ)

कौमु०—ततस्ततः । (च)

बकु०—ततश्चोपचारानन्तरमेकासनोपविष्टेन भर्त्रा चित्रगताया देव्याः परिजनमध्यगतामासन्नतरां (-चरां) तां प्रेक्ष्य देवी पृष्टा । (छ)

कौमु०—किमिव । (ज)

बकु०—अपूर्वेयं दारिका आसन्ना च देव्या आलिखिता किंनामधेयेति । (झ)

(क) [1]देवीए वअणेण णट्टाअरिअं [2]अज्जगणदासं [3]उवदेशग्गहणे कीरिसी मालविअत्ति पुच्छिदुं । (ख) सहि ईरिसेण [4]वावारेण असंणिहिदा वि [5]दिट्ठा किल सा भट्टिणा । (ग) आम् । देवीए पास्सगदो सो जणो चित्ते दिट्ठो । (घ) कहं विअ । (ङ) सुणाहि । चित्तसालं गदा देवी पच्चग्गवण्णराअं चित्त-लेहं [6]आआरिअस्स [7]ओलोअन्ती चिट्ठदि । तस्सिं अन्तरे भट्टा उवट्ठिदो । (च) तदो तदो । (छ) तदो अ उवआराणन्तरं एक्कासणोवविट्ठेण भट्टिणा चित्तगदाए देवीए परिअणमज्झगदं [8]आसण्णअरं तं पेक्खिअ देवी पुच्छिदा । (ज) किं [9]विअ । (झ) [10]अपुव्वा इअं दारिआ [11]आसण्णा अ देवीए आलिहिदा किंणामहेअत्ति ।

ईदृशेन नाट्योपदेशग्रहणरूपेण । असंनिहिता परोक्षे स्थितेत्यर्थः । भर्त्रा राज्ञा । नीचै राजा एवं वक्तव्यः । तदुक्तं—भट्टेति चाधमैः इति ।] आमित्यङ्गीकारे । [प्रत्यग्रः वर्णरागः रञ्जनद्रव्यरागो यस्याः चित्रलेखां चित्रनिर्मितिं देव्या इति शेषः । उपचारानन्तरं भर्त्रागमने उचितादरदर्शनानन्तरम् । नाम एव नामधेयं किं नामधेयं यस्याः सा

---

१ सुणाहि दे०; देवीए एव्व. २ नाडआ. ३ दासं देक्खिदुं...मालविअत्ति ४ ईदिसव्वा०; दिट्ठा कहं एसा. ५ वि सा कहं भट्टिणा. ६ एतन्नास्ति क्वचित्. ७ अन्ती चिरं: आलोअन्ती जाव चिट्ठदि तहिं दाव भट्टा. ८ आसण्णदारिअं; आसण्णपरिचारिणीं देक्खिअ. ९ किंति १० अपुव्वरूवा. ११ तुह आसण्णा आलि०; आसण्णालि०.

कौमु०—आकृतिविशेषेष्वादरः पदं करोति । ततस्ततः । (क)

बकु०—ततोऽवधीरितवचनो भर्ता शङ्कितो देवीं पुनः पुनरप्यनुबन्द्धुं प्रवृत्तः । ततो यावद्देवी न कथयति तावत्कुमार्या वसुलक्ष्म्याख्यातम् । आवुत्त एषा मालविकेति । (ख)

कौमु०—(सस्मितम् ।) सदृशं खलु बालभावस्य । अतः परं कथय । (ग)

बकु०—किमन्यत् । सांप्रतं मालविका सविशेषं भर्तुर्दर्शनपथाद्रक्ष्यते । (घ)

कौमु०—सखि अनुतिष्ठ आत्मनो नियोगम् । अहमप्येतदङ्गुलीयकं देव्या उपनेष्यामि । (इति निष्क्रान्ता ।) (ङ)

बकु०—(परिक्रम्यावलोक्य च ।) एष नाट्याचार्य आर्यगणदासः संगीतशालातो निष्क्रामति । यावदस्मायात्मानं दर्शयामि । (च)

(इति परिक्रामति ।)

(प्रविश्य ।)

गणदासः—कामं खलु सर्वस्यापि कुलविद्या बहुमता । न पुनरस्माकं नाट्यं प्रति मिथ्यागौरवम् । कुतः[1] ।

(क) आकिदिविसेसेसु आअरो पदं करेदि । तदो तदो । (ख) तदो अवहीरिअवअणो भट्टा[2] सङ्किदो[3] देवीं पुणो पुणो वि अणुबन्धिदुं[4] पवुत्तो । तदो[5] जाव देवी ण कहेदि दाव कुमारीए वसुलच्छीए आचक्खिदं । आवुत्त एसा मालविअत्ति । (ग) सरिसं खु बालभावस्स । अदो वरं कहेहि । (घ) किं अण्णं । संपदं मालविआ सविसेसं भट्टिणो दंसणपहादो रक्खीअदि । (ङ) हला अणुचिट्ठ अत्तणो णिओअं । अहं वि एदं अङ्गुलीअअं देवीए उवणइस्सम् । (च) एसो णट्टाअरिओ अज्जगणदासो[6] संगीदसालादो णिक्कम्मदि[7] । जाव से अत्ताणं दंसेमि ।

किंनामधेया । आकृतीनां विशेषा आकृतिविशेषाः । तेषु पदं करोति उत्पद्यते ।] [अवधीरितं प्रत्युत्तरादानेनावगणितं वचनं यस्य । अनुबन्द्धुं निर्बन्धेन प्रष्टुम् ।] आवुत्तेति । 'भगिनीपतिरावुत्तः' इत्यमरः । बालभावस्य बालबुद्धेः । सदृशं योग्यम् । दर्शनस्य पन्थाः दर्शनपथः तस्मात् ।] 'अपुव्वा इअं दारिआ'। इत्यारभ्य 'दंसणपहादो रक्खीअदि' इत्यन्तेन वाक्यकदम्बकेन गम्यमानो मालविकागोचरो राज्ञोऽभिलाषोऽत्र नाटके बीजमित्यनुसन्धेयम् ॥ [अकामानुमतौ कामम् इत्यमरः । कुलविद्या कुलक्रमागता विद्या । मिथ्या अवास्तवं गौरवमादरः । न केवलं कुलविद्येति नाट्ये आदरः किं तु तस्य महत्त्वातिशयादेव ।]

---

१ तथा हि. २ णं आ०. ३ भट्टा देवीं सङ्किदो. ४ णिब्बं. ५ एतन्नास्ति क्वचित्. ६ अज्ज. ७ दाणिं णि०, णिग्गच्छदि.

देवानामिदमामनन्ति मुनयः कान्तं[1] क्रतुं चाक्षुषं[2]
रुद्रेणेदमुमाकृतव्यतिकरे स्वाङ्गे[3] विभक्तं द्विधा ।
त्रैगुण्योद्भवमत्र लोकचरितं नानारसं दृश्यते
नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम्[4] ॥ ४ ॥

[तदेव प्रतिपादयति] ॥ देवानामिति । मुनयो भरतामतङ्गादय इदं नाट्यं देवानामिन्द्रादीनां क्रतुं यज्ञमामनन्ति । कीदृशम् । [कान्तं मनोहरम् ।] शान्तं सौम्यम् । पशुविशसनादिरहितमित्यर्थः । पुनः कीदृशम् । चाक्षुषं चक्षुरनुभाव्यम् । नयनतृप्तिकरमित्यर्थः । अस्य नाट्यस्य क्रतुत्वनिरूपणं चतुर्वेदसारनाट्यवेदविहितकर्मत्वादिति मन्तव्यम् । तथा च कुमारसंभवे (२-२२)—' कर्म यज्ञः फलं स्वर्गः ' इति । अस्य चतुर्वेदसारत्वं भारतीये प्रतिपादितम्—' सर्वशास्त्रार्थसंपन्नं सर्वशिल्पप्रदर्शनम् । नाट्यसंज्ञमिमं वेदं सेतिहासं करोम्यहम् ॥ एवं संकल्प्य भगवान्सर्वान्वेदाननुस्मरन् । नाट्यवेदं ततश्चक्रे चतुर्वेदाङ्गसंभवम् ॥ जग्राह पाठ्यमृग्वेदात्सामभ्यो गीतमेव च । यजुर्वेदादभिनयान्रसानाथर्वणादपि ॥ वेदोपवेदसंबद्धो नाट्यवेदो महात्मना । एवं भगवता सृष्टो ब्रह्मणा ललितात्मना ॥ उत्पाद्य नाट्यवेदं तु ब्रह्मोवाच सुरेश्वरम् ॥ ' इति । प्रकारान्तरेणाप्यस्य क्रतुत्वं प्रतिपादितम्—' प्रयोगं यश्च कुर्वीत प्रेक्षते चावधानवान् ॥ या गतिर्वेदविदुषां या गतिर्यज्ञयाजिनाम् । या गतिर्दानशीलानां तां गतिं प्राप्नुयान्नरः ॥' इति । पुनः कीदृशमिदं नाट्यम् । रुद्रेणेश्वरेणोमाकृतव्यतिकरे उमया पार्वत्या कृतो व्यतिकरः संबन्धो यस्य स तथोक्तस्तस्मिन्स्वाङ्गे आत्मदेहे द्विधा द्विप्रकारेण लास्यताण्डवरूपेण विभक्तं पृथक् कृतम् । तथा चोक्तं संगीतविद्याविनोदे—' उद्दण्डताण्डवमुदञ्चितलास्यलीलां कर्तुं स्वयं युगपदेव समुत्सुकात्मा । यः कामिनीकलितकम्रतरार्धकायः सोऽयं विभाति विभुरादिनटः सुराणाम् ॥' अत्र नाट्ये । त्रैगुण्योद्भवम त्रयो गुणाः सत्त्वरजस्तमांस्येव त्रैगुण्यम् । चतुर्वर्णादित्वात्स्वार्थे ष्यञ् । तस्मादुद्भवमुद्भूतं लोकचरितं लोकानां लोकस्थानां रामाद्यनुकार्याणां चरितं सुखदुःखमिश्रात्मकं चरितं नानारसं नाना बहुविधा रसाः प्रियतमोपभोग्या यस्मिंस्तत्तथोक्तं दृश्यते ज्ञायते । सामाजिकैरनुभूयते इत्यर्थः । लोकेऽनुकार्यस्य चरितं सुखदुःखमिश्रात्मकमपि नाट्यं नटेनाभिनीयमानं सत्सुखरूपेणैव प्रतीयत इति भावः । पुनः कीदृशम् । नाट्यं नटप्रयोगः । एकमप्येकैकमपि भिन्नरुचेर्भिन्ना बहुविधा रुचयः प्रीतयो यस्य स तथोक्तः तस्य जनस्य बहुधा बहुप्रकारेण शृंगारहास्यादिरूपेण समाराधनं संतर्पकम् । तथा चोक्तं भारतीये—' त्रैलोक्यस्यास्य सर्वस्य नाट्यं भावानुकीर्तनम् ॥ धर्मो धर्मप्रवृत्तानां कामः कामोपसेविनाम् । अर्थोपजीविनामर्थो धृतिरुद्विग्नचेतसाम् ॥ नानाभावोपसंपन्नं नानावस्थान्तरात्मकम् । लोकवृत्तानुकरणं नाट्यमेतन्मया कृतम् ॥ एतद्रसेषु भावेषु सर्वकर्मक्रियासु च । सर्वोपदेशजननं नाट्यमेतद्भविष्यति ॥ न तज्ज्ञानं न

१ शान्तं. २ चाक्षनम्. ३ स्वाङ्गैः. ४ राधकम्.

बकु०—(उपेत्य[1]।) आर्य वन्दे । (क)

गणदासः—भद्रे चिरं जीव ।

बकु०—आर्य देवी पृच्छति । अप्युपदेशग्रहणे नातिक्लेशयति वः शिष्या मालविकेति । (ख)

गणदासः—भद्रे विज्ञाप्यतां[2] देवी परमनिपुणा[3] मेधाविनी चेति । किं बहुना ।

यद्यत्प्रयोगविषये भाविकमुपदिश्यते मया तस्यै ।
तत्तद्विशेषकरणात्प्रत्युपदिशतीव मे बाला ॥ ५ ॥

बकु०—(आत्मगतम् ।) अतिक्रामन्तीमिवेरावतीं पश्यामि । (प्रकाशम् ।) कृतार्थेदानीं वः शिष्या यस्यां गुरुजन एवं तुष्यति । (ग)

गणदासः—भद्रे तद्विधानामसुलभत्वात्पृच्छामि । कुतो देव्या[5] तत्पात्रमानीतम् ।

बकु०—अस्ति देव्या वर्णावरो भ्राता वीरसेनो नाम । स भर्त्रा नर्मदातीरेऽन्तपालदुर्गे स्थापितः । तेन शिल्पाधिकारे योग्येयं दारिकेति भगिन्या उपायनं प्रेषिता । (घ)

(क) अज्ज[6] वन्दामि । (ख) अज्ज देवी पुच्छदि । अवि उवदेसग्गहणे णादिकिलेसेदि[7] वो सिस्सा मालविअत्ति । (ग) अदिक्कमन्ति विअ[8] इरावदिं पेक्खामि । किदत्था दाणिं वो सिस्सा जस्सिं[9] गुरुअणो एव्वं तुस्सदि । (घ) अत्थि देवीए वण्णावरो भादा वीरसेणो णाम । सो भट्टिणा णम्मदातीरे[10] अन्तवालदुग्गे ठाविदो । तेण सिप्पाहिआरे जोग्गा इअं दारिअत्ति भइणीए[11] उवाअणं पेसिदा ।

तच्छिल्पं नासौ विद्या न सा कला । नासौ योगो न तत्कर्म नाट्येऽस्मिन्यन्न दृश्यते ॥' इति । [शार्दूलविक्रीडितं वृत्तम् ।] ॥४॥ यद्यदित्यादि । प्रयोगविषयेऽभिनयार्थे मया तस्यै मालविकायै यद्यद्भाविकं भाववत् । 'अत इनिठनौ' इति ठन् । नृत्यमित्यर्थः । यथोक्तम्—'आङ्गिकाभिनयप्रायमल्पवाचिकसात्त्विकम् । भावानामास्पदं नृत्यं पदार्थव्यञ्जनात्मकम् ॥' इति । उपदिश्यते बोध्यते । तत्तद्विशेषकरणात्तस्य तस्य भाविकस्य विशेषेणातिशयेन करणात् निर्वर्तनात्सा बाला मे प्रत्युपदिशतीव प्रतिबोधयतीव । अनेन तस्या नृत्ये प्राविण्यातिशयो गम्यते । [वाच्या क्रियोत्प्रेक्षालंकारः । आर्या छन्दः ।] ॥ ५ ॥ [अतिक्रामन्तीं शिक्षाग्रहणपाटवेनातिशयानाम् । वर्णेनावर वर्णावरः । तस्याः पितुर्हीनवर्णभार्यायाः वैश्यकुलोत्पन्नाया जातत्वात् ।] तेन शिल्पाधिकारे

---

१ उपगम्य, उपसृत्य. २ विभाव्यताम्. ३ परं नि०. ४ उद्दि० ५ देव्याः. ६ अज्जं. ७ किलिस्सदि (क्लिश्यति). ८ इरा० विअ अदि० ९ जाए. १० कूले, मन्दाकिनी०. ११ भणिअ (भणित्वा) भइ० देवीए, भट्टिण्यै.

गणदासः—(स्वगतम् ।) आकृतिविशेषप्रत्ययादेनामनूनवस्तुकां संभावयामि । (प्रकाशम्) भद्रे मया यशस्विना भवितव्यम् । यतः ।

पात्रविशेषे न्यस्तं गुणान्तरं व्रजति शिल्पमाधातुः ।
जलमिव समुद्रशुक्तौ मुक्ताफलतां पयोदस्य ॥ ६ ॥

बकु०—अथ कुत्र वः शिष्या । (क)

गणदासः—इदानीमेव पञ्चाङ्गाभिनयमुपदिश्य मया विश्रम्यतामित्यभिहिता दीर्घिकावलोकनगवाक्षगता प्रवातमासेवमाना तिष्ठति ।

बकु०—तेन ह्यनुजानातु मामार्यः । यावदस्या आर्यस्य परितोषनिवेदनेनोत्साहं वर्धयामि । (ख)

गणदासः—दृश्यतां सखी । अहमपि लब्धक्षणः स्वगृहं गच्छामि ।

(इति निष्क्रान्तौ ।)

मिश्रविष्कम्भः ।

(क) अह कहिं वो सिस्सा । (ख, तेण हि अणुजाणादु मं अंज्जो । जाव से अज्जस्स परितोसणिवेदणेण उच्छाहं वड्ढेमि ।

कलाविद्याधिगमे [इयं योग्या इति मनसि कृत्वा भगिन्यै देव्या उपायनमुपदा इति प्रेषिता ।] अनूनवस्तुकामनूनमनल्पं विशिष्टं वस्तु वृत्तं यस्याः सा तथोक्ता तां संभावयामि मन्ये । **पात्रविशेष इति** । आधातुः उपदेष्टुः शिल्पं कुशल[कला] विद्या पात्रविशेषे विशिष्टपात्रे न्यस्तं [निहितं] सत् गुणान्तरं गुणविशेषं व्रजति प्राप्नोति । अत्रोपमामाह—पयोदस्य मेघस्य जलं समुद्रशुक्तौ न्यस्तं सत् मुक्ताफलतां मौक्तिकत्वमिव । [आर्या छंदः ।] ॥ ६ ॥ **इदानीमित्यादि** । [पञ्चाङ्गाभिनयं] पञ्च अङ्गानि यस्य तत्तथोक्तम् । प्रेरणमित्यर्थः । तस्याभिनयः प्रयोगः [तम्] इदानीमद्यैवोपदिश्य शिक्षयित्वा । प्रवातं प्रकृष्टो वातो यस्मिन्देशे [स तथोक्तस्तम्]। प्रेरणस्याङ्गपञ्चकमुक्तं [संगीत] नृत्तरत्नाकरे—'नृत्तं तथा च कैवारो घ[म]र्मरो जागरं [बागडं] तथा । गीतं चेति समाख्यातं प्रेरणस्याङ्गपञ्चकम् ॥ त्रिभिस्त्वेतत्प्रयोज्यं स्यात्कैवारं [बागडं] जागरं विना ॥' इति । [चित्ताक्षिभ्रूहस्तपादैरङ्गैश्चेष्टादिसाम्यतः । पात्राद्यवस्थाकरणं पञ्चाङ्गोभिनयो मतः ॥इति केचित् । अत्रादिपदेन 'आङ्गिको वाचिकश्चैवमाहार्यः सात्त्विकस्तथा ।' इति चतुरङ्गकोपि ग्राह्य इति वाचस्पतिः ।]अत्र पञ्चाङ्गरूपनृत्तान्तरोपक्रमकथनेन **चलितकनृत्तं** साकल्येन परिचितं परिशीलितमिति सूच्यते ॥ [दीर्घिकाया अवलोकनं ' यस्मात्तथाभूतं गवाक्षं गता । प्रकृष्टो वातः प्रवातः तम् । लब्धक्षणो लब्धः प्राप्तः क्षणो निर्व्यापारस्थितिर्विश्रमो येन स तथोक्तः । स्वगृहमात्मगृहम् ॥ **मिश्रविष्कम्भः** ॥

१ आत्म० २ ०तिविनयप्र०, आकृतिप्र०; इमाम०. ३ मयापि. ४ पश्य. ५ शेषन्य०. ६ पञ्चाङ्गमभि०; ०गादिकम०. ७ अग्र-पुरो-वातं. ८ अज्ज; अस्मात्प्राक्-अहं इं (अथ किम्) इति पुस्तकान्तरे; कहिं दाणिं. ९ हि पुणो. १० आआरिओ (आचार्य) ११ अज्जपरि०.

(ततः प्रविशत्येकान्तस्थ[1]परिजनो मन्त्रिणा लेखहस्तेनान्वास्यमानो राजा ।)

राजा—(अनुवाचितलेखममात्यं विलोक्य ।) वाहतक[2] किं प्रतिपद्यते वैदर्भः ।

अमात्यः--देव आत्मविनाशम् ।

राजा—संदेश[3]मिदानीं श्रोतुमिच्छामि ।

अमात्यः—इदमिदानीमनेन प्रतिलिखितम् । पूज्येनाहमादिष्टः-पितृव्यपुत्रो भवतः कुमारो माधवसेनः प्रतिश्रुतसंबन्धो ममोपान्तिकमु[4]-पगच्छन्नन्तरा त्वदीयेनान्तपालेनावस्कन्द्य गृहीतः । स त्वया मदपेक्षया सकलत्रसोदर्यो मोक्तव्य इति । तन्न[5] वो न विदितं यत्तुल्याभिजनेषु भूमिहरेषु[6] राज्ञां वृत्तिरीदृशी । अतोऽत्र मध्यस्थः पूज्यो भवितुमर्हति ।

[तल्लक्षणम्-वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः । संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः ॥ मध्येन मध्यमाभ्यां वा पात्राभ्यां संप्रयोजितः । शुद्धः स्यात्स तु संकीर्णो नीचमध्यप्रयोजितः ॥ इति ॥ **ततः प्रविशतीत्यादि** । बाहतकेति तस्यामात्यस्य नाम । वैदर्भो विदर्भराजः किं प्रतिपद्यते किं कार्यं मन्यते । संदेशं संदिष्टार्थं श्रोतुमिच्छामि । अनेन वैदर्भेणेदं प्रतिलिखितं प्रत्युत्तरत्वेनाभिलिखितम् । पूज्येन पूज्यार्हेण त्वया अग्निमित्रेणेत्यर्थः । अहं वैदर्भ आदिष्ट आज्ञप्तः । तमेवादेशं विवृणोति—**भवत इत्यादिना** । भवतस्तव पितृव्यपुत्रः पितृभ्रातृसुतो माधवसेनो नाम प्रतिश्रुतसंबन्धः प्रतिश्रुतोऽङ्गीकृतः संबन्धः कन्यका[भगिनी] प्रदानरूपो येन स तथोक्तो ममोपान्तिकं मत्समीपमुपासर्पन् [उपगच्छन्] अन्तरा मध्ये त्वदीयेन त्वत्संबन्धिना । अन्तपालेन सीमादुर्गरक्षकेणावस्कन्द्य पथि प्रहृत्य गृहीतो निरुद्धः । बन्दीकृत इत्यर्थः । स माधवसेनस्त्वया भवता मदपेक्षया मय्यपेक्षा इच्छा । स्नेह इत्यर्थः । तया हेतुना । सकलत्रसोदर्यो भार्याभगिनीसहितः । 'वोपसर्जनस्य' इति सहशब्दस्य सादेशः । मोक्तव्यो विसर्जनीयः । इति समाप्तौ । एतावता वैदर्भेणाग्निमित्रप्रेषितपत्रिकार्थानुवादः कृत इत्यनुसंधेयम् । इतः परं प्रत्युत्तररूपं वैदर्भवचनमुच्यते । **तन्न वो विदितमित्यादि** । तद्वक्ष्यमाणं वो युष्माकं विदितं न इत्यत्र काकुरनुसंधेया । तुल्याभिजनेषु समानवंशेषु । [भूमिहरेषु] ज्ञातिष्वित्यर्थः । राज्ञां वृत्तिर्वर्तनमीदृश्येवंविधेति यत्तन्ननु वो विदितमिति संबन्धः । अतोऽस्मात्कारणादत्रास्मिन्नर्थे पूज्यो भवान्मध्यस्थः समो भवितुमर्हति । अस्य माधवसेनस्य सोदर्या

---

१ स्थिति. २ ०तव. ३ लिखितं सं०, निर्देशं, निदे०. ४ उपसर्पन्: आगच्छन्. ५ तन्न वो विदितं यतुल्याभिजनेषु भूमेरिव राज्ञां प्रवृत्तिः; एतन्ननु वो विदितं...जनेषु राज्ञां; प्रवृत्तिरीदृक्; तत्र वो न विदितं. ६ भूमिधरेषु.

सोदर्या पुनरस्य ग्रहणविप्लवे विनष्टा । तदन्वेषणाय प्रयतिष्ये । अथ वा[1]-वश्यमेव माधवसेनो मया पूज्येन मोचयितव्यः श्रूयतामभिसन्धिः ।

मौर्यसचिवं[2] विमुञ्चति यदि पूज्यः संयतं मम श्यालम् ।
मोक्ता माधवसेनं ततोऽहमपि बन्धनात्सद्यः ॥ ७ ॥

राजा—(सरोषम्) कथं कार्यविनिमयेन मयि व्यवहरत्यनात्मज्ञः । वाहतक[4] प्रकृत्यमित्रः प्रतिकूलकारी च मे वैदर्भः । तद्यातव्यपक्षे स्थितस्य पूर्वसंकलिपतसमुन्मूलनाय[5] वीरसेनप्रमुखं दण्डचक्रमाज्ञापय ।

अमात्यः—यदाज्ञापयति देवः ।

राजा—अथ वा किं भवान्मन्यते ।

अमात्यः—शास्त्रदृष्टमाह देवः । कुतः[6]—

अचिराधिष्ठितराज्यः शत्रुः प्रकृतिष्वरूढमूलत्वात् ।
नवसंरोहणशिथिलस्तरुरिव सुकरः समुद्धर्तुम् ॥ ८ ॥

राजा—तेन ह्यवितथं तन्त्रकारवचनम् । इदमेव[8] निमित्तमादाय[9] समुद्योज्यतां[10] सेनापतिः[11] ।

पुनः स्वसा पुनर्ग्रहणविप्लवे [ग्रहणसंमर्दे] विनष्टा तिरोहिता । तदन्वेषणाय तस्य अन्वेषणाय गवेषणाय प्रयतिष्ये । अथ वेति पक्षान्तरे । [माध्यस्थ्यत्यागे इत्यर्थः] । मोचयितव्यस्त्याजयितव्यः । अभिसंधिर्निश्चयः । **मौर्यसचिवमित्यादि** । पूज्यो भवान्संयतं त्वया निगडितं मम श्यालं पत्नीभ्रातरं मौर्यसचिवं मौर्यसचिवनामानं विमुञ्चति यदि त्यजति चेत् ततस्तस्मात्कारणान्मया सद्यः सपदि माधवसेनो बन्धनान्निगडान्मोक्ता मुक्तो भविता । मुञ्चतेः कर्मणि लुट् ॥७॥ इति लिखितार्थसमाप्तौ । प्रकृत्यमित्रः स्वभावतः शत्रुः । अत्र प्रकृत्यमित्रत्वं च विषयानन्तरत्वादिति मन्तव्यम् ॥ **अचिराधिष्ठितेत्यादि** । [अचिरात् अधिष्ठितं प्राप्तं राज्यं येन स तथोक्तः । नवो राजेत्यर्थः प्रकृतिषु प्रजासु अरूढमूलत्वात् । रूढं मूलं यस्य स रूढमूलः । लब्धप्रजानुराग इत्यर्थः । तथा न भवतीति अरूढमूलः । तस्य भावः तत्त्वं तस्मात् । समुद्धर्तुमुन्मूलयितुं सुकरः सुलभः । क इव । नवं यत्संरोहणं तेन शिथिलः श्लथः तरुः इव । पूर्णोपमालंकारः । आर्या वृत्तम्]॥ ८ ॥ तेनारूढमूलत्वेन हेतुना तन्त्रकारवचनमर्थशास्त्रकारवचनमवितथं हि सत्यमेव । भविष्यतीति शेषः । हिशब्दोऽवधारणे । 'हि हेतावववधारणे' इत्यमरः । इदमेव वैदर्भस्य कार्यविनिमय-

---

१ अथ वा. २ आर्यस०; मौद्गल० मुञ्चान. ३ सेनस्ततो मया (टी०) ४ तव ५ पूर्व; ०ल्पितमुन्मू०. ६ एतन्नास्ति क्वचित्. ७ रोपण. ८ एव वचनम्. ९ मुपादाय १० समुद्युज्यतां. ११ सेनाधिपतिः.

अमात्यः––तथा। (इति निष्क्रान्तः।)

(परिजनश्च यथाव्यापारं राजानमभितः स्थितः।)

(प्रविश्य।)

विदूषकः––आज्ञप्तोऽस्मि तत्रभवता राज्ञा। गौतम चिन्तय तावदुपायं यथा यदृच्छादृष्टप्रतिकृतिर्मालविका प्रत्यक्षदर्शना भवतीति। मयापि तत्तथा कृतम्। यावदस्मै निवेदयामि (इति परिक्रामति।) (क)

राजा—(विदूषकं दृष्ट्वा।) अयमपरः कार्यान्तरसचिवोऽस्मानुपस्थितः।

विदूषकः––(उपसृत्य[1]।) वर्धतां भवान्। (ख)

राजा––(सशिरः कम्पम्।) इत आस्यताम्।

विदू०—(उपविष्टः।)

राजा—वयस्य कच्चिदुपेयोपायदर्शने[2] व्यापृतं ते प्रज्ञाचक्षुः।

विदूषकः––प्रयोगसिद्धिं पृच्छ। (ग)

राजा––कथमिव

विदूषकः––(कर्णे।) एवमिव। (घ)

राजा––साधु वयस्य निपुणमुपक्रान्तम्। इदानीं दुरधिगमसिद्धावप्यस्मिन्नारम्भे वयमाशंसामहे[3]। कुतः।

(क) आणत्तो म्हि तत्तहोदा रण्णा। गोदम चिन्तेहि दाव उवाअं जहा मे जदिच्छादिट्ठप्पदिकिदी मालविआ पच्चक्खंदसणा होदित्ति। मएँ[4] वि तत्तहा किदं। दावँ[5] से णिवेदेमि। (ख) वड्ढदु भवं। (ग] पँओअसिद्धिं[6] पुच्छ। (घ) एव्वमिँव।

रूपमेव वचनं वाक्यं निमित्तं हेतुमुपादायावलम्ब्य समुद्योज्यतां प्रवर्त्यताम्॥ **आज्ञप्त** इति। [यदृच्छया अकस्माद् दृष्टा प्रतिकृतिर्यस्याः।] अत्र गम्यमानं राज्ञो मालविकादर्शनौत्सुक्यमारम्भो नाम प्रथमावस्थेति मन्तव्यम्। अत्र बीजारम्भयोः समन्वयान्मुखसंधिरित्यनुसंधेयम्॥ [अन्यत्कार्यं कार्यान्तरं तत्र सचिवः] उपेयोपायदर्शने उपेयस्य साध्यस्य मालविकासाक्षाद्दर्शनस्योपायदर्शने साधनज्ञाने ते प्रज्ञाचक्षुः प्रतिभादृष्टिः किंचिदीषदपि व्यापृतं प्रसृतम्। अपिः प्रश्ने। अत्र गम्यमानस्य मालविकारूपस्य [काभिलाषस्य] बीजस्य विन्यासादुपक्षेपो नाम संध्यङ्गमुक्तं भवति। **कर्णे**-एतद्वचनं नियतश्राव्यावान्तरभेदस्य गुह्यतरार्थस्य प्रयोगे कविना प्रयुक्तम्। तथोक्तम्–

१ उपगम्य. २ कच्चिदुपाय० अपि किंचित्; उपायापेय. ३ आशास्महे. ४ मए अ. ५ जाव. ६ आः पओ० ७ इत्यावेदयति–इत्यधिकं क्वचित्.

अर्थं सप्रतिबन्धं प्रभुरधिगन्तुं सहायवानेव ।
दृश्यं तमसि न पश्यति दीपेन विना सचक्षुरपि ॥ ९ ॥

(नेपथ्ये ।)

अलमलं बहु विकत्थ्य । राज्ञः समक्षमेवावयोरधरोत्तरव्यक्तिर्भविष्यति ।

राजा—(आकर्ण्य ।) सखे त्वत्सुनीतिपादपस्य पुष्पमुद्भिन्नम् ।

विदूषकः—फलमप्यचिरेण द्रक्ष्यसि । (क)

(ततः प्रविशति कञ्चुकी ।)

कञ्चुकी—देव अमात्यो विज्ञापयति । अनुष्ठिता प्रभोराज्ञेति । एतौ पुनर्हरदत्तगणदासौ

उभावभिनयाचार्यौ परस्परजयोद्यतौ ।
त्वां द्रष्टुमिच्छतः साक्षाद्भावाविव शरीरिणौ ॥ १० ॥

राजा—प्रवेशय तौ ।

कञ्चुकी—यदाज्ञापयति देवः । (इति निष्क्रम्य पुनस्ताभ्यां सह प्रविश्य ।) इत इतो भवन्तौ ।

हरदत्तः—(राजानमवलोक्य ।) अहो दुरासदो राजमहिमा । तथा हि ।

(क) फलं वि अइरेण देक्खिस्ससि ।

' कर्णे एवमिवेत्युक्त्वा ज्ञाप्यः पश्चात्प्रसङ्गतः ।' इति ॥ **इदानीमित्यादि** । अस्मिन्नारम्भे मालविकासाक्षाद्दर्शनोद्योगे दुरधिगमसिद्धौ दुर्लभसिद्धावपि इदानीं त्वद्वचनश्रवणानन्तरं वयमाशंसामहे सिद्धिमपेक्षामहे ॥ **अर्थमित्यादि** । [प्रतिबन्धेन सहितं] सप्रतिबन्धं सप्रतिरोधमर्थं प्रयोजनमधिगन्तुं लब्धुं सहायवानेव जनः प्रभुः समर्थो भवति । [सचक्षुरपि जनः तमसि दृश्यमर्थं दीपेन विना अलब्धदीपसहायो न पश्यति ।] ' इदानीम् ' इत्यादिना ' सहायवानेव ' इत्यन्तेन तस्य बीजस्य बहुलीकरणात्परिकर इति संध्यङ्गमुक्तं भवति ॥ ९ ॥ **नेपथ्य इत्यादि** । बहु विकत्थ्यात्मश्लाघां कृत्वालम् । अलमिति प्रतिषेधे । ' अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा ' इति क्त्वाप्रत्ययः ॥ फलमप्यचिरेण द्रक्ष्यसि । अत्र बीजस्य दृढीकरणात्परिन्यासो नाम संध्यङ्गमुक्तं भवति ॥ **उभावित्यादि** । [परस्परस्य जयः तत्रोद्यतौ । उभौ अभिनयाचार्यौ] शरीरिणौ मूर्तौ साक्षाद्भावौ प्रत्यक्षभावाविव नृत्याभिनयार्थाविव ॥

---

१ सप्रतिबन्धं कार्यं २ ०मेवाधरोत्तमयोः, अधरोत्तरयोः ३ कुसुमं. ४ द्रक्ष्यते. ५ राजा. ६ जयैषिणौ. ७ मुद्यतौ. ८ विवादिनौ. ९ विलोक्य. १० एतन्नास्ति बहुषु पुस्तकेषु.

न च न परिचितो न चाप्यगम्य[1]-
श्चकितमुपैमि तथापि पार्श्वमस्य ।
सलिलनिधिरिव प्रतिक्षणं मे
भवति स एव नवो नवोऽयमक्ष्णोः ॥ ११ ॥

गणदासः—महत्खलु पुरु[2]षाकारमिदं ज्योतिः । तथा हि ।

द्वारे नियुक्तपुरुषानु[3]मतप्रवेशः
सिंहासनान्तिकचरेण सहोपसर्पन् ।
तेजोभिरस्य विनिवर्तितदृष्टिपातै-
र्वाक्याहते पुनरिव प्रतिवारितोऽस्मि ॥ १२ ॥

कञ्चुकी—एष देवः । उपसर्पतां भवन्तौ ।

उभौ—(उपेत्य ।) विजयतां देवः ।

राजा—स्वागतं भवद्भ्याम् । (परिजनं विलोक्य ।) आसने तावदत्रभवतोः ।

(उभौ परिजनोपनीतयोरासनयोरुपविष्टौ ।)

राजा—किमिदं शिष्योपदेशकाले युगपदा[4]चार्ययोरुपस्थानम् ।

गणदासः—देव श्रूयताम् । मया [5]तीर्थादभिनयविद्या शिक्षिता । द[6]त्तप्रयोगश्चास्मि । देवेन देव्या च परिगृहीतः ।

राजा—इ[7]दं जाने । ततः किम् ।

गणदासः—सोऽहममुना हरदत्तेन प्रधानपुरुषसम[8]क्षं नायं मे पादरजसा[9]पि तुल्य इत्यधिक्षिप्तः ।

स्थितौ त्वां द्रष्टुमिच्छतः ॥ १० ॥ **न च नेत्यादि** । अयं राजा परिचितः संस्तुतश्च न भवतीति न किं तु परिचित एव । [अगम्यः अनाश्रयणीयः] अरम्योऽसौम्यश्च न किं तु [गम्यः] रम्य एव । तथापि चकितं सभयं यथा भवति तथास्य पार्श्वं समीपमुपैमि । [स एवायं सलिलनिधिः समुद्र इव परिचितोपि प्रतिक्षणं अक्ष्णोः नवो नवः अपूर्वो भवति ।] ॥ ११ ॥ **द्वारे इत्यादि** । [द्वारे नियुक्तः पुरुषः दौवारिकः तेन अनुमतः प्रवेशः यस्य । सिंहासनस्यान्तिके चरतीति तेन कञ्चुकिना । विनिवर्तितः दृष्टिपातः यैः तैः] विनिवर्तितदृष्टिपातैर्विनिवारितदृष्टिप्रसरैरस्य राज्ञस्तेजोभिः पुनः प्रभावविशेषैस्तु वाक्याहते प्रतिषेधवाक्यं विना प्रतिवारित इव निरुद्ध इवास्मि ॥ १२ ॥ **तीर्थादित्यादि** । तीर्थाद्विशिष्टाद्गुरोरभिनयविद्या नाट्यविद्या शिक्षिता अभ्यस्ता । दत्तप्रयोगश्चास्मि । दत्तः शिष्येभ्यः प्रतिपादितः प्रयोगो विनियोगो येन स तथोक्तः ॥

---

१ प्यरम्यः. २ षाधिकारं. ३ भिमत. ४ आचार्याभ्यामत्र. ५ सुतीं०. ६ दृष्टप्रयोगोऽस्मि देव्या । देवेन च परिगृहीतः; दत्तप्रयोगो दत्तानुयोगश्चास्मि । ७ बाढम्. ८ क्षमयं मे ०रजसा तुल्यः; अयं न मम. ९ रजसा.

हरदत्तः—देव अयमेव मयि प्रथमं परिवादकरः । अत्रभवतः किल मम च समुद्रपल्वलयोरिवान्तरमिति । तदत्रभवानिमं मां च शास्त्रे प्रयोगे च विमृशतु । देव एव नौ विशेषज्ञः प्राश्निकः ।

विदूषकः—समर्थं प्रतिज्ञातम् । (क)

गणदासः—प्रथमः कल्पः । अवहितो देवः श्रोतुमर्हति ।

राजा—तिष्ठतु तावत् । पक्षपातमत्र देवी मन्यते । तत्तस्याः पण्डितकौशिक्या सहितायाः समक्षमेव न्याय्यो व्यवहारः ।

विदूषकः—सुष्ठु भवान्भणति । (ख)

आचार्यौ—यद्देवाय रोचते ।

राजा—मौद्गल्य अमुं प्रस्तावं निवेद्य पण्डितकौशिक्या सार्धमाहूयतां देवी ।

कञ्चुकी—यदाज्ञापयति देवः । (इति निष्क्रम्य संपरिव्राजिकया देव्या सह प्रविष्टः ।) इत इतो देवी ।

देवी—(परिव्राजिकां विलोक्य ।) भगवति हरदत्तस्य गणदासस्य च संरम्भे कथं पश्यसि । (ग)

परिव्राजिका—अलं स्वपक्षावसादशङ्कया । न परिहीयते प्रतिद्वन्द्विनो गणदासः ।

(क) समत्थं पइण्णादं । (ख) सुट्ठ भवं भणादि । (ग) भअवदि हरदत्तस्स गणदासस्स अ संरम्भे कहं पेक्खसि ।

[न केवलमागमं किं तु तस्य क्रियासंक्रान्तिमपि जानामीत्यर्थः । अधिक्षिप्तः भर्त्सितः । परिवादो निन्दा । विमृशतु तारतम्यभावेन पर्यालोचयतु । अधरोत्तरतया निश्चिनोतु इत्यर्थः ।] प्रथमः कल्पो मुख्यः पक्षः ॥ [न्यायादनपेतः] न्याय्यो युक्तः । व्यवहारो विवादः [निर्णय इति यावत् । संरम्भे संघर्षे ।] कथं पश्यसि कथं मन्यसे । अनयोः कतरस्य पराजयं विचारयसीत्यर्थः । **अलं स्वपक्षेत्यादि ।** अत्र परिव्राजिकायाः स्त्रीत्वात्प्राकृते प्राप्ते संस्कृताश्रयणं लिङ्गित्वादिति मन्तव्यम् । तथा चोक्तम्—' देवद्विजनरेन्द्राणां लिङ्गिनां संस्कृतं वचः ' इति ॥ [स्वपक्षस्य गणदासस्य अवसादः पराजय इत्यर्थः । तस्य शङ्का तया ।]

---

१ रतः. २ मस्तीति. ३ ०कञ्च. ४ तिष्ठ यावत्. ५ तदस्याः. ६ शिकीस०. ७ परि० देव्या च. ८ भवती; देवी धारिणी. ९ ०म्भं. १० पक्षपातश०. ११ प्रतिवादिनः—ना; न च पराजीयते केनचिद् गण०.

देवी—यद्यप्येवं तथापि राजपरिग्रहोऽस्य प्रधानत्वमुपहरति। (क)

परिव्राजिका—अयि राज्ञीशब्दभाजनमात्मानमपि तावच्चिन्तयतु भवती। पश्य।

अतिमात्रभासुरत्वं पुष्यति भानोः परिग्रहादनलः।
अधिगच्छति महिमानं चन्द्रोऽपि निशापरिगृहीतः॥ १३॥

विदूषकः—अपिहा अपिहा। उपस्थिता पीठमर्दिका पण्डितकौशिकीं पुरस्कृत्य देवी धारिणी। (ख)

राजा—पश्याम्येनाम्। यैषा

मङ्गलालंकृता भाति कौशिक्या यतिवेषया।
त्रयी विग्रहवत्येव सममध्यात्मविद्यया॥ १४॥

परिव्राजिका—(उपेत्य) विजयतां देवः।

राजा—भगवति अभिवादये।

परिव्राजिका—

महासारप्रसवयोः सदृशक्षमयोर्द्वयोः।
धारिणीभूतधारिण्योर्भव भर्ता शरच्छतम्॥ १५॥

(क) जइवि एव्वं तह वि राअपरिग्गहो से पहाणत्तणं उवहरइ। (ख) अविह अविह। उवट्ठिदा पीठमद्दिअं पण्डिअकोसिइं पुरोकरिअ देवी धारिणी।

राजपरिग्रहोऽस्य हरदत्तस्य प्रधानत्वमुपहरति॥ [अयीति-अत्रभवत्या राज्ञीपदभाक्त्वादुभयोस्तुल्यत्वमित्यर्थः।] **अतिमात्रेत्यादि।** [अनलः अग्निः भानोः सूर्यस्य परिग्रहात् निशि स्वस्मिन् तेजःसंक्रमात् अतिमात्रमत्यन्तं भासुरत्वं दिवातनवह्न्यपेक्षया तेजस्वितां पुष्यति धारयतीत्यर्थः। तथा च श्रुतिः-'आदित्यो वा अस्तं यन्नग्निं प्रविशति' इत्यादि। महिमानं तेजःप्रकर्षम्।] ॥ १३॥ पीठमर्दो नाम कामपुरुषार्थसहायो नायकसमीपवर्ती पुरुषः कथ्यते। तथा चोक्तम्-'पीठमर्दः समीपस्थः कार्यालोचनकोविदः' इति। अत्र विदूषकः परिहासेन परिव्राजिकायां पण्डितकौशिक्यां तद्धर्ममारोपयतीति मन्तव्यम्। **मङ्गलेत्यादि।** मङ्गलालंकृता मङ्गलं शोभनं यथा भवति तथालंकृता भूषितैषा धारिणी यतिवेषया यतेः परिव्राजकस्य वेष इव वेषः काषायादिधारणं यस्याः सा तथोक्ता तया कौशिक्या समं सार्धं भाति प्रकाशते। अत्रोपमामाह-विग्रहवत्या शरीरिण्याध्यात्मविद्यया समं त्रयीव वेदत्रयीव। विग्रहवतीत्यत्रापि विभक्तिविपरिणामेन योजनीयम्॥ १४॥ **महासारेति।** महासारप्रसवयोः। महान् सारो वरः प्रसवः संतानो ययोस्ते तयोः। [यद्वा महान् सारो बलं यस्य तथा-

---

१ ०त्मानं नानुचिन्तयति. २ भास्व०; भानुः परिग्रहादह्नः. ३ दहनः. ४ अयि भो. ५ अयि भो उव०.

धारिणी—जयत्वार्यपुत्रः । (क)

राजा—स्वागतं देव्यै । (परिव्राजिकां विलोक्य ।) भगवति क्रियतामासनपरिग्रहः ।

(सर्वे य[1]थोचितमुपविशान्ति ।)

राजा—भगवति अत्रभवतोर्हरदत्तगणदासयोः परस्प[2]रं विज्ञानसंघर्षो जातः । तदत्र भगवत्या प्राश्निकपदमध्यासितव्यम् ।

परिव्राजिका—(सस्मितम्) अलमुपालम्भेन । पत्तने विद्यमा[3]नेऽपि ग्रामे रत्नपरीक्षा[4] ।

राजा—मा[5] मैवम् । पण्डितकौशिकी खलु भगवती । पक्षपातिनावनयोरहं देवी च ।

आचार्यौ—सम्यगाह देवः । मध्यस्था भगवती गुणदोषौ[6] नः परिच्छेत्तुमर्हति ।

राजा—तेन हि प्रस्तू[7]यतां विवादः[8] ।

परिव्राजिका—देव प्रयोगप्रधानं हि नाट्यशास्त्रम् । किमत्र वाग्व्यवहारेण । क[9]थं वा देवी मन्यते ।

देवी—यदि मां पृच्छसि एतयोर्विवाद एव न मे रोचते । (ख)

(क) जेदु अज्जउत्तो । (ख) जइ मं पुच्छसि ऐदाणं विवादो एव्व ण मे रोअदि ।

भूतः प्रसवः अपत्यं यस्याः । पक्षे महता आसारेण धारासंपातेन सह प्रसवः धान्याद्युत्पत्तिर्यस्याः तयोः । सदृशक्षमयोः] सदृशी समाना क्षमा सहिष्णुत्वं ययोस्ते तयोः । [शरदां शतं शरच्छतम् । 'कालाध्वनोरत्यन्तसंयोगे' इति द्वितीया । श्लेषालंकारः । आशीरलंकारश्च] ॥ १५ ॥ [आर्यपुत्रः–' आर्यपुत्रेति संबोध्यः पतिः पत्नीजनेन वा' इति भरतः । संघर्षः स्पर्धा अस्त्यनयोस्तौ संघर्षिणौ । अत इनिठनौ इति मत्वर्थे इनिः । विज्ञाने शिल्पज्ञाने संघर्षिणौ तयोः । 'विज्ञानं शिल्पशास्त्रयोः' इत्यमरः । प्राश्निकपदं सभ्यस्थानम् । उपालम्भेन परिहासेन । ग्रामे अनभिज्ञजनवासे इत्यर्थः । पण्डा सूक्ष्मा बुद्धिः संजाता अस्याः असौ पण्डिता । पण्डिता चासौ कौशिकी च । मध्यस्था समानोभयपक्षा । अपक्षपातिनीति यावत् । प्रयोगप्रधानं प्रयोगः अभिनयः प्रधानः पटुत्वनिश्चये यत्र तत् । वाग्व्यवहारेण विवादेन । नाट्यशास्त्रप्रावीण्यं केव-

---

१ यथार्हमु० २ परस्परेण, ०रेण ज्ञान०, परस्परवि०; विज्ञानसंघर्षिणोर्भगवत्या; तदत्रभवत्या. ३ साति. ४ ०क्षका:. ५ नैतदेवम्. ६ नौ गुणदोषतः. ७ प्रक्रियताम्. ८ विवादवस्तु. ९ राजा–कथं वेत्या०

गणदासः—देवी न मां समानविद्यतः परिभवनीयमवगन्तुमर्हसि।

विदूषकः—भवति पश्याम उरभ्रसंपातम्। किं मुधा वेतनदानेन। (क)

देवी—ननु कलहप्रियोऽसि। (ख)

विदूषकः—मैवम्। अन्योन्यकलहितयोर्मत्तहस्तिनोरेकतरस्मिन्ननिर्जिते कुत उपशमः। (ग)

राजा—ननु स्वाङ्गसौष्ठवाभिनयमुभयोर्दृष्टवती भगवती।

परिव्राजिका—अथ किम्।

राजा—तदिदानीमतः परं किमाभ्यां प्रत्याययितव्यम्।

परिव्राजिका—तदेव वक्तुकामास्मि।

शिष्टा क्रिया कस्यचिदात्मसंस्था
संक्रान्तिरन्यस्य विशेषयुक्ता।
यस्योभयं साधु स शिक्षकाणां
धुरि प्रतिष्ठापयितव्य एव॥ १६॥

(क) भोदि पेक्खामो उरब्भसंवादं। किं मुहा वेअणदाणेण। (ख) णं कलहप्पिओसि। (ग) माँ एव्वं। अण्णोण्णकलहिदाणं मत्तहत्थीणं एक्कदरस्सिं अणिज्जिदे कुदो उवसमो।

लेन विवादेन निर्णेतुं न शक्यते इत्यर्थः। समाना विद्या यस्य स समानविद्यः तस्मात्। हरदत्तादित्यर्थः। परिभवनीयं पराभवक्षमम्। उरभ्रसंपातं मेषयुद्धमिति नर्मोक्तिः। 'मेढ्रोरभ्रोरणोर्णायुर्मेषवृष्णय एडके' इत्यमरः। उदरंभरिसंवादमिति पाठे उदरम्भर्योः स्वोदरभरणपरयोः संवादम्। कलहितयोराचरितकलहयोः। सुष्ठु इत्यस्य भावः सौष्ठवं सौष्ठवेनाभिनयः। स्वांगे सौष्ठवाभिनयः तम्। प्रत्याययितव्यं प्रतीतिविषयीकर्तव्यम्।]

शिष्टेत्यादि। कस्यचित्कस्यापि पुरुषस्य क्रिया शिक्षा। विद्याभ्यास इत्यर्थः। आत्मसंस्था आत्मनिष्ठा सती [शिष्टा प्रकृष्टा] श्लिष्टा संगता। रम्या भवतीत्यर्थः। अन्यस्य पुरुषस्य संक्रान्तिः शिष्येषु क्रियासंक्रमणम्। संक्रान्तिशब्दोऽत्रान्तर्भावितण्यर्थः। विशेषयुक्ता अतिशयवती। यस्य पुरुषस्योभयं आत्मसिद्धिः परसंक्रमणं च साधु रम्यं स

---

१ विद्यातः, विद्यया; अभिनयविद्यातः परि० मन्तु०; न मां देवी...मनुमन्तुमर्हति; समानविद्यतया परिहीनमव०. २ सौष्ठवं, ०वातिशयम्. ३ अतः किम्; किमतः परं द्वाभ्याम्. ४ श्लिष्टा. ५ देवि. ६ उअरंभरिसं०. ७ मा चण्डि, मा दाव. ८ कलहप्पिआणं

विदूषकः—श्रुतमार्याभ्यां भगवत्या वचनम् । एष पिण्डितार्थ उपदेशदर्शनेन निर्णय इति । (क)

हरदत्तः—परमुचितं नः ।

गणदासः—देवि एवं स्थितम् ।

देवी—यदा पुनर्मन्दमेधा शिष्योपदेशं मलिनयति तदाचार्यस्य दोषो नु । (ख)

राजा—देवि एवमापद्यते । विनेतुरद्रव्यपरिग्रहोऽपि बुद्धिलाघवं प्रकाशयति ।

देवी—(स्वगतम् ।) कथमिदानीम् । अलमार्यपुत्रस्योत्साहकारणं मनोरथं पूरयित्वा । (गणदासं विलोक्य । प्रकाशम् ।) विरम निरर्थकादारम्भात् । (ग)

विदूषकः—सुष्ठु भवती भणति । भो गणदास संगीतापदेशेन सरस्वत्युपायनमोदकान्खादतः किं ते सुलभनिग्रहेण विवादेन । (घ)

(क) सुदं अज्जेहिं भअवदीए वअणं । एसो पिण्डितत्थो उवदेसदंसणेण णिण्णओत्ति । (ख) जदा उण मन्दमेधा सिस्सा उवदेसं मलिणेदि तदा आअरिअस्स दोसो णु । (ग) कहं दाणीं । अलं अज्जउत्तस्स ऊसाहकारणं मणोरहं पूरिअ । विरम णिरत्थआदो आरम्भादो । (घ) सुट्ठु भोदी भणादि । भो गणदास संगीदावदेसेण सरस्सईउवाअणमोदआणं खादमाणस्स किं ते सुलहणिग्गहेण विवादेण ।

पुरुष एव शिक्षकाणामुपदेशकानां धुर्यःअग्रे प्रतिष्ठापयितव्यः प्रतिष्ठां प्रापयितव्यः । [एवमाभ्यामात्मसंस्था क्रिया शिष्यसंक्रान्तिश्च प्रत्याययितव्ये । तत्र आत्मसंस्था क्रिया प्रतीतपूर्वैव । अतः शिष्यसंक्रान्तिरेव केवलाधुना प्रत्याययितव्येति स्थितमिति तात्पर्यार्थः । उपजातिश्छंदः] ॥१६॥ एव पिण्डितार्थः निष्कर्षः । उपदेशदर्शनेन इति । अत्र मालविकादर्शनसंदेहनिर्णयाद्युक्तिर्नाम संध्यङ्गमुक्तं भवति ॥ **यदेति** । [मन्दा मेधा यस्याः सा । 'धीर्धारणावती मेधा' इत्यमरः । मलिनयति दूषयति ।] नुः प्रश्ने । [दोष इत्यर्थः] । आपद्यते प्रकृते प्राप्नोति । आपठ्यते इति पाठे जनैरुच्यते इत्यर्थः । अप्रशस्तं द्रव्यमद्रव्यम् । कुशिष्येति यावत् । तस्य परिग्रहः शिक्षणीयतया स्वीकारः । लाघवं मान्द्यम् । ॰परिग्रह एव इति पाठे बुद्धेः लाघवं सूक्ष्मत्वं पटीयस्त्वमित्यर्थः । पूरयित्वा । अलंखल्वोः इति क्त्वा । विरम । जुगुप्साविराम-इत्यादिना अपादानत्वम् । सुलभ॰—मुखनिग्रहेणेति पाठे मुखस्य निग्रहः खादनप्रतिबंधो यस्मात्तेन इत्यर्थः ।

१ परमभिमतं, परमरुचितम्. २ देव…स्थितमेव. ३ उपपद्यते, आपठ्यते. ४ ग्रह एव, गण॰—विनेतुः इ॰.५ ॰तीति. ६ (गणदासं विलोक्य) (जनान्तिकम्) अलं ७ ॰णादो, ॰णे अ ८ अमेहाविणी. ९ मलिणोति. १० ॰देसपदं लम्भिअ (लब्ध्वा) सरस्सइए, ॰देसं आराहिअ. ११ सु-मु-ह (सु-मु-ख).

गणदासः—सत्यमयमेवार्थो देवीवचनस्य[1]। श्रूयतामवसरप्राप्तमिदम्[2]।

लब्धास्पदोऽस्मीति विवादभीरो-
स्तितिक्षमाणस्य परेण निन्दाम्।
यस्यागमः केवलजीविकायै[3]
तं ज्ञानपण्यं वणिजं वदन्ति ॥ १७ ॥

देवी—अचिरोपनीता ते शिष्या। तदपरिनिष्ठितस्योपदेशस्या-न्याय्यं प्रकाशनम्। (क)

गणदासः—अत एव मे निर्बन्धः।

देवी—तेन हि द्वावप्युपदेशं भगवत्यै दर्शयतम्। (ख)

परिव्राजिका—देवि नैतन्न्याय्यम्। सर्वज्ञस्याप्येकाकिनो निर्णया-भ्युपगमो दोषाय।

देवी—(आत्मगतम्[4]।) मूढे किं मां जाग्रतीमपि सुप्तामिव करोषि।(ग)

(इति सासूयं परावर्तते)

(राजा देवीं परिव्राजिकायै दर्शयति।)

(क) अइरोवणीदा[5] दे सिस्सा। ता अवरिणिट्ठिदस्स उवदेसस्स[6] अण्णअं पआसणं। (ख) तेण हि दुवेवि उवदेसं भअवदीए दंसेध। (ग) मूढे[7] किं मं जागत्ति वि सुत्तं विअ करेसि।

अत्र निन्दाया गम्यमानत्वात् व्याजस्तुतिरलंकारः।] लब्धास्पदोऽस्मीत्यादि। [लब्धमास्पदं प्रतिष्ठा येन स लब्धास्पदः तथाभूतोऽस्मीति कृत्वा विवादात् भीरुः भयशीलः तस्य। भियः क्रुक्लुकनौ इति क्रुः। विवादे कदाचित्पराभूतिः स्यादिति शङ्कया भीतस्य। तथा च परेण कृतां निन्दां तितिक्षमाणस्य सहमानस्य। तिजेः क्षमायामिति सनि लटः शानच्। यस्य शिक्षकस्य आगमः शास्त्रज्ञानं केवला जीविका तस्यै वृत्यर्थमेव केवलं भवति। तं ज्ञानमेव पण्यं विक्रेयं वस्तु यस्य तं ज्ञानपण्यं ज्ञानविक्रयकारिणं वणिजं वदन्ति। पण्डिता इति शेषः। अतः यशःकामेन विवादान्न भेतव्यं इति भावः। अत्र वणिजः पण्यस्य चारोपणात् साङ्गं समस्त-वस्तुविषयं रूपकमलङ्कारः। उपजातिश्छंदः।] ॥ १७ ॥ अचिरोपनीता अचिरेण उपनीता उपदेशग्रहणार्थं समीपं प्रापिता। न दीर्घकालं गृहीतोपदेशेत्यर्थः। अपरि-निष्ठितस्य अचिरोपनीतत्वेन अलब्धस्थैर्यस्य। अन्याय्यमयोग्यम्। अत एवेति। अचिरोपनीतापि कां शिक्षां ग्राहितेति स्वमुपदेशदानकौशलं दर्शयितुकामस्येत्यर्थः। निर्बन्ध आग्रहः। दोषाय दोषास्पदं स्यादित्यर्थः। मूढे अज्ञातमत्स्वभावे। जाग्रतीं मालविकाया राज्ञो दृष्टेर्निगूहने सावधानां दक्षामिति यावत्। सुप्तामनवहितां

---

१ वाक्यस्य. २ इदानीम् ३ ०कैव. ४ जनान्तिकम्. ५ ०णीदाए सिस्साए उण पडिट्ठि तस्स (नीतायां शिष्यायां पुनः प्रतिष्ठितस्य). ६ ०सस्स पुण अणज्जं (अनार्यं) आवे-दणं. ७ मुद्धे (मुग्धे),-मूढे-परिव्वाजिए.

परिव्राजिका—

अनिमित्तमिन्दुवदने किमत्रभवतः पराङ्मुखी भवसि ।
प्रभवन्त्योऽपि हि भर्तृषु कारणकोपाः कुटुम्बिन्यः ॥ १८ ॥

विदूषकः—ननु सकारणमेव । आत्मनः पक्षो रक्षितव्य इति । (गणदासं विलोक्य ।) दिष्ट्या कोपव्याजेन देव्या परित्रातो भवान् । सुशिक्षितोऽपि सर्व उपदेशदर्शने न निपुणो भवति । (क)

गणदासः—देवि श्रूयताम् । एवं जनो गृह्णाति । तदिदानीम्

विवादे दर्शयिष्यन्तं क्रियासंक्रान्तिमात्मनः ।
यदि मां नानुजानासि परित्यक्तोऽस्म्यहं त्वया ॥ १९ ॥

(आसनादुत्तिष्ठति ।)

देवी—(स्वगतम् ।) का गतिः । (प्रकाशम् ।) प्रभवत्याचार्यः शिष्यजनस्य । (ख)

गणदासः—चिरमपदे शङ्कितोऽस्मि । (राजानमवलोक्य ।) अनुज्ञातं देव्या । तदाज्ञापयतु देवः कस्मिन्नभिनेयवस्तुन्युपदेशं दर्शयिष्यामि ।

(क) णं सकारणं एव्व । अत्तणो पक्खो रक्खिदव्वोत्ति । दिट्ठिआ कोवव्वाजेण देवीए परित्तादो भवं । सुसिक्खिदो वि सव्वो उवदेसदंसणे ण णिउणो होदि (ख) का गई । पहवदि आआरिओ सिस्सजणस्स ।

प्रमत्तामित्यर्थः । सासूयमसूयया सहितं यथा स्यात्तथा ॥] **अनिमित्तमित्यादि ।** [हे इन्दुवदने चन्द्रमुखि । इन्दुरिव वदनं यस्याः सा इन्दुवदना । तत्सम्बुद्धिः । अनिमित्तं न विद्यते निमित्तं यस्मिन्कर्मणि तद्यथा तथा । कारणं विना किं अत्रभवत पूज्यात् राज्ञः पराङ्मुखी विमुखी भवसि । तव अकारणकोपो न युक्त इति भावः । हि यतः कुटुम्बिन्यः कुलस्त्रियः भर्तृषु प्रभवन्त्यः प्रभुत्ववत्योपि कारणेन कोपो यासां ताः कारणकोपा भवन्ति । अकारणं च कुप्यन्तीत्यर्थः । अत्र कुलीनस्त्रीणां सकारणः कोप इति वैधर्म्येण सामान्येन राज्ञीकोपानुचितत्वं समर्थ्यते इति वैधर्म्येण सामान्येन विशेषसमर्थनरूपः अर्थान्तरन्यासोऽलंकारः । आर्यावृत्तम् ।] ॥ १८ ॥ [दिष्ट्येति गणदासमुत्तेजयितुं विदूषकस्योक्तिः ।] अत्र देवीकोपेन वस्तुविच्छेदे प्राप्ते विदूषककृतं प्रोत्साहनमुत्तराङ्कोपयोगित्वेनाविच्छेदकारणत्वाद्बिन्दुरित्यनुसन्धेयम् । [एवं जनो गृह्णाति यथा विदूषकेणोक्तं तथा अवधारयति । उपदेशदर्शनानैपुण्यं मयि आरोपयेदित्यर्थः ।] **विवादे इत्यादि ।** [विवादे उपस्थिते वादे आत्मनः क्रियायाः संक्रान्तिं शिष्यजने उपदेशसंक्रमणशक्तिं दर्शयिष्यन्तं दर्शयितुमिच्छन्तम् । अनुजानासि अनुमन्यसे । परित्यक्तोस्मीति मन्ये ॥१९॥ अपदे अस्थाने । देवी कदाचित् शिष्याशिक्षादर्शनान्मां

---

१ दर्शयिष्यामि. २ ०दुत्थातुमिच्छति. ३ अपदेश–शे. ४ कतमस्मि०···तमास्मिन्नुपदेशवस्तुनि प्रयोगं. ५ अभिनय. ६ कारणदो. ७ उपदेसे, ०सणेण, ०सेण णिण्हादो (उपदेशेन निष्णातः). ८ पहवादि क्खु अज्जो.

राजा—यदादिशति भगवती ।

परिव्राजिका—किमपि देव्या मनसि वर्तते । तच्छ[1]ङ्कितास्मि ।

देवी—भण विस्रब्धम् । ननु प्रभविष्याम्यात्मनः परिजनस्य । (क)

राजा—मम चेति ब्रूहि ।

देवी—भगवति भणेदानीम् । (ख)

परिव्राजिका—देवे[2] चतुष्पदो[3]द्भवं चलितं दुष्प्रयोज्यमुदाहरन्ति । तत्रैकार्थसंश्र[4]यमुभयोः प्रयोगं पश्यामः । तावता ज्ञायत एवात्रभवतो-रुपदेश[5]तारतम्यम् ।

आचार्यौ—यदाज्ञापयति भगवती ।

विदूषकः—तेन हि द्वावपि वर्गौ प्रेक्षागृहे संगीतरचनां कृत्वात्र-भवतो दूतं प्रेषयतम् । अथ वा मृदङ्गशब्द एव न उत्थापयिष्यति । (ग)

हरदत्तः—तथा । (इत्युत्तिष्ठति ।)

(गणदासो देवीमव[6]लोकयति ।)

देवी—(गणदासं विलोक्य ।) विजयी भव । न खलु विजयप्रत्य-र्थिन्यहमाचार्यस्य । (उ[7]भौ प्रस्थितौ ।) (घ)

परिव्राजिका—इतस्तावतादाचार्यौ ।

उभौ—(परिवृत्य ।) इमौ स्वः ।

परिव्राजिका—निर्णयाधिकारे ब्रवीमि । सर्वाङ्गसौष्ठवाभिव्यक्तये विर[9]लनेपथ्ययोः पात्रयोः प्रवेशोऽस्तु ।

(क) भण विस्सद्धं । [10]णं पहविस्सं अत्तणो परिअणस्स । (ख) भअवदि भण दाणिम् । (ग) तेण हि दुवेवि वग्गा पेक्खाघरे संगीदरअणं करिअ अत्तभवदो दूदं पेसे[11]अह । अह वा मुदङ्गसद्दो एव्व णो उत्थावइस्सदि । (घ) विअई होहि । ण हु विअअपच्चात्थिणी अहं आअरिअस्स ।

निवारयेदिति अकारणमेव जातशङ्कोस्मीत्यर्थः । किमपि देव्या इति कपटमूल एष प्रयोगो मालविकादर्शनार्थ इति । चतुर्भ्यः पदेभ्य उद्भवो यस्य तत् । चतुष्पदोत्थ-मिति पाठे चतुर्भ्यः पदेभ्य उत्तिष्ठतीति तथोक्तम् । दुःखेन प्रयोजनयितुं शक्यं दुष्प्रयोज्यम् । उदाहरन्ति नाट्यवेदिन इति शेषः । एकः अभिन्नः अर्थः अभिधेयं वस्तु संश्रय आश्रयो यस्य तथाभूतम् । तरतमयोर्भावः तारतम्यं न्यूनाधिकभावः । उपदेशान्तरमिति पाठे उपदेशयोरन्तरं वैशिष्ट्यमित्यर्थः । प्रेक्षागृहं संगीतशाला । निर्णयाधिकारे निर्णयविषयकोऽधिकारस्तमलम्ब्येत्यर्थः ।] **सर्वाङ्गेत्यादि** । [सर्वेषाम-

---

१ ततः श०. २ देवेति नास्ति क्वचित्. ३ शर्मिष्ठायाः कृतिं चतुष्पदोत्थं छलिकं-तं ४ संगतं. ५ ०देशान्तरम्. ६ विलो०, धारिणीभत्र०. ७ आचार्यौ. ८ नास्त्येतत्क्वचित्. ९ विगत. १० पहवादि पहू (प्रभवति प्रभुः). ११ पेसअन्दु (प्रेषयताम्).

उभौ—नेदमप्यावयोरुपदेश्यम् । (इति निष्क्रान्तौ ।)

देवी—(राजानमवलोक्य ।) यदि राजकार्येष्वपीदृश्युपायनिपुणतार्यपुत्रस्य ततः शोभनं भवेत् । (क)

राजा—

अलमन्यथा गृहीत्वा न खलु मनस्विनि मया प्रयुक्तमिदम् ।
प्रायः समानविद्याः परस्परयशःपुरोभागाः ॥ २० ॥

(नेपथ्ये मृदङ्गशब्दः । सर्वे कर्णं ददति ।)

परिव्राजिका—हन्त । प्रवृत्तं संगीतकम् । तथा ह्येषा

जीमूतस्तनितविशङ्किभिर्मयूरैरुद्ग्रीवैरनुरसितस्य पुष्करस्य ।
निर्ह्रादिन्युपहितमध्यमस्वरोत्था मायूरी मदयति मार्जना मनांसि २१

राजा—देवि सामाजिका भवामः ।

देवी—(स्वगतम् ।) अहो अविनय आर्यपुत्रस्य । (ख)

(सर्वे उत्तिष्ठन्ति ।)

विदूषकः— (अपवार्य ।) भोः धीरं गच्छ । मा खल्वत्रभवती धारिणी विसंवादयिष्यति । (ग)

(क) जइ राअँकज्जेसु वि ईरिसी उवाअणिउणदा अज्जउत्तस्स तदो सोहणं भवे । (ख) अहो अविणओ अज्जउत्तस्स (ग) भो धीरं गच्छं । मा क्खु अत्तंभोदी धारिणी विसंवादइस्सदि ।

ङ्गानां नाट्यस्य शरीरस्य च अभिव्यक्तये । मालविकायां राज्ञोनुरागस्य वृद्ध्यर्थं तस्याः सर्वाङ्गावलोकनस्यावश्यकत्वादिति गूढाभिसन्धिः ।] अत्र गुणवत्त्वस्य गम्यमानत्वादिलोभनं नाम सन्ध्यङ्गमुक्तं भवति । [उपायाः सामादयः पक्षे स्वाभिलषितासिद्धिसाधनानि ।] अत्र गूढार्थोद्भेदनादुद्भेदो नाम संध्यङ्गमुक्तं भवति । **अलमन्यथेति** । [हे मनस्विनि प्रशस्तं मनः अस्या अस्तीति मनस्विनी तत्सम्बुद्धिः । प्रशस्तमनस्के देवि । अन्यथा गृहीत्वा इममर्थमन्यथा संभाव्य अलम् । तदेव स्पष्टयति-न खल्वित्यादिना । इदं विवादकरणम् । यतः सामानविद्याः विद्वांसः परस्परस्य यशासि पुरोभागाः दोषैकदर्शिनः । अन्योन्ययशोदूषणे उद्युक्ता भवन्तीत्यर्थः । अर्थान्तरन्यासोलंकारः । आर्या छंदः ।] ॥ २० ॥ **जीमूतस्तनितेत्यादि** । जीमूतस्तनितविशङ्किभिर्जीमूतस्य स्तनितं गर्जितं विशङ्कन्त इति तथोक्तास्तैरुद्ग्रीवैरुत्कण्ठैर्मयूरैः शिखण्डिभिरनुरसितस्यानुध्वनितस्य पुष्करस्य वाद्यभाण्डमुखस्य मायूरी मयूरप्रिया मार्जना मनांसि मदयति हर्षयति । कीदृशी

---

१ ०मावयोः.२ ध्वनिः.३ संगीतम्.४ अनुगमितस्य. ५ निर्णादिन्यु०;उपचित. ६ तस्याः सामायिकाः, सामवायिकाः, सह्यवादिकाः. ७ कज्जेसु एवं णिउ०. ८ गच्छम्ह. ९ तत्त०

राजा—

धैर्यावलम्बिनमपि त्वरयति मां मुरजवाद्यनादोऽयम् ।
अवतरतः सिद्धिपथं शब्दः स्वमनोरथस्येव ॥ २१ ॥

(इति निष्क्रान्ताः सर्वे ।)

इति प्रथमोऽङ्कः ।

मार्जना । उपहितमध्यमस्वरोत्था उपहितो योजितो मध्यमस्वरो मध्यमसंज्ञकस्वरस्तस्मादुत्तिष्ठत्युदेतीति तथोक्ता । [उपचितेति पाठे उपचितेन पूर्णतां प्राप्तेनेत्यर्थः ।] निर्ह्रादिन्यतिशयनिनादा । मार्जना नाम पुष्करवाद्यनामविशेषः । तथोक्तं भारतीये– ' षोडशाक्षरसंपन्नं चतुर्मार्गं तथैव च ॥ द्विलेपनं षट्करणं त्रियति त्रिलयं तथा । त्रिगतं त्रिप्रचारं च त्रिसंयोगं त्रिपाणिकम् ॥ दशार्धपाणिप्रहतं त्रिप्रहारं त्रिमार्जनम् । एभिरङ्गैस्तु संपन्नं वाद्यं पुष्करजं भवेत् ॥ ' तथा च ' मायूरी चार्धमायूरी तथा कार्मारवीति च । तिस्रस्तु मार्जना ज्ञेयाः पुष्करेषु स्वराश्रयाः । गान्धारो वामके कार्यः षड्जो दक्षिणपुष्करे । मध्यमश्चोर्ध्वगः कार्यो मायूर्यास्तु स्वरास्त्वमी ॥ वामके पुष्करे षड्ज ऋषभो दक्षिणे तथा । धैवतश्चोर्ध्वगोत्रार्धमायूर्यां निर्दिशेद् बुधः ॥ ऋषभः पुष्करे वामे षड्जो दक्षिणपुष्करे । पञ्चमश्चोर्ध्वगः कार्यः कार्माख्याः स्वरा अमी ॥ ' इति । [प्रहर्षिणी वृत्तम् ।] ॥ २१ ॥ [सामाजिकाः समाजं समवयन्तीति सभ्याः । सामवायिका इति पाठे स एवार्थः । सामायिका इति पाठे समयः प्राप्त एषां समयमनुवर्तन्ते इति वा । अविनयो धाष्टर्यं मालविकादर्शनाभिलाषप्रकट नादिति भावः । धीरं स्तिमितगत्या । विसंवादयिष्यति विप्रतिपत्स्यते । तव मालविकागतं मनोरथमूहित्वा सकलमेव तन्त्रमाकुलयिष्यतीत्यर्थः ।] **धैर्येत्यादि** । अयं मुरजवाद्यस्य [नादः शब्दः] रागः[1] रञ्जकत्वं धैर्यावलम्बिनमपि [मया धीरमकृतत्वरेण गन्तव्यमिति कृतनिश्चयमपि] मां त्वरयति संभ्रमयति । [सिद्धेः इष्टलाभस्य पन्थाः सिद्धिपथः तं] सिद्धिपथं सिद्धिमार्गमवतरतः प्राप्नुवतः स्वमनोरथस्यात्मवाञ्छितस्य शब्द इव ध्वनिरिव । [अत्रोत्तरार्धे उत्प्रेक्षालंकारः । तस्य मनसि रथत्वारोपाद्रूपकमङ्गम् । एवं तयोरङ्गाङ्गिभावेन संकरः ॥ आर्या छंदः ।] ॥ २२ ॥ अत्र बीजस्य पुनरावर्तनात्समाधानं नाम संध्यङ्गमुक्तं भवति । अत्रैव सुखागमस्य गम्यमानत्वात्प्राप्तिर्नाम संध्यङ्गमुक्तं भवति । अत्रोपक्षेपादिषु संध्यङ्गेषु कतिचिदेव कविनोक्तानि नेतराणि तथापि न दोषः । ' न्यूनमप्यत्र यैः कैश्चिदङ्गैर्नाट्यं न दुष्यति । यद्युपात्तेषु संपत्तिराराधयाति तद्विदः ॥ ' इति वचनात् । अत्र नृत्यदर्शननिश्चयान्ते प्रथमाङ्कार्थे समाप्तेऽपि तमसमाप्यैवोत्तराङ्कादौ विष्कम्भादौ प्रतिपाद्यायाः संगीतरचनाया अत्रैव निपातनादङ्कावतरणं नामार्थोपक्षेपक उक्तो भवति । यथोक्तम्—' अङ्कावतारस्त्वङ्कान्ते पात्रेणाङ्कस्य सूचनात् ' इति ॥

इति श्रीकाटयवेमभूपविरचिते कुमारगिरिराजीये मालविकाग्निमित्रव्याख्याने प्रथमोऽङ्कः ॥

---

१ रागः.

द्वितीयोऽङ्कः ।

(ततः प्रविशति संगीतरचनायां कृतायामासनस्थः सवयस्यो राजा धारिणी परिव्राजिका विभवतश्च परिवारः ।)

राजा—भगवति अत्रभवतोराचार्ययोः कतरस्य प्रथममुपदेशं द्रक्ष्यामः ।

परिव्राजिका—ननु समानेऽपि ज्ञानवृद्धभावे वयोवृद्धत्वाद्गणदासः पुरस्कारमर्हति ।

राजा—तेन हि मौद्गल्य एवमत्रभवतोरावेद्य स्वनियोगमशून्यं कुरु ।

कञ्चुकी—यदाज्ञापयति देवः । (इति निष्क्रान्तः ।)

(प्रविश्य ।)

गणदासः—देव शर्मिष्ठायाः कृतिर्लयमध्या चतुष्पदा । तस्याश्चतुर्थवस्तुनः प्रयोगमेकमनाः श्रोतुमर्हति देवः ।

राजा—आचार्यबहुमानादवहितोऽस्मि ।

(निष्क्रान्तो गणदासः ।)

राजा—(जनान्तिकम् ।) वयस्य ।

कविरिदानीमङ्कान्तरं प्रस्तौति—ततः प्रविशतीत्यादि । 'भगवति अत्रभवतोः' इत्यादिना 'गणदासः पुरस्कारमर्हति' इत्यन्तेन प्रतीयमानं राज्ञ उपायतो मालविकादर्शनप्रवर्तनं प्रयत्नो नाम द्वितीयावस्थितिरिति मन्तव्यम् । अत्र बिन्दुप्रयत्नयोः समन्वयात्प्रतिमुखसंधिरित्यनुसंधेयम् ॥ [ज्ञानेन वृद्धः ज्ञानवृद्धः तस्य भावः तस्मिन् । उभयोस्तुल्यज्ञानत्वेपीत्यर्थः । पुरस्कारं उपदेशदर्शने अग्रमानम् ।] देव शर्मिष्ठाया इत्यादि । शर्मिष्ठा नाम वृषपर्वणो राक्षसराजस्य दुहिता [ययातिभार्या]। तस्याः कृतिः काव्यम् । लयमध्या लयेन तालकालेन मध्या मध्यमानयुक्ता । चतुष्पदा चत्वारि पदानि खण्डानि यस्याः सा तथोक्ता । तस्याः कृतेः संबन्धिनश्चतुर्थवस्तुनश्चतुर्थस्य तुर्यस्य वस्तुनः प्रबन्धस्य प्रयोगमभिनयं [एकस्मिन् मनो यस्य सः] एकमना अवहितः सन् श्रोतुमर्हति । अत्र शृङ्गारस्य प्रतिपाद्यमानत्वाल्लयमध्येत्युक्तम् । तथा चोक्तं भारतीये—'शृङ्गारहास्ययोर्मध्यलयः । करुणे विलम्बितः । वीररौद्राद्भुतबीभत्सभयानकेषु द्रुतः ॥' [बहुमानात् वस्तुबहुमानाद् आचार्यबहुमानाद्वा । यद्वा आचार्यबहुमानादित्येकं पदम् । जनान्तिकम् जनस्याभीष्टस्य अन्तिकं समीपे । यदभीष्टजन एव शृणुयादिति कृत्वा तत्समीप उच्यते तत् । तदुक्तं—'त्रिपताककरेणान्यानपवार्यान्तरा कथाम् । अन्योन्यामन्त्रणं यत्स्याज्जनान्ते तज्जनान्तिकम् ॥' इति ।] **नेपथ्यपरि-**

---

१ नायामासनस्थः. २ वयोधिकत्वात्. ३ एवमेव. ४ ०द्यापि. ५ तस्यास्तु च्छलिकप्र०

नेपथ्यपरिगतायाश्चक्षुर्दर्शनसमुत्सुकं तस्याः ।
संहर्तुमधीरतया व्यवसितमिव मे तिरस्करिणीम् ॥ १ ॥

विदूषकः—(अपवार्य) भो उपस्थितं नयनमधु संनिहितमक्षिकं च । तदप्रमत्त इदानीं प्रेक्षस्व । (क)

(ततः प्रविशत्याचार्यप्रत्यवेक्ष्यमाणाङ्गसौष्ठवा मालविका ।)

विदूषकः—(जनान्तिकम् ।) प्रेक्षतां भवान् । न खल्वस्याः प्रतिच्छन्दात्परिहीयते मधुरता । (ख)

राजा—(जनान्तिकम् ।) वयस्य ।

चित्रगतायामस्यां कान्तिविसंवादशङ्कि मे हृदयम् ।
संप्रति शिथिलसमाधिं मन्ये येनेयमालिखिता ॥ २ ॥

(क) भो उवट्ठिदं णअणमहु संणिहिदमक्खिअं अ । ता अप्पमत्तो दाणिं पेक्ख । (ख) पेक्खदु भवं । ण खु से पडिच्छन्दादो परिहीअदि महुरदा ।

गताया इति । नेपथ्यपरिगताया जवनिकान्तरस्थितायास्तस्या मालविकाया दर्शनसमुत्सुकमवलोकनोत्कण्ठितं मे चक्षुरधीरतया तरलतया [अकालक्षमतयेत्यर्थः] तिरस्करिणीं जवनिकां संहर्तुमपनेतुं व्यवसितमिवोद्युक्तमिव । [उत्प्रेक्षालंकारः । आर्या छंदः ।] ॥ १ ॥ अत्रेष्टार्थविषयेच्छाया गम्यमानत्वाद्विलासो नाम संध्यङ्गमुक्तं भवति । उपस्थितं [नयनयोः मधु मालविकारूपं] नयनमधु [संनिहिता मक्षिका धारिणीरूपा यस्य तत्] संनिहितमक्षिकं च । **ततः प्रविशतीत्यादि ।** आचार्यावेक्ष्यमाणाङ्गसौष्ठवा आचार्येण गणदासेनावेक्ष्यमाणमङ्गानां सौष्ठवं यस्याः सा तथोक्ता । सौष्ठवं नामाङ्गानां शोभनावस्था ॥ यथोक्तम्—' अनुच्चनीचचलतामङ्गानां समपादताम् । कटिकूर्परशीर्षांसकण्ठानां समरूपताम् ॥ रम्यां प्रतीकविश्रान्तिमुरसश्च समुन्नतिम् । अभ्यासोपहितामाहुः सौष्ठवं नृत्यवेदिनः ॥' इति । प्रतिच्छन्दात् [चित्रगतरूपादित्यर्थः] परिहीयते [न्यूना भवति] मधुरता ॥ अत्रापवार्येत्येतन्नियतश्राव्यार्थभेदस्यापवारितस्य विवक्षितत्वे कविना प्राक्प्रयुक्तमिति मन्तव्यम् । यथोक्तं वसन्तराजीये—' अर्थस्त्वेकेन विज्ञेयो नियतश्राव्य इष्यते । द्विविधः स परिज्ञेयो जनान्तश्चापवारितः ॥ ' अत्र ' परैरलक्ष्यव्यापारे कथितोऽर्थोऽपवारितः । उक्त्वा प्रागपवार्येति पश्चादेनं प्रयोजयेत् ॥ ' इति ॥ **चित्रगतायामित्यादि ।** मे हृदयं मनश्चित्रगतायामालेख्यगतायामस्यां मालविकायां कान्तिविसंवादशङ्कि कान्तेः शोभाया विसंवादं विपर्यासं शङ्कते इति तथोक्तं [अस्या रूपं प्रतिकृतिशोभासदृशं भवेन्न वेति शंकाकुलमित्यर्थः ।] आसीत् ।

---

१ गृह; परिणतायाः. २ अपवार्य. ३ ता इत्यादि नास्ति पुस्तकान्तरे. ४ पेक्खदु भवं. ५ ०दोवि (दपि), हीअदि.

गणदासः—वत्से मुक्तसाध्वसा सत्त्वस्था[1] भव ।

राजा—(आत्मगतम् ।) अहो सर्वस्थानानवद्यता[2] रूपस्य[3] । तथा हि ।

दीर्घाक्षं शरदिन्दुकान्ति वदनं बाहू नतावंसयोः
संक्षिप्तं निबिडोन्नतस्तनमुरः पार्श्वे प्रमृष्टे इव ।
मध्यः पाणिमितो नितम्बि[4] जघनं पादावरालाङ्गुली
छन्दो नर्तयितुर्यथैव मनसः[5] श्लिष्टं तथास्या वपुः ॥ ३ ॥

मालविका—(उपगानं[6] कृत्वा चतुष्पदवस्तु गायति ।)

संप्रतीदानीम् । साक्षाद्दर्शनवेलायामित्यर्थः । इयं मालविका येन चित्रकारेणालिखिता तं चित्रकारं शिथिलसमाधिं शिथिलप्रयत्नं [शिथिलचित्तैकाग्र्यं वा] मन्ये [न तेनास्या रूपं यथार्थतो लिखितमिति] जानामि ॥ २ ॥ मुक्तसाध्वसा परित्यक्तभया सभाकम्परहितेत्यर्थः । [सत्त्वे चित्तस्याविकृत्यवस्थायां तिष्ठतीति] सत्त्वस्था सत्त्वगुणयुक्ता । अविकृता भवेत्यर्थः । यथोक्तम्—' चित्तस्याविकृतिः सत्त्वं विकृतेः कारणे सति ' इति । अत्र विकृतिकारणं नायकसंनिधिः । अहो इत्याश्चर्ये । सर्वस्थानानवद्यता सर्वेषु स्थानेषु सर्वावयवेष्वनवद्यता निर्दोषता । रमणीयतेत्यर्थः । **दीर्घाक्षमित्यादि** । वदनं मुखं दीर्घाक्षं दीर्घे आयते अक्षिणी लोचने यस्य तत्तथोक्तम् । शरदिन्दुकान्ति शरदिन्दोः शरच्चन्द्रस्य कान्तिरिव कान्तिर्यस्य तत्तथोक्तम् । बाहू भुजावंसयोः स्कन्धयोर्नतौ नम्रौ ।] निबिडौ अन्योन्याश्लिष्टौ उन्नतौ तुङ्गौ स्तनौ यत्र तत्तथा । अत एव संक्षिप्तं जातसंक्षेपमुरः । पार्श्वे प्रमृष्टे श्लक्ष्णीकृते इव ।] मध्योऽवलग्नं पाणिमितः पाणिना हस्तेन मितः परिमितः । [मुष्टिग्राह्य इति यावत् ।] जघनं [प्रशस्तो नितम्बोस्यास्तीति] नितम्बि नितम्बातिशययुक्तम् । अमितमिति पाठे विशालमित्यर्थः । पादौ चरणावरालाङ्गुली अराला आकुञ्चिता अङ्गुल्यो ययोस्तौ तथोक्तौ । अस्या मालविकाया वपुः शरीरं नर्तयितुर्नृत्ताचार्यस्य छन्दोऽभिप्रायो यथा यादृशस्तथा तेन प्रकारेण श्लिष्टं संगतम् । अनेन नर्तक्या नृत्तारम्भोचितावस्थानविशेष उक्तः । तथा चोक्तं वसन्तराजीये—' अङ्गस्य चतुरस्रत्वं समपादौ लताकरौ । आरम्भे सर्वनृत्तानामेतत्सामान्यमिष्यते ॥' इति । [शार्दूलविक्रीडितं वृत्तम् ।] ॥ ३ ॥ [गानात्पूर्वं कर्तव्यं वसन्तादिरागानुगतं स्वरविशेषपरिशीलनम् ।] उपगानं रागलपितं (दीप्तं–इ. पा.) कृत्वा । [उपवहनमिति पाठे 'उपोह्यते स्वरो यस्मात्तत्तूपवहनं स्मृतम् ' इत्युक्तलक्षणं पूर्वगानम् ।] चतुष्पदवस्तु चतुष्पदसंज्ञकं प्रबन्धं गायति । वस्त्विति प्रबन्धः । ' प्रबन्धो रूपकं वस्तु निबन्धस्याभिधात्रयम् '

---

१ ०संस्था. २ सर्वास्वनवस्थासु. ३ रूपविशेषस्य. ४ ०तोऽमितं च, नतं च. ५ मनसि, मनसा. ६ ०वहनम्.

दुर्लभः प्रियस्तस्मिन्भव हृदय निराशं—
अहो अपाङ्गको मे प्रस्फुरति किमपि वामः ।
एष स चिरदृष्टः कथमुपनेतव्यो
नाथ मां पराधीनां त्वयि गणय सतृष्णाम् ॥ ४ ॥ (क)

(इति । ततो यथारसमभिनयति ।)

(क) दुल्लहो पिओ[1] तस्सिं भव हिअअ णिरासं अह्मो[2] अपङ्गओ मे पप्फुरइ[3] किं पि वामो[4] । एसो सो चिरदिट्ठो कहं[5] उवणइदव्वो णाह मं पराहीणं तुइ[6] गणअ सतिण्हम् ॥

इत्युक्तत्वात् । **दुर्लभ** इति । [हृदय निराशं निरभिलाषं भव । अभिलाषं मा कुरु-इत्यर्थः । अहो इत्याश्चर्ये । मम वामः अपाङ्गो नेत्रप्रान्तः किमपि अज्ञातहेतुकं प्रस्फुरति स्पन्दते । स्त्रीणां वामाङ्गस्य शुभसूचकत्वादभीष्टसमागमं सूचयतीति भावः । अत एवाश्चार्यम् । एष स प्रियः कथमुपनेतव्यः समीपं प्रापणीयः । चिन्तोपस्थितं नाथमाह—मां पराधीनां परवशामपि त्वयि सतृष्णां सानुरागां गणय कलय । जानीहीत्यर्थः ।] ॥ ४ ॥ ततो गानानन्तरं यथारसं रसानुकूलमभिनयति । अत्र रसोऽयोगविप्रलम्भशृङ्गारः । यथोक्तम्—' अप्राप्तिर्विप्रलम्भः स्याद्यूनोर्जाताभिलाषयोः । विप्रलम्भस्य भेदाः स्युरयोगो विरहस्ततः ॥ प्रवासः शापः करुणा मानश्चेति च षण्मताः ॥' तत्र ' संप्राप्तेः प्रागसङ्गो यस्तमयोगं प्रचक्षते ' इति । अत्र चतुष्पद्यां क्रमेण पादचतुष्टये निर्वेदः सविस्मयो हर्षश्चिन्ता दैन्यं चेति संचारिभावास्तत्तदनुभावैर्मुखरागादिभिः सम्यक्प्रकाशिता इत्यनुसंधेयम् । तेषां लक्षणमुक्तं वसन्तराजीये—' इष्टार्थविरहव्याधिनिन्दापदवमाननैः । दारिद्र्यताडनक्षेपपरवृद्ध्यवलोकनैः । निष्फलत्वमतिर्नॄणां निर्वेदो जीवितादिषु ॥ ' अत्रेष्टार्थविरहजनितो निर्वेदः ॥ ' अन्तर्बाष्पोद्गमध्याननिःश्वासस्वावमाननैः । दैन्यगद्गदवैवर्ण्यैरभिनेयो भवेदयम् ॥ हर्षो मनःसमुल्लासो गुरुदेवमहीभुजाम् । प्रसादात्प्रियसङ्गाच्च भवेदिष्टार्थलाभतः ॥ ' अत्रेष्टार्थलाभजनितो हर्षः । अपाङ्गस्फुरणस्येष्टार्थलाभहेतुत्वात् । ' मुखनेत्रप्रसन्नत्वप्रियोक्तिपुलकोद्गमैः । दानत्यागपरीरम्भैरभिनेयो भवेदयम् ॥ इष्टालाभादिष्टनाशादनिष्टाप्तेश्च दैन्यतः । चित्तस्यैकाग्रता चिन्ता ॥ ' अत्र चिन्ता इष्टालाभजनिता । ' स्मरणं चानुपस्मृतिः ॥ संतापोच्छ्वासनिःश्वासा मान्द्यमिन्द्रियकर्मणाम् । अधोमुखत्वमित्याद्यैराभिनेया भवेदियम् ॥ अनौजस्त्वं तु मनसो दैन्यमित्यभिधीयते । मनःसंतापदारिद्र्यचिन्तौत्सुक्यादिभिर्भवेत् ॥ ' अत्रौत्सुक्यजनितं दैन्यम् । ' अङ्गानामपि शैथिल्यं देहसंस्कारवर्जनम् । अश्चितं च शिरस्तस्मिन्ननुभावाः प्रकीर्तिं(दर्शि)ताः ' इति ।

१ पिओ मे. २ अम्महे. ३ परिप्फु. ४ वामओ. ५ कहं उण दट्ठव्वो (द्रष्टव्यः). ६ परिगणअ.

विदूषकः—(जनान्तिकम्) भोः चतुष्पदवस्तुकं द्वारीकृत्य त्वय्युपस्थापित इवात्मा तत्रभवत्या । (क)

राजा—(जनान्तिकम् ।) सखे एवमेव[1] ममापि हृदयम् । अनया खलु

जनमिममनुरक्तं विद्धि नाथेति गेये
वचनमभिनयन्त्या स्वाङ्गनिर्देशपूर्वम् ।
प्रणयगतिमदृष्ट्वा धारिणीसंनिकर्षा-
दहमिव सुकुमारप्रार्थनाव्याजमुक्तः ॥ ५ ॥

(मालविका गीतान्ते निष्क्रमितुमिच्छति[3] ।)

विदूषकः—भवति तिष्ठ । किमपि वो विस्मृतः क्रमभेदः । तं तावत्प्रक्ष्यामि । (ख)

गणदासः—वत्से[4] स्थीयताम् । उपदेशविशुद्धा यास्यसि ।

(मालविका निवृत्य स्थिता ।)

राजा—(आत्मगतम्[5] ।) अहो सर्वास्ववस्थासु चारुता शोभां[6] पुष्यति । तथा हि ।

वामं संधिस्तिमितवलयं न्यस्य हस्तं नितम्बे
कृत्वा श्यामाविटपसदृशं स्रस्तमुक्तं द्वितीयम् ।

(क) भो[7] चउप्पदवत्तुअं[8] दुवारीकरिअ तुइ उवक्खविदो[9] विअ अप्पा तत्तहोदीए ।
(ख) भोदि चिट्ठ । किंपि[10] वो विसुमरिदो कमभेदो । तं दाव पुच्छिस्सम् ।

[द्वारीकृत्य तद्द्वारेण उपस्थापितः न्यस्त इव । हृदयमभिप्रायः]। **जनमिममित्यादि ।** नाथ स्वामिन् इमं जनम् । मामित्यर्थः । अनुरक्तं स्निग्धम् । त्वयीति शेषः । विद्धि जानीहि । इत्येवंविधे गेये गीते । वचनं ‘ णाह मं पराहीणं ’ इत्यादिवाक्यं स्वाङ्गनिर्देशपूर्वमात्मशरीरप्रदर्शनपूर्वं यथा भवति तथाभिनयन्त्या हस्तादिभिः प्रकाशीकुर्वत्या अनया मालविकया धारिणीसंनिकर्षाद्धेतोः प्रणयगतिं मम स्नेहप्रवृत्तिं [यद्वा मयि तस्याः प्रणयगतिमनुरागप्रसरम्] अदृष्ट्वा अज्ञात्वा । अनुभावानामप्रकाशनादिति भावः । सुकुमारप्रार्थनाव्याजं सुकुमारा मृदुला । रसनीयेत्यर्थः । सा चासौ प्रार्थना सैव व्याजोऽपदेशो यस्मिन्कर्मणि तत्तथोक्तम् । अहमुक्त इवोदित इव [इत्युत्प्रेक्षा । मालिनीवृत्तम् ।] ॥५॥ [क्रमभेदः क्रमविशेषः । कर्मभेदः इति पाठे क्रियाङ्गम् । उपदेशविशुद्धा उपदेशे विशुद्धा अनवद्या इत्युक्ता सती । पाठान्तरे उपदेशस्य विशुद्धौ निर्दोषतायां अभ्युपगतायामित्यर्थः । शोभां कान्तिविशेषम् । अनेन माधुर्यं नाम नायिकालंकार उक्तः । तदुक्तं–‘ सर्वावस्थाविशेषेषु माधुर्यं रमणीयता ’ इति ।] **वाममित्यादि ।** संधिस्तिमितवलयं संधौ मणिबन्धे स्तिमितं निश्चलं वलयं कङ्कणं यस्य स तथोक्तः । तं वामं

१ एवमावयोर्हृ. २ ०मपि. ३ गन्तुम्, ०मितुमारब्धा. ४ भद्रे उपदे० यातुमर्हसि; ०विशुद्धौ या०; क्षणमात्रं स्थित्वा उप० ५ स्वग० ६ शोभान्तरम्. ७ भो वअस्स. ८ चउप्पदं, ०पदावत्थअं (पदावस्थाकं). ९ उवक्खित्तो (उपक्षिप्तः) १० किंचि (किंचित्)...तत्त कम्म०; कम्म (कर्म) भेदो.

पादाङ्गुष्ठालुलितकुसुमे कुट्टिमे पातिताक्षं
नृत्तादस्याः स्थितमतितरां कान्तमृज्वायतार्धम् ॥ ६ ॥

देवी—ननु गौतमवचनमप्यार्यो हृदये करोति । (क)

गण०—देवि मैवम्[1] । देवप्रत्ययात्संभाव्यते सूक्ष्मदर्शिता गौतमस्य ।

मन्दोऽप्यमन्दतामेति संसर्गेण विपश्चितः ।
पङ्कच्छिदः फलस्येव निकषेणाविलं पयः ॥ ७ ॥

(विदूषकं विलोक्य ।) तच्छृणुमो[3] विवक्षितमार्यस्य ।

विदूषकः—(गणदासं विलोक्य ।) साक्षिणीं तावत्पृच्छ । पश्चाद्यो मया क्रमभेदो लक्षितस्तं भणिष्यामि । (ख)

गणदासः—भगवति यथादृष्टमभिधीयताम् । गुणो वा दोषो वा ।

परिव्राजिका—यथादृष्टं[6] सर्वमनवद्यम् । कुतः ।

अङ्गैरन्तर्निहितवचनैः सूचितः सम्यगर्थः
पादन्यासो लयमनुगतस्तन्मयत्वं रसेषु ।

(क) णं गोदमवअणं वि अज्जो हिअए करोदि । (ख) सक्खिणीं दाव पुच्छ । पच्छा जो मए कमभेदो लक्खिदो तं भणिस्सं ।

सव्यं हस्तं नितम्बे न्यस्य निधाय । श्यामाविटपसदृशं [श्यामायाः विटपेन सदृशं] फलिनीशाखासंनिभं द्वितीयं दक्षिणं हस्तं स्रस्तमुक्तं स्रस्तं शिथिलं यथा भवति तथा मुक्तं विसृष्टम् । लम्बितमित्यर्थः । कृत्वा विधाय । पादाङ्गुष्ठालुलितकुसुमे पादाङ्गुष्ठेनालुलितमामृष्टं कुसुमं यस्य तत्तथोक्तं तस्मिन्कुट्टिमे स्फटिकादिखचित-स्थले पातिते व्यापारिते अक्षिणी यस्मिन्कर्मणि तथोक्तम् । ऋज्वायतार्धम् ऋजु अवक्रमायतं दीर्घं अर्धं शरीरस्योर्ध्वभागो यस्य तत्तथोक्तम् । अस्याः स्थितं [निष्क्रियतया] अवस्थानं नृत्तान्नर्तनादतितरामत्यर्थं कान्तं मनोहरं भवति । अत्र वाक्यस्य विशेषितत्वात्पुष्पं नाम संध्यङ्गमुक्तं भवति । [वाक्यार्थहेतुकं काव्यलिङ्गमलंकारः । मन्दाक्रान्ता वृत्तम्] ॥ ६ ॥ **मन्दोऽपीति** । [विपश्चितः पण्डितस्य संसर्गेण संगत्या मन्दो जडबुद्धिरपि अमन्दतां बुद्धिवैशद्यमेति भजते । पङ्कच्छिदः मलहरस्य फलस्य कतकबीजस्य निकषेण घर्षेण आविलं पङ्किलं पयः इव । तद्यथा नैर्मल्यं याति तद्वत् । पथ्यावक्त्रं वृत्तम् ।] अस्य वाक्यस्योपपत्तिमत्त्वादुपन्यासो नाम संध्यङ्गमुक्तं भवति ॥७॥ [अनवद्यमदोषम् । अवद्यपण्य-इति निपातनात्साधु ।] **अङ्गैरित्यादि** अन्त-र्निहितवचनैरन्तर्निहितान्यभ्यन्तरस्थापितानि वचनानि पदानि [विक्षेपविशेषैः स्वाभिप्रायस्य प्रकटनात्] यैस्तैरङ्गैर्हस्तादिभिः । अत्राभ्यासपाटवादङ्गानां स्वत एवान्तर्निहितवचनत्वमुत्प्रेक्षितमिति मन्तव्यम् । अर्थो गीतार्थः सम्यक् साधु

---

१ मा मैवम्. २ ०कर्षेण. ३ ततः ४ ०मो वयं. ५ वेति. ६ यथाशास्त्रं; ०दर्शनम् ७ ०मुप. ८ कोसइ (कौशिकीं). ९ कम्म (कर्म) १० दिट्ठो.

शाखायोनिर्मृदुरभिनयस्तद्विकल्पानुवृत्तौ
भावो भावं नुदति विषयाद्रागबन्धः स एव ॥ ८ ॥

गणदासः—देवः कथं वा मन्यते ।

राजा—गणदास वयं स्वपक्षे शिथिलाभिमानाः संवृत्ताः ।

गणदासः—अद्य नर्तयितास्मि ।

उपदेशं विदुः शुद्धं सन्तस्तमुपदेशिनः ।
श्यामायते न विद्वत्सु यः काञ्चनमिवाग्निषु ॥ ९ ॥

देवी—दिष्ट्या परीक्षकाराधनेनार्यो वर्धते । (क)

गणदासः—देवीपरिग्रह एव मे वृद्धिहेतुः । (विदूषकं विलोक्य) गौतम वदेदानीं यत्ते मनसि वर्तते ।

(क) दिट्ठिआ परिक्खआराहणेण अज्जो वड्ढइ ।

सूचितः प्रकाशितः । पादन्यासः पादस्य न्यासो विन्यासः । लयमनुगतोऽनुसृतः । लयो नाम तालमानम् । 'तालवर्ती तु यः कालः स काललयनाल्लयः' इत्युक्तत्वात् । ['छन्दोक्षरपदानां हि समत्वं यत्प्रकीर्तितम् । कलाकलान्तरकृतः स लयो मानसंज्ञितः ॥' इति भरतः ।] अत्र पादन्यासस्य स्वतो लयानुसरणमभ्यासपाटवादिति मन्तव्यम् । रसेषु रसविषयेषु तन्मयत्वं तादात्म्यम् । रसात्मता भवतीत्यर्थः । अत्र रसशब्देनोपचारात्परितो(पो)षातिशयवन्तो भावाः कथ्यन्ते । प्रकृतरसस्यैकत्वाद्रसेष्विति बहुवचनानुपपत्तिप्रसङ्गात् । अभिनयः प्रयोगः । यथोक्तम्—'प्रयोगो यस्तु नाट्यादेर्भवेदभिनयो हि सः' इति । शाखायोनिः शाखा योनिः प्रभवो यस्य स तथोक्तस्तथाविधः सन् । मृदुः सुकुमारः । ['प्रयोगो द्विविधश्चैव विज्ञेयो नाट्यमाश्रितः । सुकुमारस्तथा विद्धो नानाभावरसाश्रयः ॥' इति भरतः ।] शाखा नाम नृत्तहस्तानां मानप्रचारः । यथोक्तम्—'शाखा तु नृत्तहस्तानां या मात्रा चित्रनर्तने' इति । तद्विकल्पानुवृत्तौ तस्याभिनयस्य विकल्पो भेदस्तस्यानुवृत्तिरनुगतिः प्राप्तिः तस्याम् । भावः अभिनीयमानो निर्वेदादिः । विषयादाश्रयात् । प्रकृतात्स्थायिन इत्यर्थः । पूर्वाभिनीतं संचारिणं नुदति [प्रेरयति] अपाकरोति । रागबन्धो रञ्जनत्वयोगः स एव पूर्वं यादृशस्तादृश एवेत्यर्थः ॥ [मन्दाक्रान्तावृत्तम्] ॥८॥ [नर्तयितास्मि यथार्थो नाट्याचार्योऽस्मि । तदेव विशदयति ।] **उपदेशं विदुरित्यादि** । [सन्तः सदसद्विवेकिनः] उपदेशिनः शिक्षकस्य । तमुपदेशं शिक्षां शुद्धं निर्दोषं विदुः जानन्ति । यः उपदेशः । [विद्वत्सु] युष्मासु युष्मादृशेषु । विवेकिष्वित्यर्थः । [अग्निषु काञ्चनमिव] न श्यामायते । मलिनीभवति । 'लोहितादिडाज्भ्यः क्यष्' । 'वा क्यषः' इति विकल्पादात्मनेपदम् । [अनुक्तहेतुको व्यतिरेकालंकारः । उपमानात्काञ्चनादपेक्षयोपदेशस्याधिक्यबोधनात् । 'आधिक्यमुपमेयस्योपमानान्न्यूनताथ वा । व्यतिरेक एक उक्ते हेतौ नोक्ते स च त्रिधा ॥'

१ नुदति. २ स्वपक्षशि० ३ युष्मासु. ४ ०ग्रहश्च, ग्रहोऽपि मे. ५ अपरि०(अपरिक्षतारा०) परिसदा (परिषदा०); अहिअं (अधिकं) व० अज्जो. ६ तालान्तरालवर्ती यः कालोऽसौ लय ईरितः । इ. पा.

विदूषकः——प्रथमोपदेशदर्शने[1] प्रथमं ब्राह्मणस्य पूजा कर्तव्या। सा ननु वो विस्मृता। (क)

परिव्रा०——अहो प्रयोगाभ्यन्तरः प्राश्निकः[1]।

(सर्वे प्रहसिताः[2]। मालविकापि स्मितं करोति)

राजा——(आत्मगतम्[3]।) आत्तसारश्चक्षुषा[4] मे स्वविषयः। यदनेन

स्मयमानमायताक्ष्याः किंचिदभिव्यक्तदशनशोभि मुखम्।
असमग्रलक्ष्यकेसरमुच्छ्वसदिव पङ्कजं दृष्टम्॥ १०॥

गणदासः——महाब्राह्मण न खलु प्रथमं नेपथ्यसंगीतकमिदम्[5]। अन्यथा कथं त्वामर्चनीयं[6] नार्चयिष्यामः।

विदूषकः——मया नाम मुग्धचातकेनेव शुष्कघनगर्जितेऽन्तरिक्षे जलपानमिष्टम्। (ख)

परिव्रा०——एवमेव।

(क) पुढमोपदेसदंसणे पुढमं बह्मणस्स[7] पूआ कादव्वा[8]। सा[9] णं वो विसुमरिदा।

(ख) मए णाम मुद्धचादएण[10] विअ[11] सुक्खघणगज्जिदे अन्तरिक्खे जलपाणं इच्छिदं[12]।

इत्युक्तः इति अ. रा.]॥९॥ प्रथमोपदेशेत्यादि। अत्र परिहासस्य गम्यमानत्वान्नर्मेति संध्यङ्गमुक्तं भवति। [प्रयोगे अभ्यन्तरः प्रयोगाभ्यंतरः प्रयोगरहस्यज्ञ इत्यर्थः। आत्तः गृहीतः सार उत्कृष्टांशो यस्य।] स्मयमानमित्यादि। [यस्मादनेन चक्षुषा आयते दीर्घे अक्षिणी यस्याः सा आयताक्षी तस्याः स्मयमानं कृतस्मितं अत एव किंचिदीषदभिव्यक्ता ये दशनाः तैः शोभते इति तथोक्तं मुखं उच्छ्वसत् विकसदत एव संपूर्णविकासाभावात् असमग्रं लक्ष्याणि केसराणि यस्य तदसमग्रलक्ष्यकेसरमसमस्ताभिव्यक्तकिञ्जल्कं पङ्कजं कमलमिव दृष्टम्। 'अत्र दशकेसराणां मुखकमलयोः स्मितविकासयोर्बिम्बानुबिम्बभावेनोपन्यासाद्बिम्बानुबिम्बभावेनोपमा।' अ. रा.]॥ १०॥ [महाब्राह्मण इति निन्दागर्भम्। संगीतकमित्यत्र सवनमिति अर्चनीयमित्यत्र दक्षिणीयमिति पाठौ। तत्र सवनं नाट्यमण्डपे विघ्नोपशान्तये आदि क्रियमाणो यज्ञः भरतेन नाट्यशास्त्रारम्भे प्रोक्तः। दक्षिणामर्हतीति दक्षिणीयः। कडङ्गरदक्षिणाच्छ च इति छः। नेपथ्यसेवनमिति पाठे नेपथ्यपरिग्रह इत्यर्थः। मुग्धोऽज्ञः। शुष्का जलहीना

---

१ प्रश्नः। अतः परं—अयि पण्डितंमन्ये। किमन्यत्। मोदकखण्डनेऽप्यसमर्था त्वं किं जानासि। प्रसन्नचन्द्रपादसदृशैः केशपाशैरेतान् भीषयसे। (अयि पडितंमण्णे। किं अण्णं। मोदअखण्डणेवि असमत्था तुमं किं जाणासि। पसण्णचन्दपादसरिसेहिं केसपासेहिं एदाणं भीसिअसि।) २ परिहसन्ति। मा० च मन्दस्मितं. ३ स्वगतं. ४ उपात्त. ५ प्रदर्शनमि०, सवनमि० ६ दक्षिणीयं. ७ सस्स. ८ इच्छिदव्वा (एष्टव्या) ९ सा उण; ण वोपलक्खिदा. १० मुद्दा (मुधा); णाम सुक्ख० पाणं इच्छदा, जलपाणेन, नाय चादआइदं (चातकायितं). ११ एतन्नास्ति क्वचित्. १२ कादुं इच्छिअदि (कर्तुमिष्यते).

विदूषकः—तेन हि पण्डितपरितोषप्रत्यया ननु मूढा जातिः । यतोऽत्रभवत्या शोभनं भणितं ततोऽस्या इदं पारितोषिकं प्रयच्छामि । (क)

(इति राज्ञो हस्तात्कटकमाकर्षति ।)

देवी—तिष्ठ तावत् । गुणान्तरमजानन्किमिति त्वमाभरणं ददासि । (ख)

विदूषकः—परकीयमिति कृत्वा । (ग)

देवी—(आचार्यं विलोक्य ।) आर्य गणदास ननु दर्शितोपदेशा ते शिष्या । (घ)

गणदासः—वत्से । एहि गच्छाव इदानीम् ।

(मालविका सहाचार्येण निष्क्रान्ता ।)

विदूषकः—(राजानं विलोक्य । जनान्तिकम् ।) एतावान्मे मतिविभवो भवन्तं सेवितुम् । (ङ)

राजा—(जनान्तिकम् ।) अलमलं परिच्छेदेन । अद्य[2] हि

भाग्यास्तमयमिवाक्ष्णोर्हृदयस्य महोत्सवावसानमिव ।
द्वारपिधानमिव धृतेर्मन्ये तस्यास्तिरस्करणम्[3] ॥ ११ ॥

(क) तेण हि पण्डिदपरितोसपच्चया णं मूढा[4] जादी । जदो[5] अत्तहोदीए सोहणं भणिदं तदो से इमं पारितोसिअं पअच्छामि । (ख) चिट्ठ दाव । गुणन्तरं अआणन्तो किंति[6] तुमं आहरणं देसि । (ग) परकेरअंति[7] करिअ । (घ) अज्ज गणदास णं दंसिदोवदेसा दे[8] सिस्सा । (ङ) एत्तिओ मे मदिविहवो भवन्तं सेविदुं ।

घनास्तेषां गर्जितं यस्मिन् । तैर्गर्जिते वा जलपानमिष्टं यथा शुष्कमेघगर्जितमाकर्ण्य जलं याचमानो चातको वञ्चितो भवति तथा भवतः प्रयोगाडम्बरमालोक्य स्वस्तिवाचनादिकमपेक्षमाणोहं भग्नेच्छः संवृत्त इत्यर्थः । चातकायितमिति पाठे चातकवदाचरितमित्यर्थः । कर्तुः क्यङ् सलोपश्च इति क्यङ् ततः क्तश्च । पण्डितानां परितोषः पण्डितपरितोषस्तेन प्रत्ययो यस्याः । अस्यै मालविकायै । गुणान्तरं गुणविशेषम् ।] आर्य गणदास । दर्शितोपदेशा ते शिष्या । अनेन मालविकानिर्गमनहेतुना देवीवचनेन राज्ञो हितरोधनाद्विरोधो नाम संध्यङ्गमुक्तं भवति । [परिच्छेदेन एतावान्मतिविभव इति मर्यादाकरणेन । अतः परं समधिकं मम तव साहाय्येन प्रयोजनमिति भावः ।] **भाग्यास्तमयमित्यादि** । तस्या मालविकायास्तिरस्करणं तिरोधानमक्ष्णोर्नेत्रयोर्भाग्यास्तमयमिव भाग्यस्य । भाग्यधेयस्तास्तमयमिव नाशमिव । हृदयस्य मनसो महोत्सवस्यावसानमन्तमिव । धृतेः प्रीतेर्द्वारपिधानमिव द्वारस्य प्रवेशमार्गस्य

१ प्रतिष्ठस्व इ० २ अहं. ३ करिणीभू. ४ मूढजादी. ५ जइ, जइ भअवदीए. ६ किंणिमित्तं. ७ परकीअं. ८ वः.

विदूषकः—(जनान्तिकम्।) साधु त्वं दरिद्र इवातुरो वैद्येनोपनीयमानमौषधमिच्छसि। (क)

(प्रविश्य।)

हरदत्तः—देव मदीयमिदानीं प्रयोगमवलोकयितुं क्रियतां प्रसादः।

राजा—(आत्मगतम्।) अवसितो [१]दर्शनार्थः (दाक्षिण्यमवलम्ब्य। प्रकाशम्।) हरदत्त ननु पर्युत्सुका एव वयम्।

हरदत्तः—अनुगृहीतोऽस्मि।

(नेपथ्ये)

वैतालिकः—[२]जयतु जयतु देवः। उपारूढो मध्याह्नः[३]। तथा हि।

पत्रच्छायासु हंसा मुकुलितनयना दीर्घिकापद्मिनीनां
सौधान्यत्यर्थतापाद्वलभिपरिचयद्वेषिपारावतानि।
बिन्दूत्क्षेपान्[४]पिपासुः परिपतति[५] शिखी भ्रान्तिमद्वारियन्त्रं
सर्वैरुस्रैः समग्रैस्[६]त्वमिव नृपगुणैर्दीप्यते सप्तसप्तिः॥ १२॥

विदूषकः—अविहा अविहा। ब्राह्मणस्य भोजनवेला संवृत्ता। अत्र-

(क) साहु तुमं दलिद्दो विअ आदुरो वेज्जेण उँवणीअमाणं ओसहं इच्छसि।

पिधानं [निरोधं] तिरोधानमिव। मन्ये संभावयामि। [सर्वं शून्यमिव जातमित्यर्थः। उत्प्रेक्षालंकारः। आर्यावृत्तम्] ॥ ११ ॥ अत्रार्तेर्गम्यमानत्वाद्विधुतं नाम संध्यङ्गमुक्तं भवति। [दरिद्र इवातुर इति। अयं भावः-त्वं स्वयं किमपि न करोषि। मया त्वत्संनिधावानीयमानां मालविकामिच्छसि।] **पत्रच्छायास्विति**। [दीर्घिका उद्यानवापी तत्र याः पद्मिन्यः कमलिन्यस्तासां पत्रच्छायासु हंसा मुकलिते नयने येषां ते मुकलितनयनाः संमीलितलोचनाः। स्थिता इति शेषः। अत्यर्थतापादतिमात्रसूर्योष्मणः सौधानि राजसदनानि। वलभ्यः गोपानस्यः ताभिः परिचयः तासां संश्रयः तं द्विषतीति द्वेषिणः पारावता यत्र तथाभूतानि। शिखी मयूरः बिन्दूत्क्षेपान् उत्क्षिप्तजलबिन्दून् तृषाकुलत्वात् पिपासुः पातुमिच्छुः सन् भ्रान्तिमत् भ्रमणशीलं वारियन्त्रं जलोद्गारियन्त्रं परिपतति परितो भ्रमति। सप्त सप्तयः अश्वा यस्य स सप्तसप्तिः सूर्यः समग्रैः सममग्राणि येषां तैः संमुखपातिभिः सर्वैः उस्रैः किरणैः त्वमिव समग्रैः सर्वव्यापिभिः नृपगुणै राजतेजोभिः दीप्यते। 'गोपानसी तु वलभिः' इति। 'पारावतः कलरवः' इति। 'किरणोस्रमयूखांशु–' इति चामरः। उपमालंकारः। स्रग्धरावृत्तम् ॥ १२ ॥ उचितवेलाया योग्यकालस्यातिक्रमः तस्मिन्सति। चिकित्सका वैद्याः ! मज्जनविधिं स्नानविधिम्। मध्याह्नविधिमिति पाठे मध्यम-

---

१ मे दर्श० २ विजयतां देवः. ३ मध्यमह्नः सविता; सुखाय भवतु माध्यन्दिनी सन्ध्या देवस्य. ४ बिन्दुक्षे. ५ सरति. ६ समग्र. ७ ओसदं दीअमाणं.

भवतोऽपि । उचितवेलातिक्रमे चिकित्सका दोषमुदाहरन्ति । हरदत्त किमिदानीं भणसि । (क)

हरदत्तः—नास्ति मद्वचनस्यावकाशोऽत्र[1] ।

राजा—(हरदत्तमवलोक्य ।) तेन हि त्वदीयमुपदेशं श्वो वयं द्रक्ष्यामः । विश्राम्यतु[2] भवान् ।

हरदत्तः—यदाज्ञापयति[3] देवः । (इति निष्क्रान्तः ।)

देवी—निर्वर्तयत्वार्यपुत्रो मज्जनविधिम् । (ख)

विदूषकः—भवति विशेषेण पानभोजनं त्वरय । (ग)

परिव्राजिका—(उत्थाय ।) स्वस्ति भवते । (इति सपरिजनया देव्या सह निष्क्रान्ता ।)

विदूषकः—भो न केवलं रूपे शिल्पेऽप्यद्वितीया मालविका । (घ)

राजा—वयस्य

अव्याजसुन्दरीं तां विज्ञानेन ललितेन योजयता ।
परिकल्पितो[4] विधात्रा बाणः कामस्य विषदिग्धः ॥ १३ ॥

किं बहुना । चिन्तयितव्योऽस्मि ।

विदूषकः—भवताप्यहम् । दृढं विपणिकन्दुरिव मे उदराभ्यन्तरं दह्यते । (ङ)

(क) अविहा अविहा । बह्मणस्य[6] भोअणवेला संवुत्ता । अत्तहोदोवि । उइदवेलादिक्कमे चिइच्छआ दोसं उदाहरन्ति । हरदत्त[7] किं दाणिं भणासि । (ख) णिव्वट्टेदु अज्जउत्तो मज्जणविहिम् । (ग) भोदि विसेसेण पाणभोअणं तुवरावेहि[10] । (घ) भो[11] ण केवलं रूवे सिप्पेवि अद्दुदीआ मालविआ । (ङ) भवदावि अहं । दिढं[12] विपणिकन्दु विअ मे उदरब्भन्तरं[13] दज्झइ[14] ।

दिनकृत्यमित्यर्थः । पानं च भोजनं च तयोः समाहारः पानभोजनम् । अद्वितीया नास्ति द्वितीयं उपमानं यस्याः सा निरुपमा ।] **अव्याजेति** । [अव्याजेन भूषणाद्युपचाराभावेन सुन्दरीम् । [अकृत्रिमलावण्यामित्यर्थः । तां] ललितेन सुभगेन विज्ञानेन संगीतकलापरिज्ञानेन । [योजयता युक्तां कुर्वता विधात्रा विषेण दिग्धः विषदिग्धः विषाक्तशल्यः कामस्य बाणः परिकल्पितः उपस्थापितः । अत्र विज्ञानयोजनबाणोपकल्पनरूपवस्तुनोः संबन्धः असंभवन् मालविकाशिल्पज्ञानयोर्बाणविषसादृश्यमुपकल्पयतीति निदर्शनालंकारः । आर्या छन्दः] ॥ १३ ॥ विपणिकन्दुर्नाम पण्यवीथिकायां व्रीहि (पिष्ट)-

---

१ वचनावसरोत्र; वचनस्यान्यस्य; नास्ति चान्यस्य वचना० २ विरमतु. ३ यथा. ४ उप. ५ सखे चि०. ६ अह्माणं टण भोअणवेळा उपट्ठिदा. ७ (हरदत्तं विलोक्य ।). ८ अज्जो. ९ एतन्नास्ति क्वचित्. १० ०वेदु. (त्वरयतु). ११ भो वअस्स. १२ दिढं खु. १३ हिअअ. १४ ढ-भ-ज्जइ.

विदूषकः—(जनान्तिकम् ।) साधु त्वं दरिद्र इवातुरो वैद्येनोपनीयमानमौषधमिच्छसि । (क)

(प्रविश्य ।)

हरदत्तः—देव मदीयमिदानीं प्रयोगमवलोकयितुं क्रियतां प्रसादः ।

राजा—(आत्मगतम् ।) अवसितो [1]दर्शनार्थः (दाक्षिण्यमवलम्ब्य । प्रकाशम् ।) हरदत्त ननु पर्युत्सुका एव वयम् ।

हरदत्तः—अनुगृहीतोऽस्मि ।

(नेपथ्ये)

वैतालिकः—[2]जयतु जयतु देवः । उपारूढो मध्याह्नः[3] । तथा हि ।

पत्रच्छायासु हंसा मुकुलितनयना दीर्घिकापद्मिनीनां
सौधान्यत्यर्थतापाद्वलभिपरिचयद्वेषिपारावतानि ।
बिन्दू[4]त्क्षेपान्पिपासुः परिपतति[5] शिखी भ्रान्तिमद्वारियन्त्रं
सर्वैरुस्रैः समग्रै[6]स्त्वमिव नृपगुणैर्दीप्यते सप्तसप्तिः ॥ १२ ॥

विदूषकः—अविहा अविहा । ब्राह्मणस्य भोजनवेला संवृत्ता । अत्र-

क) साहु तुमं दलिद्दो विअ आदुरो वेज्जेण उँवणीअमाणं ओसहं इच्छसि ।

पिधानं [निरोधं] तिरोधानमिव । मन्ये संभावयामि । [सर्वं शून्यमिव जातमित्यर्थः । उत्प्रेक्षालंकारः । आर्यावृत्तम्] ॥ ११ ॥ अत्रार्तेर्गम्यमानत्वाद्विधुतं नाम संध्यङ्गमुक्तं भवति । [दरिद्र इवातुर इति । अयं भावः-त्वं स्वयं किमपि न करोषि । मया त्वत्संनिधावानीयमानां मालविकामिच्छसि ।] **पत्रच्छायास्विति** । [दीर्घिका उद्यानवापी तत्र याः पद्मिन्यः कमलिन्यस्तासां पत्रच्छायासु हंसा मुकलिते नयने येषां ते मुकलितनयनाः संमीलितलोचनाः । स्थिता इति शेषः । अत्यर्थतापादतिमात्रसूर्योष्मणः सौधानि राजसदनानि । वलभ्यः गोपानस्यः ताभिः परिचयः तासां संश्रयः तं द्विषतीति द्वेषिणः पारावता यत्र तथाभूतानि । शिखी मयूरः बिन्दूत्क्षेपान् उत्क्षिप्तजलबिन्दून् तृषाकुलत्वात् पिपासुः पातुमिच्छुः सन् भ्रान्तिमत भ्रमणशीलं वारियन्त्रं जलोद्गारियन्त्रं परिपतति परितो भ्रमति । सप्त सप्तयः अश्वा यस्य स सप्तसप्तिः सूर्यः समग्रैः सममग्राणि येषां तैः संमुखपातिभिः सर्वैः उस्रैः किरणैः त्वमिव समग्रैः सर्वव्यापिभिः नृपगुणै राजतेजोभिः दीप्यते । 'गोपानसी तु वलभिः' इति । 'पारावतः कलरवः' इति । 'किरणोस्रमयूखांशु–' इति चामरः । उपमालंकारः । स्रग्धरावृत्तम् ॥ १२ ॥ उचितवेलाया योग्यकालस्यातिक्रमः तस्मिन्सति । चिकित्सका वैद्याः । मज्जनविधिं स्नानविधिम् । मध्याह्नविधिमिति पाठे मध्यम-

---

१ मे दर्श० २ विजयतां देवः. ३ मध्यमह्नः सविता; सुखाय भवतु माध्यन्दिनी सन्ध्या देवस्य. ४ बिन्दुक्षे. ५ सरति. ६ समग्र. ७ ओसदं दीअमाणं.

भवतोऽपि । उचितवेलातिक्रमे चिकित्सका दोषमुदाहरन्ति । हरदत्त किमिदानीं भणसि । (क)

हरदत्तः—नास्ति [1]मद्वचनस्यावकाशोऽत्र ।

राजा—(हरदत्तमवलोक्य ।) तेन हि त्वदीयमुपदेशं श्वो वयं द्रक्ष्यामः । वि[2]श्राम्यतु भवान् ।

हरदत्तः—[3]यदाज्ञापयति देवः । (इति निष्क्रान्तः ।)

देवी—निर्वर्तयत्वार्यपुत्रो मज्जनविधिम् । (ख)

विदूषकः—भवति विशेषेण पानभोजनं त्वरय । (ग)

परिव्राजिका—(उत्थाय ।) स्वस्ति भवते । (इति सपरिजनया देव्या सह निष्क्रान्ता ।)

विदूषकः—भो न केवलं रूपे शिल्पेऽप्याद्वितीया मालविका । (घ)

राजा—वयस्य

अव्याजसुन्दरीं तां विज्ञानेन ललितेन योजयता ।
[4]परिकल्पितो विधात्रा बाणः कामस्य विषदिग्धः ॥ १३ ॥

किं बहुना । चिन्[5]तयितव्योऽस्मि ।

विदूषकः—भवताप्यहम् । दृढं विपणिकन्दुरिव म उदराभ्यन्तरं दह्यते । (ङ)

(क) अविहा अविहा । ब[6]ह्मणस्य भोअणवेला संवुत्ता । अत्तहोदोवि । उइदवेलादिक्कमे चिइच्छआ दोसं उदाहरन्ति । हरदत्त[7] किं दाणिं भणासि । (ख) णिव्वट्टेदु अ[8]ज्जउत्तो मज्जणविहिम् । (ग) भोदि विसेसेण [9]पाणभोअणं तु[10]वरावेहि । (घ) भो[11] ण केवलं रूवे सिप्पेवि अदुदीआ मालविआ । (ङ) भवदावि अहं । दिढं[12] विपणिकन्दु विअ मे उद[13]रब्भन्तरं द[14]ज्झइ ।

दिनकृत्यमित्यर्थः । पानं च भोजनं च तयोः समाहारः पानभोजनम् । अद्वितीया नास्ति द्वितीयं उपमानं यस्याः सा निरुपमा ।] **अव्याजेति** । [अव्याजेन भूषणाद्युपचाराभावेन सुन्दरीम् । [अकृत्रिमलावण्यामित्यर्थः । तां] ललितेन सुभगेन विज्ञानेन संगीतकलापरिज्ञानेन । [योजयता युक्तां कुर्वता विधात्रा विषेण दिग्धः विषादिग्धः विषाक्तशल्यः कामस्य बाणः परिकल्पितः उपस्थापितः । अत्र विज्ञानयोजनबाणोपकल्पनरूपवस्तुनोः संबन्धः असंभवन् मालविकाशिल्पज्ञानयोर्बाणविषसादृश्यमुपकल्पयतीति निदर्शनालंकारः । आर्या छन्दः] ॥ १३ ॥ विपणिकन्दुर्नाम पण्यवीथिकायां व्रीहि (पिष्ट)-

---

१ वचनावसरोत्र: वचनस्यान्यस्य; नास्ति चान्यस्य वचना० २ विरमतु. ३ यथा. ४ उप. ५ सखे ।चि०. ६ अह्माणं टण भोअणवेळा उपट्ठिदा. ७ (हरदत्तं विलोक्य ।). ८ अज्जो. ९ एतन्नास्ति क्वचित्. १० ०वेदु. (त्वरयतु). ११ भो वअस्स. १२ दिढ खु. १३ हिअअ. १४ ढ-भ-ज्जइ.

राजा—एवमेव भवान्सुहृदर्थे त्वरताम् ।

विदू०—गृहीतक्षणोऽस्मि । किं तु मेघावलीनिरुद्धा ज्योत्स्नेव पराधीनदर्शना तत्रभवती । भवानपि सूनोपरिचरो विहङ्गम इवामिषलोलुपो भीरुकश्च । तस्मादनातुरो भूत्वा कार्यसिद्धिं प्रार्थयमानो मे रोचसे । (क)

राजा—सखे कथमनातुरो भविष्यामि ।

सर्वान्तःपुरवनिताव्यापारप्रतिनिवृत्तहृदयस्य ।
सा वामलोचना मे स्नेहस्यैकायनीभूता ॥ १४ ॥

(इति निष्क्रान्ताः सर्वे ।)

इति द्वितीयोऽङ्कः ।

(क) गेहीदक्खणोम्हि । किं दु मेहावलीणिरुद्धा जोण्हा विअ पराहीणदंसणा तत्तहोदी । भवं वि सूणोपरिचरो विहंगमो विअ आमिसलोलुओ भीरुओ अ । ता अणादुरो भविअ कज्जसिद्धिं पत्थअन्तो मे रोअंसि ।

पचनपात्रम् । 'कन्दुर्वा स्वेदनी स्त्रियाम्' इत्यमरः । [विपणिकन्दोरिव ममोदराभ्यन्तरं बुभुक्षया पीड्यते इति भावः]॥ **एवमेवेत्यादि** । एवमेवेत्थमेव यथा भवान्भोजनरूपे स्वकार्ये त्वरते तथा सुहृदर्थे मदर्थे मालविकापुनर्दर्शने त्वरताम् । अत्र दृष्टनष्टस्य बीजस्यानूपसर्पणात्परिसर्पो नाम संध्यङ्गमुक्तं भवति ॥ [गृहीतक्षणोऽस्मि तवार्थसाधने निश्चितमतिरस्मि । क्षणो निर्व्यापारस्थितिः आवश्यकं मनःस्वास्थ्यमित्यर्थः । निरुद्धा अन्तरितदर्शना । परस्मिन्नधि पराधीनं परतन्त्रम् । 'सप्तमी शौण्डैः' इति समासः । 'अषडक्षाशितङ्ग्वलंकर्मालंपुरुषाध्युत्तरपदात्खः' इति खः । दर्शनं यस्याः सा । धारिणीप्रतिबन्धादिति भावः । सूना वधस्थानं तस्याः परिसरे चरतीति तथोक्तः । आमिषे मांसे पक्षे अभिलषितवस्तुनि लोलुपः अतिशयेन लुब्धः । अनातुरः नातिपर्याकुलः नात्युत्सुको वा ।] अत्र सान्त्वनस्य गम्यमानत्वात्पर्युपासनं नाम संध्यङ्गमुक्तं भवति ॥ **सर्वान्तःपुरेत्यादि** । [सा वामलोचना चारुनयना मालविका सर्वा या अन्तःपुरवनितास्तासु यः व्यापारः अवलोकनालपनालिङ्गनादिस्तस्मात्प्रतिनिवृत्तं हृदयं यस्य तस्य मे] स्नेहस्य प्रेम्ण एकायनीभूता । एकं केवलमयनं स्थानम् । आश्रय इत्यर्थः । तद्भूता । [तद्विरहितो न क्वापि निर्वृतिं लभे इत्यर्थः । आर्या छन्दः ।] ॥ १४ ॥ अत्राङ्के मालविकानिष्क्रमणेन कथाविच्छेदे सति सर्वान्तःपुरेत्यादिना गम्यमानो राज्ञोऽभिलाषातिशय उत्तराङ्ककथाहेतुत्वाद्बिन्दुरित्यनुसंधेयम् ॥

इति श्रीकाटयवेमभूपविरचिते कुमारगिरिराजीये मालविकाग्निमित्रव्याख्याने द्वितीयोऽङ्कः ॥

---

१ ०र्थेपि, अस्मदर्थे, २ कथं नातुरः. ३ व्यापारं. ४ गहीदो क्खणो. ५ मेहोवरुद्धजोण्हा. ६ ०होदी मालविआ. ७ सूणापरिसरचरो, ०णापरिचरो. ८ गिद्धो. ९ अच्चादुरो (अत्यातुरः) १० रुच्चइ, रुचेसि.

तृतीयोऽङ्कः ।

(ततः प्रविशति परिव्राजिकायाः परिचारिका ।)

परिचारिका—आज्ञप्तास्मि भगवत्या उपायनार्थं बीजपूरकं गृहीत्वागच्छेति । तद्यावत्प्रमदवनपालिकां मधुकरिकामन्विष्यामि । (परिक्रम्यावलोक्य च ।) एषा तपनीयाशोकमवलोकयन्ती मधुकरिका तिष्ठति । यावदेनामुपसर्पामि । (क)

(ततः प्रविशत्युद्यानपालिका ।)

प्रथमा—(उपसृत्य ।) मधुकरिके अपि सुखस्त उद्यानव्यापारः । (ख)

द्वितीया—अहो समाभृतिका । सखि स्वागतं ते । (ग)

समा०—सखि भगवत्याज्ञापयति । अरिक्तपाणिनास्मादृशजनेन तत्रभवती देवी द्रष्टव्या । तद्बीजपूरकेण शुश्रूषितुमिच्छामीति । (घ)

मधुक०—ननु संनिहितं बीजपूरकम् । कथय तावदन्योन्यसंघर्षितयोर्नाट्याचार्ययोरुपदेशं दृष्ट्वा कतरो भगवत्या प्रशंसित इति । (ङ)

(क) आणत्तम्हि भअवदीए उवाअणत्थं बीअऊरअं गेण्हिअ आअच्छात्ति । ता जाव पमदवणपालिअं महुअरिअं अण्णेसामि । एसा तवणीआसोअं ओलोअन्ती महुअरिआ चिट्ठदि । जाव णं उवसप्पामि । (ख) महुअरिए अवि सुहो दे उज्जाणव्वावारो । (ग) अम्हो समाभुदिआ । सहि सागदं ते । (घ) हला भगवदी आणवेदि । अरित्तपाणिणा अम्हारिसजणेण तत्तहोदी देवी देक्खिदव्वा । ता बीअपूरएण सुस्सूसिदुं इच्छामित्ति । (ङ) णं संणिहिदं बीअपूरअं । कहेहि दाव अण्णोण्णसंघंरिसिदाणं णट्टाअरिआणं उवदेसं देक्खिअ कदरो भअवदीए पसंसिदोत्ति ।

कविरिदानीमङ्कान्तरमारभमाणः कथासंघटनार्थं प्रथमं प्रवेशकं नामार्थोपक्षेपकं प्रस्तौति—**ततः प्रविशतीत्यादिना** ॥ [भगवत्या उपायनार्थं उपायनमुपहारस्तदर्थम् । बीजपूरकं मातुलिङ्गफलम् । 'फलपूरो बीजपूरो रुचको मातुलुङ्गके ।' इत्यमरः । तपनीयाशोकः तपनीयमग्नितप्तं सुवर्णं तेन पीतरक्तत्वं लक्ष्यते । तादृशकुसुमः अशोकः । उद्यानव्यापारः उद्यानपालनकर्म । **अरिक्तपाणिनेति** । आचारप्राप्तमेतत् । तदुक्तम्-'रिक्तपाणिस्तु नोपेयाद्राजानं देवतां गुरुम् ।' इति । शुश्रूषितुं सभाजयितुमित्यर्थः । अन्योन्यसंघर्षितयोः अन्योन्यन स्पर्धमानयोः । संघर्षोऽनयोः संजातः संघर्षितौ ।]

---

१ ०का समाहितिका. २ जहा समाभुदिए, समाहिदिए देवीए उवा०, देवस्स उववणत्थं (उपवनस्थं). ३ अन्ती चिट्ठदि; आलोअन्ती (आलोकमाना). ४ संमावेमि. ५ आलि. ६ परहुदिआ [परभृतिका]. ७ पेक्खिदं [प्रेक्षितुं]. ८ जेण बीअ. ९ अस्मात्परं—दुवेणंपि संगीदओवदेसणिमित्तं इत्याधिकं पुस्तकान्तरे. १० संघट्टितयोः.

समा०—द्वावपि किलागमिनौ प्रयोगनिपुणौ च। किं तु शिष्या-गुणविशेषेणोन्नमितो गणदासः। (क)

मधु०—अथ मालविकागतं कौलीनं किं श्रूयते। (ख)

समा०—बलवत्खलु साभिलाषो तस्यां भर्ता। केवलं देव्या धारिण्याश्चित्तं रक्षन्नात्मनः प्रभुत्वं न दर्शयति। मालविकाप्येषु दिवसेष्वनुभूतमुक्तेव मालतीमाला म्लायमाना लक्ष्यते। अतःपरं न जाने। विसृज माम्। (ग)

मधु०—एतच्छाखावलम्बितं बीजपूरकं गृहाण। (घ)

समा०—(नाट्येन गृहीत्वा।) सखि त्वमप्यतः पेशलतरं साधुजनशुश्रूषायाः फलमनुभविष्यसि। (इति प्रस्थिता।) (ङ)

मधु०—सखि सममेव गच्छावः। अहमप्यस्य चिरायमाणकुसुमोद्गमस्य तपनीयाशोकस्य दोहदनिमित्तं देव्यै विज्ञापयामि। (च)

(क) दुवेवि किल आअमिणा पओअणिउणा अ। किं तु सिस्सागुणविसेसेण उण्णमिदो गणदासो। (ख) अह मालविआगदं कोलीणं किं सुणीअदि (ग) बालियं क्खु साहिलासो तस्सिं भट्टा। केवलं देवीए धारिणीए चित्त रक्खन्तो अत्तणो पहुत्तणं ण दंसेदि। मालविआवि इमेसु दिअहेसु अणुहूदमूत्ता विअ मालदीमाला मिलाअमाणा लक्खीअदि। अदो वरं ण जाणे। विसज्जेहि मं। (घ) एदं साहावलम्बिदं बीअपूरअं गेण्ह। (ङ) हलां तुमं वि अदो पेसलदरं साहुजणसुस्सूसाए फलं अणुभविस्ससि। (च) सहि समं जेव्व गच्छम्ह। अहं वि इमस्स चिराअमाणकुसुमोग्गमस्स तवणीआसोअस्स दोहलनिमित्तं देवीए विण्णवेमि।

[आगमः नाट्यशास्त्रज्ञानमनयोर्विद्यते तौ आगमिनौ। प्रयोगे लास्योपदेशे निपुणौ। उन्नमित उत्कर्षितः। मालविकागतं मालविकासंबद्धं। कौ पृथिव्यां लीनं कुत्सितत्वात् कुलीनं तस्य भावः] कौलीनं लोकवार्ता [लोकापवाद इति यावत्]। चित्तं चेतोविकारं रक्षन् हृदयव्यथां परिहरन्निति यावत्। प्रभुत्वं न दर्शयति देवीं विगणय्य मालविकां न परिगृह्णाति। आदौ अनुभूता उपभुक्ता शिरसि धारिता च पश्चान्मुक्ता उत्सृष्टा च अनुभूतमुक्ता। मालतीमाला जातिकुसुमस्रक्। 'सुमना मालती जातिः' इत्यमरः। पेशलतरं सुन्दरतरम्। साधुजनः परिव्राजिका। शुश्रूषा तस्यै बीजपूरकदानम्। चिरायमाणः विलम्बितः कुसुमोद्गमः पुष्पप्रसवो यस्य। दोहदनिमित्तं दोहदपूरणप्रयोजनम्। यद्वा। पूरणार्थम्। दोहदोऽत्र चरणताडनापेक्षा। तदुक्तम्-' पादाहतः प्रमदया


---

१ उण्णमिदोपदेसो; गणदासो उण्णमिदो उवदेसे; मालविआए उवदेसो पसंसिदो; सिस्साए मालविआए गुणविसेसेण गणदासस्य उवदेसो पसंसिदो। २ कहं. ३ विढं-बाहं-किल; बाढं. ४ किं तु केवलं; चित्तं रक्खिदुं अहिलासदंसणेण; ५ रक्खमाणो. ६ अम्हइं दिअहाइं. ७ देवीए राक्खीअदि इत्य० ८ ०लम्बि. ९ तह (इति नाट्येन बीजपूरकं गृहीत्वा।) हला. १० पावेहि (प्राप्नुहि); पाविदा होदि (प्राप्ता भव). ११ हला. १२ णिवेदेमि.

समा०—युज्यते । अधिकारः खलु तव । (क)

(इति निष्क्रान्ते ।)

प्रवेशकः ।



(ततः प्रविशति कामयमानावस्थो राजा विदूषकश्च ।)

राजा—(आत्मानं विलोक्य ।)

शरीरं क्षामं स्यादसति दयितालिङ्गनसुखे
भवेत्सास्रं चक्षुः क्षणमपि न सा दृश्यत इति ।
तया सारङ्गाक्ष्या त्वमसि न कदाचिद्विरहितं
प्रसक्ते निर्वाणे हृदय परितापं वहसि किम् ॥ १ ॥

विदूषकः—अलं भवतो धीरतामुज्झित्वा परिदेवितेन । दृष्टा खलु मया तत्रभवत्या मालविकायाः प्रियसखी बकुलावलिका । श्राविता च मया यद्भवता संदिष्टम् । (ख)

राजा—ततः किमुक्तवती ।

विदूषकः—विज्ञापय भर्तारम् । अनुगृहीतास्म्यनेन नियोगेन

(क) जुज्जइ । अहिआरो क्खु तुह । (ख) अलं भवदो धीरदं उज्झिअ परिदेविदेण । दिट्ठा क्खु मए तत्तहोदीए मालविआए पिअसही बउलावलिआ । सुणाविदा अ मह जं भवदा संदिट्ठं ।

विकसत्यशोकः ।' इति । **प्रवेशकः**—'यस्तु प्रयोगबाहुल्यादङ्केऽर्थो न समाप्यते । बहुवृत्तान्तोऽल्पकथैः स विधेयः प्रवेशकैः॥' तल्लक्षणम्—'प्रवेशकोऽनुदात्तोक्त्या नीचपात्रप्रयोजितः ॥ अङ्कद्वयान्तर्विज्ञेयः शेषं विष्कम्भके यथा' ॥ इति साहित्यदर्पणे । 'नोत्तममध्यमपुरुषैराचितो नाप्युदात्तवचनकृतः । प्राकृतभाषाचारः प्रवेशको नाम विज्ञेयः॥' इति भरतश्च ।] **ततः प्रविशतीत्यादि** । कामयमानावस्थः कामयमानानां [कामिनामवस्थेवावस्था दशा यस्य स तथोक्तः]॥ **शरीरमित्यादि** । दयितालिङ्गनसुखे प्रियाभिष्वङ्गसौख्येऽसत्यविद्यमाने सति शरीरं वपुः क्षामं स्यात्कृशं भवेत् । क्षणमपि क्षणमात्रमपि सा मालविका न दृश्यत इति न लक्ष्यत इति चक्षुः सास्रं सबाष्पं भवेत्स्यात् । हे हृदय चित्त [सारङ्गस्य इव आक्षिणी यस्याः सा तया] सारङ्गाक्ष्या हरिणनेत्रया तया मालविकया कदाचिज्जातु विरहितं वियुक्तं नासि न भवसि । अतस्तस्मात्कारणान्निर्वाणे सुखे प्रसक्ते प्रस्तुते सति किं किमर्थं परितापं संतापं [वहसि धारयसि] व्रजसि प्राप्नोषि । [एतेन चिन्ता नाम व्यभिचारी भाव उक्तः । तदुक्तं—'ध्यानं चिन्तेहितानाप्तेः शून्यताश्वासतापकृत ।' इति । शिखरिणी वृत्तम्]॥ १ ॥ [धीरतां मनःस्थैर्यं त्यक्त्वा धीरतयाऽवसरपरिपालनम-

१ मन्दं. २ व्रजसि, भजसि. ३ सुणाविदो अअं अत्थो; सुणाविदा अ तं अत्थं भवदा संदिट्ठम् ।

किं तु सा तपस्विनी देव्याधिकतरं रक्ष्यमाणा नागरक्षित इव निधिर्न सुखं समासादयितव्या। तथापि घटयिष्यामीति। (क)

राजा—भगवन् संकल्पयोने प्रतिबन्धवत्स्वपि[1] विषयेष्वभिनिवेश्य[2] किं तथा प्रहरसि यथा जनोऽयं कालान्तरक्षमो न भवति। (सविस्मयम्।)

क रुजा हृदयप्रमाथिनी क च ते विश्वसनीयमायुधम्।
मृदु तीक्ष्णतरं यदुच्यते तदिदं मन्मथ दृश्यते त्वयि ॥ २ ॥

विदूषकः—ननु भणामि तस्मिन्साधनीये कृत उपक्षेप इति। तत्पर्यवस्थापयतु भवानात्मानम्। (ख)

राजा—अथेमं दिवसशेषमुचितव्यापारपराङ्मुखेन[3] चेतसा क नु खलु यापयामि[4]।

(क) विण्णवेहि भट्टारं। अणुगहिदम्हि इमिणा णिओएण। किं दु सा तवस्सिणी देवीए अहिअदरं[5] रक्खीअमाणा[6] णाअरक्खिदो विअ[7] णिही ण सुहं समासादइदव्वा। तहवि घटइस्सं ति। (ख) णं भणामि तस्सिं साहणिज्जे[8] किदो उवक्खेओत्ति[9]। ता पज्जवत्थावेदु भवं अप्पाणं।]

कृत्वेत्यर्थः। परिदेवितेन विलापेन। नागरक्षितः नागेन सर्पेण रक्षितः निधिः भूम्यादौ निहितः द्रव्यसंचयः। अतिलुब्धो हि मरणादूर्ध्वं नागो भूत्वा स्वद्रव्यनिधेः रक्षणं करोतीति लोकवादः।] **सा तपस्विनी** इति–अत्र तपस्विनीति करुणापात्रमुच्यते। 'तपस्वी करुणापात्रम्' इति हलायुधः। अत्र प्राप्तिसंभावनया प्राप्त्याशा नाम तृतीयावस्था सूचिता। अनया प्राप्त्याशया बिन्दोः समन्वयाद्गर्भसंधिरिति मन्तव्यम् ॥ [संकल्पः योनिरुद्भवो यस्य स संकल्पयोनिः मदनः तत्संबुद्धिः। प्रतिबंधवत्सु विघ्नवत्सु। अभिनिवेश्य बलवन्नियोज्य। कालान्तरक्षमः विलम्बासहः]। **क रुजेत्यादि**। [हृदयं प्रमथ्नातीति हृदयप्रमाथिनी चित्तस्थैर्योन्माथिनी रुजा व्यथा क। तव विश्वसनीयं कुसुममयत्वादपीडाकरत्वेन विश्वासार्हं आयुधं क। कशब्दद्वयमुभयोरत्यन्तं विरुद्धत्वं दर्शयति। लोके मृदु सुकुमारं वस्तु तीक्ष्णतरं अतिप्रखरमिति यदुच्यते तदिदं त्वयि दृश्यते प्रतीयते। तवायुधस्य मृदुत्वेऽपि कार्यस्य तीक्ष्णत्वादिति भावः। अत्र हेतुकार्ययोः मृदुत्वसंतापरूपविरुद्धगुणोत्पत्तिप्रतिपादनाद्विषमालङ्कारः। वियोगिनी (वैतालीयं) वृत्तम् ॥ २ ॥ साधनीये मालविकाप्राप्तिरूपे। उपक्षेपः आरम्भः। पर्यवस्थापयतु संस्तम्भयतु। धैर्यमवलम्ब्येति शेषः] अत्र 'कृत उपक्षेपः' इत्यनेन कपटोपायकल्पनाया गम्यमानत्वेन

१ °वत्सु चापि, °वस्तुष्वपि. २ °वेशकारी, निवेशिनं मां. ३ विमुखेन. ४ गमयामि. ५ अहिअं. ६ रक्खन्तीए. ७ मणी विअ. ८ साह° कज्जे. ९ उवाओप° (उपायोप°).

विदूषकः—नन्वद्यैव प्रथमं वसन्तावतारसूचकानि रक्ताशोककुसुमान्युपायनं प्रेष्य नववसन्तोत्सवापदेशेन इरावत्या निपुणिकामुखेन प्रार्थितो भवानिच्छाम्यार्यपुत्रेण सह दोलाधिरोहणमनुभवितुमिति । भवताप्यस्यै प्रतिज्ञातम् । तत्प्रमदवनमेव गच्छावः । (क)

राजा—न क्षममिदम् ।

विदूषकः—कथमिव । (ख)

राजा—वयस्य निसर्गनिपुणाः स्त्रियः । कथं मामन्यसंक्रान्तहृदयमुपलालयन्तमपि ते सखी न लक्षयिष्यति । अतः पश्यामि ।

उचितः प्रणयो वरं विहन्तुं बहवः खण्डनहेतवो हि दृष्टाः ।
उपचारविधिर्मनस्विनीनां न तु पूर्वाभ्यधिकोऽपि भावशून्यः ॥३॥

विदूषकः—नार्हति भवानन्तःपुरप्रतिष्ठितं दाक्षिण्यमेकपदे पृष्ठतः कर्तुम् । (ग)

(क) णं अज्ज एव्व पुढमं[2] वसन्दावदारसूअआणि[3] रत्तासो[4]अकुसुमाइं उवाअणं पेसिअ णववसन्दू[5]सवावदेसेण इरावदीए णिउणिआमुहेण पत्थिदो भवं इच्छामि अज्जउत्तेण सह दोलाहिरोहणं अणुहविदुं ति । भवदावि से पडिण्णादं । ता पमदवणं एव्व गच्छम्ह । (ख) कहं विअ । (ग) णारुहदि भवं[6] अन्तेउरपडिट्ठिदं दक्खिण्णं एक्कपदे पिट्ठदो कादुम् ।

अभूताहरणं नाम संध्यङ्गमुक्तं भवति ॥ [पाठान्तरे सुभगानि सुन्दराणि । कुरबकाणि कुरण्टकपुष्पाणि । अपदेशेन मिषेण । क्षमं कर्तुं योग्यम् । निसर्गनिपुणाः प्रकृत्या पटुमतयः परभावावबोधे कुशला इत्यर्थः । अन्यस्यां संक्रान्तं हृदयं प्रेम यस्य तम् । उपलालयन्तमुपच्छन्दयन्तं बाह्यतः प्रीत्याविष्करणेनानुकूलयन्तमित्यर्थः ।] उचित इति । प्रणय इरावत्याः प्रार्थना विहन्तुं प्रतिषेद्धुमुचितोऽर्हो वरं मनाक्प्रियम् । अयं पक्षः किंचित्साधुरित्यर्थः । हि यस्मात्कारणात्खण्डनहेतव ईर्ष्याकोपकारणानि बहवोऽनेके दृष्टाः । [मया लक्षिताः । प्रणयभङ्गे बहूनि कारणानि कथयितुं सुलभानीति भावः ।] खण्डनहेतुदर्शनेऽप्युपचारविशेषैः प्रलोभ्यतामित्यत आह—उपचारेति । भावशून्यः प्रेमरहित उपचारविधिरिष्टाचरणं पूर्वाभ्यधिकोऽपि मनस्विनीनां तु प्रशस्तमनसां पुनः । विवेकवतीनामित्यर्थः । उपचारविधिर्न भवति । किं त्वपचारविधिरित्यर्थः । [अत्र नञर्थस्तद्विरोधः । यद्वा तु किं तु पूर्वाभ्यधिकोपि मनस्विनीनामुपचारविधिः सेवाप्रकारः भावशून्यः वास्तवप्रेमरहितः न वरमिति योज्यम् । अत्र मनागपि प्रियत्वाभावे भावशून्य इति पदं हेतुरिति पदार्थहेतुकं काव्यलिङ्गमलंकारः । औपच्छन्दसिकं वृत्तम् ॥]॥३॥ अन्तःपुरप्रतिष्ठितमवरोधस्त्रीषु चिररूढम् । दाक्षिण्यस्य छन्दोवर्तिनः भावः दाक्षिण्य-

---

१ नु. २ वसन्दपुढभाव०; वसन्त इति नास्ति क्वचित्. ३ सुहआणि (सुभगानि) ४ सोअकोरआणि. ५ ०दावदाराव०; ०न्दारन्नवदेसेण, ६ भवं सव्वं.

राजा—(विचिन्त्य ।) तेन हि प्रमदवनमार्गमादेशय ।

विदूषकः—इत इतो भवान् । (क)

(उभौ परिक्रामतः ।)

विदूषकः—वसन्तः किलैताभिः पवनचलिताभिः पल्लवाङ्गुलीभिस्त्वरयतीव भवन्तमेतत्प्रमदवनं प्रविशेति । (ख)

राजा—(स्पर्शसुखं रूपयित्वा ।) अभिजातः खलु वसन्तः । सखे पश्य ।

आमत्तानां श्रवणसुभगैः कूजितैः कोकिलानां
सानुक्रोशं मनसिजरुजः सह्यतां पृच्छतेव ।
अङ्गे चूतप्रसवसुरभिर्दक्षिणो मारुतो मे
सान्द्रस्पर्शः करतल इव व्यापृतो माधवेन ॥ ४ ॥

विदूषकः—प्रविश निर्वृतिलाभाय । (ग)

(उभौ प्रविशतः ।)

विदूषकः—भो वयस्य अवधानेन तावद् दृष्टिं देहि । एतत्खलु

(क) इदो इदो भवं । (ख) वसन्दो किल एदाहिं पवणचलिदाहिं पल्लवङ्गुलीहिं तुवरेदि विअ भवन्तं एदं पमदवणं पविसत्ति । (ग) पविस णिव्वुदिलाहाअ ।

मनुवृत्तिः । तदुक्तं–'दाक्षिण्यं चेष्टया वाचा परचित्तानुवर्तनम् ।' इति । पृष्ठतः कर्तुं विहातुमित्यर्थः । अभिजातः कुलीनस्तस्य दाक्षिण्यात् । यद्वा पण्डितः सेवावसरज्ञानात् । 'अभिजातः कुलीने स्यान्न्याय्यपण्डितयोस्त्रिषु ।' इति मेदिनी ।] **आमत्तानामित्यादि** । [आमत्तानां मधुप्रवृत्तेः प्रीतानामीषत्क्षीबाणां वा । 'हृष्टो मत्तस्तृप्तः प्रह्लन्नः प्रमुदितः प्रीतः ।' 'मत्ते शौण्डोत्कटक्षीबा' इति चामरः । कोकिलानां परभृतानां श्रवणसुभगैः श्रुतिसुखैः कूजितैः रुतैः मनसिजरुजः कामव्यथायाः सह्यतां सोढुं शक्यतां कियत्सह्यते इति यावत । अनुक्रोशेन सहितं यथा तथा सानुक्रोशं सदयम् । 'कृपा दयाऽनुकम्पा स्यादनुक्रोशोपि' इत्यमरः । पृच्छता माधवेन वसन्तेन । चूतानामाम्रवृक्षाणां प्रसवैः कुसुमैः सुरभिः रम्यगन्धः सान्द्रः घनः स्निग्धो वा स्पर्शो यस्य स तथा । दक्षिणः मारुत पवनः करतल इव व्यापृतः व्यापारितः । संचारित इत्यर्थः । रुग्णस्य हि करतलेन स्पर्शः सुखावहः । "अत्र मारुते सखिकार्येण तद्व्यवहारारोपणात्समासोक्तिः । पृच्छतेवेत्यत्र क्रियोत्प्रेक्षा । करतल इति द्रव्योत्प्रेक्षा चेत्येतेषां संकरः" इति अ० राशि० । [मन्दाक्रान्ता वृत्तम्] ॥४॥ दृष्टिं देहि विलोकय । विलोभयितुमाक्रष्टुं कामो यस्याः सा तया । युवतिवेषस्य लज्जायितृकं लज्जाकरम् । ततोपि

---

१ स्पर्शं निरूप्य. २ उन्म०. ३ एदं पमदवणं पवणदरचलाहिं...भवन्दं पवेसिदुं, णं एदं पम० पवणचल–पवनद(–चलाहिं...भवं पवि—सद्धत्ति; णं एदं पम० पवणचलच०;णं एदं......पवणचलिदाहिं...भवन्तं । ता पविसदु भवं. ४ एहि पविस.

भवन्तमिव विलोभयितुकामया मधुलक्ष्म्या युवतिवेषलज्जायितृकं वसन्तकुसुमनेपथ्यं गृहीतम् । (क)

राजा—ननु[1] विस्मयादवलोकयामि ।

रक्ताशोकरुचा विशेषितगुणो बिम्बाधरालक्तकः
प्रत्याख्यातविशेषकं कुरवकं श्यामावदातारुणम् ।
आक्रान्ता तिलकक्रिया च तिलकैर्लग्नद्विरेफाञ्जनैः
सावज्ञेव मुखप्रसाधनविधौ श्रीर्माधवी योषिताम् ॥ ५ ॥

(उभौ उद्यानशोभां निर्वर्णयतः[4] ।)

(ततः प्रविशति पर्युत्सुका मालविका ।)

माल०—अविज्ञातहृदयं भर्तारमभिलषन्त्यात्मनोऽपि तावल्लज्जे । कुतो विभवः स्निग्धस्य सखीजनस्येमं वृत्तान्तमाख्यातुम् । न जानेऽप्रतीकारगुरुकां वेदनां कियन्तं कालं मदनो मां नेष्यतीति । (कतिचित्पदानि[5] गत्वा ।) कुत्र नु प्रस्थितास्मि । (विचिन्त्य[6] ।) आम् संदिष्टास्मि देव्या । गौतमचापलाद्दोला-

(क) भो वअस्स अवहाणेण दाव दिट्ठिं देहि । एदं खु भवन्तं विअ विलोहइदुकामाए महुलच्छीए जुवइवेसलज्जइत्तअं वसन्तकुसुमणेवत्थं गहीदं ।

चारुतरमित्यर्थः । वसन्तकुसुमान्येव नेपथ्यं वेषः वसन्तकुसुमनेपथ्यं गृहीतम् ।] रक्ताशोकेत्यादि बिम्बाधरे । बिम्बमिवाधरस्तस्मिन् । 'विशेषणं विशेष्येण बहुलम्' इति विशेषणसमासः । 'उपमितं व्याघ्रादिभिः सामान्याप्रयोगे' इत्युपमितसमासस्तु कविभिरत्र प्रायेण नाङ्गीकृतः । [यद्वा बिम्बतुल्यः बिम्बाकारो वा अधरः । शाकपार्थिवादित्वात्समासः । तदुक्तं वामनेन बिम्बाधर इति वृत्तौ मध्यमपदलोपिन्याम् । इति] अलक्तको लाक्षा । रक्ताशोकरुचा रक्ताशोककुसुमस्य रुचा कान्त्या विशेषितगुणः । विशेषितोऽतिशयितस्तिरस्कृतो गुणो रागो यस्य स तथोक्तः । श्यामावदातारुणम् । श्यामं च तदवदातं [सितं] अरुणं च तत्तथोक्तम् । ' 'वर्णो वर्णेन' इति कर्मधारयः । कुरवकं कुरवकपुष्पं प्रत्याख्यातविशेषकं प्रत्याख्यातं तिरस्कृतं विशेषकं पत्रभङ्गो येन तथोक्तम् । लग्नद्विरेफाञ्जनैः लग्नः सक्तो द्विरेफो भ्रमर एवाञ्जनं येषु तैस्तिलकैस्तिलककुमुमैस्तिलकक्रियापि तिलकस्य ललाटिकायाः क्रियापि आक्रान्ता उल्लङ्घिता । परिभूतेत्यर्थः । माधवी मधुसंबन्धिनी श्रीर्लक्ष्मीः । शोभेत्यर्थः । योषितां स्त्रीणां मुखप्रसाधनविधौ मुखालंकारकरणे सावज्ञेव अवमानेन सहितेव । अवमाननां कृतवतीवेत्यर्थः । [उत्प्रेक्षालंकारः । शार्दूलविक्रीडितं वृत्तम्] ॥ ५ ॥ [अविज्ञातं हृदयं हृद्गतो भावः यस्य तम् । आत्मनः स्वहृदयादपीत्यर्थः लज्जे । धाष्टर्यादिति भावः । विभवः सामर्थ्यम् । सखीजनस्य चतुर्थ्यर्थे षष्ठी । अविद्यमानः प्रतीकारः प्रतिक्रिया यस्याः सा अप्रतीकारा अत एव गुरुका दुःसहा । अप्रतीकारा चासौ गुरुका च इति वा । ताम् । आमिति स्मरणे । गौतमस्य विदूषकस्य चापलात्

१ (विस्मयात्) एनद० २ ०लता।वि०. ३ लीन. ४ उभौ नाट्येनो०; निरूपयतः, ५ इति काति०. ६ इति स्मृतिमभिनीय, आत्मगतम्. ७ यथा...मालविके गौतमचापल्यादोलायाः परिभ्रष्टाहम् । तस्मान्न शक्नोमि चरणौ चालयितुम् । त्वं...दर्शयेत्ततोहं अभिलाषदापयितृपदं दास्यामि. ८ पमदवणले० ९ ०लज्जापइत्तअं.

परिभ्रष्टायाः सरुजौ मे चरणौ । त्वं तावद्गत्वा तपनीयाशोकस्य दोहदं निर्वर्तय । यद्यसौ पञ्चरात्राभ्यन्तरे कुसुमं दर्शयति ततोऽहं—(अन्तरा निःश्वस्य ।)-अभिलाषपूरयितृकं प्रसादं दास्यामीति । यावन्नियोगभूमिं प्रथमं गता भवामि । यावदनुपदं मम चरणालंकारहस्तया बकुलावलिकया-गन्तव्यं परिदेवयिष्ये तावद्विस्रब्धं मुहूर्तकम् । (इति परिक्रामति ।) (क)

विदूषकः—(दृष्ट्वा ।) ही ही इयं खलु शीधुपानोद्वेजितस्य मत्स्यण्डिका उपनता । (ख)

राजा—अयि किमेतत् ।

विदूषकः—एषा खलु नातिपर्याप्तवेषा पर्युत्सुकेवैकाकिनी मालविका अदूरे वर्तते । (ग)

(क) अविण्णाहिहिअअं भट्टारं अहिलसन्ती अत्तणो वि दाव लज्जेमि । कुदो विहवो सिणिद्धस्स सहीजणस्स इमं वुत्तन्तं आचक्खिदुं । ण जाणे अप्पडिआर-गुरुअं वेअणां केत्तिअं कालं मअणो-मं णइस्सदित्ति । कहिं णु पत्थिदह्मि । आम् । संदिठ्ठह्मि देवीए । गोदमचावलादो दोलापरिभट्ठाए सरुजा मे चलणा । तुमं दाव गदुअ तवणीआसोअस्स दोहलं णिवट्टेहि । जदि सो पञ्चरत्तब्भन्तरे कुसुमं दंसेदि तदो अहं अहिलासपूरइत्तअं पसादं दाइस्सं ति । जाव णिओअभूमिं पुढमं गदा होमि । जाव अणुपदं मम चलणालंकारहत्थाए बउलावलिआए आअन्तव्वं परिदेवइस्सं ताव वीसद्धं मुहुत्तअं । (ख) ही ही इअं खु सीहुपाणुव्वेजिदस्स मच्छण्डिआ उवणदा । (ग) एसा क्खु णादिर्पज्जत्तवेसा पज्जुसुआ विअ एआइणी मालविआ अदूरे वट्टदि ।

चपलत्वेन हेतुना । रुजया पीडया रुजा वा सहितौ सरुजौ । पञ्चानां रात्रीणां समाहारः पञ्चरात्रम् । 'संख्यापूर्वं रात्रम्' इति क्लीबत्वम् । तस्याभ्यन्तरे । तपनीयाशोकः पीतरक्ताशोकः । नियोगस्य दोहदपूरणस्य भूमिं स्थानम् । यत्राशोकः स्थितः तां भूमिमित्यर्थः । यावत् गता भवामि गमिष्यामि ।] 'यावत्पुरानिपातयोर्लट्' इति भविष्यदर्थे लट् । [चरणयोः अलंकाराः यावकनूपुरादयः हस्ते यस्याः सा तथोक्ता तया । परिदेवयिष्ये विलपिष्यामि । विस्रब्धं निःशङ्कं यथा तथा । केनाप्यलक्षितेत्यर्थः । सीधुपानेन आसवपानेन उद्वेजितस्य उद्भ्रान्तस्य । 'उद्वेग उद्भ्रमः' इत्यमरः ।] मत्स्यण्डिका नाम शर्कराविशेषः । [तदुक्तं वैद्यके—'मत्स्यण्डिका खण्डसिताः क्रमेण गुणवत्तमाः । वालुकेव भृशं सूक्ष्मा सुस्निग्धा सितपिङ्गला ॥ मत्स्याण्डाकृतिसादृश्ययोगान्मत्स्यण्डिका स्मृता ॥' इति । अजीर्णामृतमञ्जर्यां च—'मदयति न हि मद्यं जातुचित्पीतमद्यं पिबति घृतसमेतां शर्करामेव सद्यः ।' इति । नातिपर्याप्तः विपुलः वेषो यस्याः सा नातिपर्याप्तवेषा परिमि-

१ अणभिण्णाद. २ भट्टारअं. ३ सिणिद्धसही. ४ क्खु, णु क्खु. ५ अदि॰ ६ ताजाव, नाव. ७ वअस्स एदं खु. ८ परिक्खिद (परिष्कृत).

राजा—(सहर्षम् ।) कथं मालविका ।

विदूषकः—अथ किम् । (क)

राजा—शक्यमिदानीं जीवित[1]मवलम्बितुम् ।

त्वदुपलभ्य समीपगतां प्रियां हृदयमुच्छ्वसितं मम विक्लवम् ।
तरुवृ[2]तां पथिकस्य जलार्थिनः सरितमारसितादिव सारसात् ॥ ६ ॥

अथ क्व तत्रभवती ।

विदूषकः—एषा ननु तरुराजिमध्यान्निष्क्रान्ता इत एव परिवर्तमाना दृश्यते । (ख)

राजा—(विलोक्य सहर्षम् ।) वयस्य पश्याम्येनाम् ।

विपुलं नितम्ब[3]बिम्बे मध्ये क्षामं समुन्नतं कुचयोः ।
अत्यायतं नयनयोर्मम जीवितमेतदायाति ॥ ७ ॥

सखे पूर्वस्मा[4]दवस्थान्तरमुपा[5]रूढा तत्रभवती । तथा हि ।

शरकाण्डपाण्डुगण्डस्थलेयमाभाति परिमिताभरणा ।
माधवपरिणतपत्रा कतिपयकुसुमेव कुन्दलता ॥ ८ ॥

विदूषकः—एषापि भवानिव मदनव्याधिना परामृष्टा भविष्यति । (ग)

(क) अह इं । (ख) ऐ[6]सा णं तरुराइमज्झादो णिक्कन्ता इदो एव्व पँ[7]रिवट्टन्ती दीसइ । (ग) एसा वि भवं विअ मअणव्वाहिणा परामिट्ठा[8] भविस्सदि ।

तालंकारयुतेत्यर्थः । नातिपरिष्कृतवेषेति पाठे नातिपरिष्कृतः नात्युज्ज्वलः वेषो यस्याः
इत्यर्थः । शीधुपानमासवपानं तेन उद्वेजितस्य निर्विण्णस्य ।] त्वदुपलभ्येत्यादि ।
[समीपगतां प्रियां प्रिया आसन्नवर्तिनीति त्वदुपलभ्य ज्ञात्वा मम विक्लवं मदनव्यथा-
विह्वलं हृदयमुच्छ्वसितं समाश्वासितम् । हर्षेण स्फीतमिति वाचस्पतिः । जलार्थिनो
जलपानेच्छोः पथिकस्य पान्थस्य आरासितात् शब्दितात् । सरसि भवः सारसः पक्षिभेदः
तस्मात्तरुवृतां वृक्षच्छन्नां सरितमुपलभ्य इव यथा हृदयं उच्छ्वसितं प्रसन्नं भवति तथा ।
उपमालंकारः । द्रुतविलम्बितं वृत्तम्] ॥६॥ अत्र संचिन्त्यमानार्थस्य प्राप्तेः क्रमो नाम
संध्यङ्गमुक्तं भवति ॥ विपुलमिति । [नितम्बबिम्बे श्रोणिफलके विपुलं विशालम् ।
विपुलनितम्बवदित्यर्थः । एवमग्रेऽपि । मध्ये क्षामं कृशम् । क्षायो मः इति निष्ठातस्य मः ।
तनुमध्यमित्यर्थः । एतज्जीवितमेवायाति इत्युत्प्रेक्षा] ॥७॥ शरेति । [शरः तृणविशे-
षस्तस्य काण्डः स्तम्बः तद्वत्पाण्डु धवलं गण्डस्थलं यस्याः सा । पाण्डुकपोला इत्यर्थः ।
परिमितानि आभरणानि यस्याः सा । अल्पाभरणभूषितेत्यर्थः । इयं मालविका माधवेन
वसन्तेन वैशाखेन वा परिणतानि जीर्णानि पत्राणि यस्याः सा । कतिपयानि कुसु-
मानि आभरणस्थानीयानि यस्याः सा कुन्दलतेवाभाति । पूर्णोपमालंकारः ॥८॥ परामृष्टा

---

१ आत्मानम्. २ तरुवृतं पथिकस्य विपासतः सलिलमुद्रासिता॰. ३ ॰म्बदेशे. ४ ॰स्मादतिमनोहरमवस्था॰. ५ ॰मारूढा. ६ एसा तरु॰. ७ अआच्छदि. ८ परिमिट्ठा.

राजा—सौहार्दमेव पश्यति ।

मालविका—अयं स ललितदोहदापेक्षी अगृहीतकुसुमनेपथ्य उत्कण्ठिताया ममानुकरोत्यशोकः । यावदस्य प्रच्छायशीतले शिलापट्टके निषण्णात्मानं विनोदयामि । (क)

विदू०—श्रुतं भवता । उत्कण्ठितास्मीति तत्रभवत्या मान्त्रितम् । (ख)

राजा—नैतावता भवन्तं प्रसन्नतर्कं मन्ये । कुतः ।

वोढा कुरबकरजसां किसलयपुटभेदशीकरानुगतः ।
अनिमित्तामुत्कण्ठामपि जनयति मलयवातोऽयम् ॥ ९ ॥

(मालविकोपविष्टा ।)

राजा—वयस्य इतस्तावत् । आवां लतान्तरितौ भवावः ।

विदूषकः—इरावतीमिव दूरे समर्थये । (ग)

राजा—न हि कमलिनीं दृष्ट्वा ग्राहमवेक्षते मतङ्गजः । (इति विलोकयान्स्थितः ।)

(क) अअं सो ललिअदोहलापेक्खी अग्गहीदकुसुमणेवत्थो उक्कण्ठिदाए मह अणुकरेदि असोओ । जाव से पच्छाअसीदले सिलापट्टए णिसण्णा अत्ताणं विणोदेमि । (ख) सुदं भवदा । उक्कण्ठिदम्मित्ति तत्तहोदीए मन्तिदं । (ग) इरावदिं विअ दूरे समत्थेमि ।

उपसृष्टा क्लिष्टेत्यर्थः । परिमृष्टेति पाठे अभिभूता । सौहार्दमिति–त्वं सुहृद्भावादेवं मन्यसे । ललितः चारुः दोहदः चरणताडनप्राप्तिरूपस्तमपेक्षत इत्यसौ । मालविकापक्षे दोहदः राज्ञा संगमः स्यादिति मनोरथः । अगृहीतं कुसुमान्येव नेपथ्यं येन । मालविकापक्षे अगृहीतं कुसुमनेपथ्यं पुष्पभूषणं यया । उत्कण्ठा अस्याः संजाता असौ उत्कण्ठिता । उत्कण्ठा सस्पृहा चिन्ता । 'चिन्ता तु स्मृतिराध्यानं स्मरणं सस्पृहे पुनः । उत्कठोत्कलिके' इति शब्दार्णवः । प्रकृष्टा छाया यत्र तत्प्रच्छायमत एव शीतलं यत् शिलापट्टकं तस्मिन् । प्रसन्नः विशदः । यथार्थज्ञानवानिति यावत् । तर्कः ऊहो यस्य तम् । मदर्थमेवास्या उत्कण्ठेति न निश्चिनोमीत्यर्थः ।] **वोढेत्यादि ।** [कुरबकाणां कुरण्टकपुष्पाणां रजसः परागस्य वोढा वाहकः । अनेन तस्य सौगन्ध्यं ध्वनितम् । किसलयपुटानां भेदात् गलन्तः ये शीकरा अम्बुकणास्तैरनुगतः । अनेन तस्य जडत्वं शीतत्वं च सूचितम् । मलयवातो दक्षिणवातः । नास्ति निमित्तं यस्याः सा अनिमित्ता तादृशीमुत्कण्ठाम् । प्रियाविरहादृतेपीत्यर्थः । जनयति । तस्योन्मादयितृकत्वात् आर्या छन्दः ॥९॥ कमलिनीं दृष्ट्वा तया आकृष्टः सन्नित्यर्थः मतङ्गजः हस्ती ग्राहं नक्रं नावेक्षते न गणयति तथा मालविकागतमनोरथः अहमपि इरावतीं न गणयामीति भावः । निर्गतोऽवलम्बो

---

१ भवतः प्रसन्नतर्कतां. २ अनिमित्तोत्कण्ठामपि जनयति मनसो मलयवातः. ३ सखे. ४ लब्ध्वा, कमलिनीं सरितं. ५ अपेक्षते, गणयति. ६ सउमाल (सुकुमार); ललिदसुउमार. ७ उक्कण्ठिदं मं. ८ एदस्स. ९ तत्तहोदी मन्तेदि (मन्त्रयते]. १० अदूरे.

मालविका—हृदय, निरवलम्बादतिभूमिलङ्घिनो मनोरथाद्विरम । किं मामायासयसि । (क)

(विदूषको राजानमवेक्षते ।)

राजा—प्रिये पश्य वामतां स्नेहस्य ।

औत्सुक्यहेतुं विवृणोषि न त्वं तत्त्वावबोधैकरसो न तर्कः ।
तथापि रम्भोरु करोमि लक्ष्यमात्मानमेषां परिदेवितानाम् ॥ १० ॥

विदूषकः—सांप्रतं भवतो निःसंशयं भविष्यति । एषार्पितमदनसंदेशा विविक्ते ननु बकुलावलिकोपस्थिता । (ख)

राजा—अपि स्मरेदस्मदभ्यर्थनाम् ।

विदूषकः—किमिदानीमेषा दास्या दुहिता तव गुरुकं संदेशं विस्मरिष्यति । अहमपि तावन्न विस्मरामि । (ग)

(प्रविश्य चरणालंकारहस्ता ।)

बकुलावलिका—अपि सुखं सख्याः । (घ)

माल०—अहो बकुलावलिका । सखि स्वागतं ते उपविश । (ङ)

बकुलाव०—(उपविश्य ।) सखि त्वमिदानीं देव्या योग्यतया नियुक्ता । तस्मादेकं चरणमुपनय । यावत्सालक्तकं सनूपुरं च करोमि । (च)

(क) हिअअ णिरवलम्बादो[3] अदिभूमिलंघिणो[4] मणोरहादो विरम । किं मं आआसेसि[5] । (ख) संपदं भवदो णिस्संसअं[6] भविस्सदि । एसा अप्पिदमअणसंदेसा विवित्तेणं बउलावलिआ उवट्ठिदा । (ग) किं दाणिं एसा दासीए दुहिदा[7] तुह गुरुअं संदेसं विसुमरिस्सदि[8] । अहं वि दाव[9] ण विसुमरेमि (घ) अवि सुहं सहीए । (ङ) अम्हो बउलावलिआ । सहि साअदं ते । उवविस । (च) हला तुमं दाणिं देवीए जोग्गदाए णिउत्ता । ता एक्कं[11] चलणं उवणेहि । जाव[12] सालत्तअं सणूउरं च करेमि ।

यस्य स निरवलम्बोऽनाधारस्तस्मात् । अतिभूमिलङ्घिनः अतिभूमिं गतात् । मामायास्य कस्ते लाभ इत्यर्थः ।] **औत्सुक्येत्यादि** । [औत्सुक्यहेतुमुत्कण्ठाकारणं त्वं न विवृणोषि प्रकाशयसि । तर्कः अनुमानमपि तत्त्वस्य वस्तुस्वरूपस्यावबोधो ज्ञानं स एव एको मुख्यो रसो यस्य तथा वस्तुतत्त्वनिश्चायको न भवति । तथापि हे रम्भोरु रम्भे इव ऊरू यस्याः सा तत्संबोधनम् । एषां तव परिदेवितानां विलापानामात्मानं लक्ष्यं करोमि । मामुद्दिश्यैवैतानि इति मन्ये । उपजातिर्वृत्तम्] ॥ १० ॥ [निःसंशयं संशयस्याभावः । तव सर्वः संशयः नश्येदित्यर्थः । अर्पितः मया निवेदितः मदनविषयः संदेशो यस्यै सा तादृशी । विविक्ते विजने । योग्यतया अस्मिन् दोहदपूरणकर्मणि योग्या इति । सालक्तकमलक्तकेन सहितं यावकरसरक्तम् । सनूपुरं मञ्जीरयुक्तम् ।

---

१ वामत्वं; महत्वं २ ०द्दसाव. ३ णिष्फलादो; ०म्बणादो; मणोरहादो. ४ एतन्नास्ति बहुषु पुस्तकेषु. ५ आआसिअ (आयास्य). ६ सओ. ७ सुदा. ८ दाव गुरुअं. ९ विसुमरेदि. १० ताव दाणिं एदं ण ११ दाव दाणिं, दे चलणं दोहलकरणजो० १२ जाव णं.

मालविका—(आत्मगतम्।) हृदय अलं सुखिततया अयं विभव उपस्थित इति। कथमिदानीमात्मानं मोचयेयम्। अथ वैतदेव मम मृत्युमण्डनं भविष्यति। (क)

बकुलाव०—किं विचारयसि। उत्सुका खल्वस्य तपनीयाशोकस्य कुसुमोद्गमे देवी। (ख)

राजा—कथमशोकदोहदनिमित्तोऽयमारम्भः।

विदूषकः—किं खलु न जानास्यकारणाद्देवीमामन्तःपुरनेपथ्येन न संयोजयिष्यतीति। (ग)

मालविका—सखि मर्षय तावदेनम्। (इति पादमुपहरति) (घ)

बकुला०—अयि शरीरमसि मे। (नाट्येन चरणसंस्कारमारभते।) (ङ)

राजा—

चरणान्तनिवेशितां प्रियायाः सरसां पश्य वयस्य रागरेखाम्।
प्रथमामिव पल्लवप्रसूतिं हरदग्धस्य मनोभवद्रुमस्य॥ ११॥

विदूषकः—चरणानुरूपः खलु तत्रभवत्या अधिकार उपक्षिप्तः। (च)

(क) हिअअ अलं सुहिदिदाए अअं विहवो उवट्ठिदोत्ति। कहं दाणीं अत्ताणं मोचएअं। अह वाँ एदं एव्व मम मिच्चुमण्डणं हविस्सदि। (ख) किं विआरेसि। उस्सुआ खु इमस्स तवणीआसोअस्स कुसुमुग्गमे देवी। (ग) किं खु ण जाणासि अकालणादो देवी इमं अन्तेउरणेवच्छेगण संजोइस्सदित्ति। (घ) हला मरिसेहि दाव णं। (ङ) अई सरीरअं सि मे। (च) चलणाणुरूवो क्खु तत्तहोदीए अहिआँरो उवक्खित्तो।

सुखिततया सुखमस्य संजातमिति सुखितं तस्य भावः सुखितता तया अलम्। मा सुखितं भव। अयं पुरोवर्ती विभवः दोहदपूरणार्थक आलक्तकरसनूपुरादिः उपस्थितः इति कृत्वा। मोचयेयं नियोगं कथं साधु निर्वाहयेयमित्यर्थः। मृत्युमण्डनं मृत्युकाले धारणीयोऽलंकारः भविष्यति। अस्य मदनोद्दीपकत्वाद्दुर्लभमनोरथाप्राप्तेश्च मे मरणमेव भवेदिति भावः। कथमिति प्रश्ने संभ्रमे वा। अन्तःपुरनेपथ्येन राजस्त्र्युचितवेषेण। इति जानासि इति नर्मोक्तिः। मर्षय एनं पादम्। त्वदङ्के मत्पादनिवेशनमित्यर्थः। शरी मसि मे अतो मदङ्के पादार्पणं न दोषायेति भावः।] **चरणान्तेति**। [प्रियायाः चरणान्ते निवेशितां पादाग्रप्रयुक्तां सरसामार्द्रां रागस्य लाक्षारसस्य रेखां हरदग्धस्य मनोभावः काम एव द्रुमो वृक्षस्तस्य प्रथमामग्रजातां पल्लवप्रसूतिं किसलयाङ्कुरमिव पश्य। उत्प्रेक्षालंकारः। स च मनोभवे द्रुमत्वारोपाद्रूपकेण संमिश्रः। औपच्छन्दसिकं वृत्तम्।] ॥ ११॥

---

१ (पादमुपहरन्ती) हला. २ ०शोभाम्. ३ अइ वा दाणिं. ४ मसमु०, मुउलु० [मुकलो-] ५ ण खु; ण खू जाणासि तुमं मह कालणादो...णेवच्छेण जोअइ०. ६ दाणीं. ७ अलंकारो.

राजा—सम्यग्[1]ाह भवान्

नवकिसलयरागेणा[2]ग्रपादेन बाला
स्फुरितनखरुचा द्वौ हन्तुमर्हत्यनेन ।
अकुसुमितमशोकं दो[3]हदापेक्षया वा
प्र[4]णमितशिरसं वा कान्तमार्द्रापराधम् ॥ १२ ॥

विदूषकः—प्रहरिष्यति तत्रभवती त्वामपराद्धम् । (क)

राजा—[5]प्रतिगृहीतं वचः सिद्धिदर्शिनो ब्राह्मणस्य ।

(ततः प्रविशति युक्तम[6]दा इरावती चेटी च)

इरावती—हञ्जे निपुणिके श्रृणोमि बहुशो मदः किल स्त्रीजनस्य विशेषमण्डनमिति । अपि सत्यो लोकवादोऽयम् । (ख)

निपुणिका—प्रथमं लोकवाद एव । अद्य सत्यः संवृत्तः । (ग)

इरावती—अलं स्नेहभणितेन । कुत इदानीमवगतं दोलागृहं प्रथमं गतो भर्ता इति । (घ)

निपुणिका—भट्टिन्या अखण्डितात्प्रणयात् । (ङ)

इरावती—अलं सेवया । मध्यस्थतां परिगृह्य भण । (च)

(क) [7]पहरिस्सदि तत्तहोदी तुमं अवरद्धम् । (ख) हञ्जे णिउणिए सुणामि बहुसो मदो किल इत्थिआजणस्स विशेसमण्डणं ति । अवि सच्चो लोअवादो अअं । (ग) पुढमं लोअवादो एव्व । अज्ज सच्चो संवुत्तो । (घ) अलं सिणेहभणिदेण । कुदो दाणिं [11]अवगदं दोलाघरं पुढमं गदो भट्टेति । (ङ) भट्टिणीए अखण्डिदादो पणआदो । (च) अलं सेवाए । मज्झत्थदं परिगहिअ भणाहि ।

नवकिसलयेत्यादि । [बाला मालविका नवकिसलयस्य प्रत्यग्रप्रवालस्य इव रागो रक्तिमा यस्य तेन । स्फुरिता प्रसृता नखानां रुक् यस्य तेन । अनेन । अग्रश्चासौ पादश्च तेन अग्रपादेन पादाग्रेण । द्वौ हन्तुं प्रहर्तुमर्हति । दोहदापेक्षया । कुसुमान्यस्य संजातानि असौ कुसुमितः न कुसुमितः अकुसुमितः तमशोकम् । आर्द्रः प्रत्यग्रः प्रणयकृतो वा अपराधो यस्य तं प्रणमितं पादयोः अवनमितं शिरो यस्य तं कान्तं प्रियं च । परिसंख्यालंकारः । मालिनी वृत्तम्] ॥ १२ ॥ सिद्धिं द्रष्टुं शीलमस्यासौ सिद्धिदर्शी तस्य । युक्तः संक्रान्तः मदः क्षीबता यस्याः सा । लोकवादो लोकोक्तिरेव । सांप्रतं त्वयि प्रत्यक्षदृष्टत्वाद्यथार्थः संवृत्तः । अलं स्नेहभणितेन प्रियोक्त्या ।

१ सम्यगभिहितं भवता. २ ०णार्द्र० ३ दोहला. ४ प्रणिहित. ५ मूर्ध्ना प्रति० ६ उन्मत्तवेषा. ७ चेटि. ८ परिहस्सासि तत्तहोदीए अवरद्धं. ९ अज्ज उण, दाणिं सच्चं संवुत्तं० १० अलं मह सिणेहेण. संकित्तणसंसिणा (संकीर्तनशंसिना) अलं सिणेहेण । कहेहि कुदो० ११ दाणिं ओगमिदव्वो, ०दव्वं...गदो भट्टा न वेत्ति ।

निपु०--वसन्तोपायनलोलुपेनार्यगौतमेन कथितम् । त्वरतां भट्टिनी । (क)

इरा०--(अवस्थासदृशं परिक्रम्य ।) हञ्जे मदेन क्लाम्यमानां मामार्यपुत्रदर्शने हृदयं त्वरयति । चरणौ पुनर्न मार्गे प्रसरतः । (ख)

निपु०--ननु प्राप्ते स्वो दोलागृहम् । (ग)

इरा०--निपुणिके नात्र आर्यपुत्रो दृश्यते । (घ)

निपु०--भट्टिन्यवलोकयतु । परिहासनिमित्तं कुत्रापि गूढेन भर्त्रा भवितव्यम् । आवामपीमं प्रियङ्गुलतापरिक्षिप्तमशोकशिलापट्टकं प्रविशावः । (ङ)

इरा०--(तथा करोति ।)

निपु०--(परिक्रम्य विलोक्य ।) अवलोकयतु भट्टिनी । चूताङ्कुरं विचिन्वत्योरावयोः पिपीलिकाभिर्दष्टम् । (च)

इरा०--कथमिव । (छ)

निपु०--एषा बकुलावलिका अशोकपादपच्छायायां मालविकायाः चरणालंकारं निवर्तयति । (ज)

(क) वसन्तावाअणलोलुवेण अज्जगोदमेण कहिअं । तुवरदु भट्टिणी । (ख) हञ्जे मदेण किलमिअमाणं मं अज्जउत्तदंसणे हिअअं तुवरेदि । चलणा उण ण मग्गे पसरन्ति । (ग) णं पत्तह्म दोलाघरं । (घ) णिउणिए ण एत्थ अज्जउत्तो दीसदि । (ङ) भट्टिणी ओलोएदु । परिहासणिमित्तं कहिं वि गूढेण भत्तुणा होदव्वं । अम्हे वि इमं पिअङ्गुलदापरिक्खित्तं असोअसिलापट्टअं पविसामो । (च) ओलोअदु भट्टिणी । चूदङ्कुरं विचिणन्तीणं अम्हाणं पिवीलिआहिं दंसिदं । (छ) कहं विअ- (ज) एसा वउलावलिआ असोअपाअवच्छाआए मालविआए चलणालंकारं णिव्वट्टेदि ।

अखण्डितादविच्छिन्नात्प्रणयात् प्रेम्णः अनुमीयते प्रथमं गत इति । अलं सेवया मत्प्रियार्थं चाटूक्त्या । मध्यस्थतामपक्षपातित्वम् । यथार्थं ब्रूहीत्यर्थः ।] [वसन्ते दीयमानमुपायनं स्वस्तिवाचनं वसन्तोपायनं तत्र लोलुपेन अतिलुब्धेन । अवस्थासदृशं मदानुभवदशाया योग्यं यथा तथा । न प्रसरतः मदविक्लवत्वादिति भावः । भट्टिनी अनभिषिक्ता राजभार्या एवमुच्यते । देवी कृताभिषेकायामितरासु तु भट्टिनी । इत्यमरः । प्रियङ्गुलता श्यामाख्या वली तया परिक्षिप्तम् । अशोकतले शिलापट्टमशोकशिलापट्टम् । चूताङ्कुरमिति-दष्टं दंशः कृतः । भावे क्तः । भर्तारं मृगयमाणयोरावयोः चूताङ्कुरान्वेषणपरस्य पिपीलिकादंश इव पीडाकरं माल-

---

१ चेटि. २ णं वसंतोस्सवुग०. ३ मिलाअमाणं, गिलाअमाणं (ग्लायमानं) अत्ताणं. ४ मह. ५ ओसलन्ति. ६ अदिट्ठेण. ७ किं विअ एदं.

इरा०——(शङ्कां रूपयित्वा ।) अभूमिरियं मालविकायाः । कथमत्र तर्कयसि । (क)

निपु०——तर्कयामि दोलापरिभ्रष्टया सरुजचरणया देव्या अशोकदोहदाधिकारे नियुक्ता मालविकेति । अन्यथा कथं देवी स्वयं धारितं नूपुरयुगलं परिजनस्यानुज्ञास्यति । (ख)

इराव०——महती खल्वस्याः संभावना । (ग)

निपु०——किं पुनर्नान्विष्यते भर्ता । (घ)

इरा०——हञ्जे न मे चरणावन्यतः प्रवर्तेते । मनो मम किमपि विकारयति । आशङ्कितस्य तावदन्तं गमिष्यामि । (मालविकां निर्वर्ण्य आत्मगतम् ।) स्थाने खलु कातरं मे हृदयम् । (ङ)

बकुला०——(चरणं दर्शयन्ती ।) अपि रोचते तेऽयं रागरेखाविन्यासः ॥ (च)

माल०——सखि आत्मनश्चरणगत इति लज्जे एनं प्रशंसितुम् । केन प्रसाधनकलायामभिविनीतासि । (छ)

(क) अभूमी इअं मालविआए । कहं एत्थ तक्केसि । (ख) तक्केमि दोलापरिब्भट्ठाए सरुअचलणाए देवीए असोअदोहलाहिआरे णिउत्ता मालविएति । अण्णहा कहं देवी सअं धारिअं णूउरजुउलं परिअणस्स अणुजाणिस्सदि । (ग) महदी क्खु से संभावणा । (घ) किं उण ण अण्णेसीअदि भट्टा । (ङ) हञ्जे ण मे चलणा अण्णदो पवट्टन्ति । मणो मह किंवि विआरेदि । आसङ्किदस्स दाव अन्तं गमिस्सं । ठाणे क्खु कादरं मे हिअअं । (च) अवि रोअदि ते अअं राअरेहाविण्णासो । (छ) हला अत्तणो चलणगदोत्ति लज्जेमि णं पसंसिदुं । केण पसाहणकलाए अहिविणीदासि ।

विकारदर्शनं जातमिति भावः । अभूमिः अनुचिता भूमिः स्थानम् । उत्तमस्त्रीणामेव तत्र भ्रमणाधिकारात् । रुजया सहितौ सरुजौ चरणौ यस्याः सा तथोक्ता तया । दोहदाधिकारे दोहदपूरणकर्मणि । नियुक्ता अधिकृता । अनुज्ञास्यति तद्धारणे परिजनं कथमधिकरिष्यतीत्यर्थः । संभावना बहुमानदर्शनम् । अन्यतः अस्मात्स्थानादन्यत्र । विकारयति शङ्कामुत्पादयतीत्यर्थः । आशङ्कितस्य नपुंसके भावे क्तः । मालविकायां राज्ञीपक्षपातशङ्काया इत्यर्थः । अन्तं गमिष्यामि निर्णेष्यामि । निरूप्य वीक्ष्य । स्थाने मालविकायास्तादृग्रूपसम्पत्तेः । कातरं तस्यां राजानुरागसम्भावनयेति भावः ।

---

१ मालविकायै च०. २ किं तक्केसि. ३ असाधारणं णूउर. ४ अब्भणु. ५ मणोवि; मदी में विआरेदि. ६ हला मालविए अवि. ७ चलणराअ. ८ सिप्पसाहणकलाए एव्वं. ।

बकु०—अत्र खलु भर्तुः शिष्यास्मि । (क)

विदूषकः—त्वरय तावदेनां गुरुदक्षिणायै । (ख)

माल०—दिष्ट्या न गर्वितासि । (ग)

बकु०—उपदेशानुरूपौ चरणौ लब्ध्वाद्य गर्विता भविष्यामि । (आत्मगतम् ।) हन्त सिद्धं मे दौत्यम् । (रागं विलोक्य प्रकाशम् ।) सखि एकस्य ते चरणस्यावसितो रागनिक्षेपः । केवलं मुखमारुतो लम्भयितव्यः । अथवा प्रवातमेवैतत्स्थानम् । (घ)

राजा—सखे पश्य पश्य ।

आर्द्रालक्तकमस्याश्चरणं मुखमारुतेन वीजयितुम् ।
प्रतिपन्नः प्रथमतरः संप्रति सेवावकाशो मे ॥ १३ ॥

विदूषकः—कुतस्तेऽनुशयः । चिरं भवता एतत्क्रमेणानुभवितव्यम् । (ङ)

बकु०—सखि अरुणशतपत्रमिव शोभते ते चरणः । सर्वथा भर्तुरङ्कपरिवर्तिनी भव । (च)

(इरावती निपुणिकामुखमवेक्षते)

राजा—ममेयमाशीः ।

माल०—सखि अवचनीयं मन्त्रयसे । (छ)

(क) एत्थ वखु अहं भत्तुणो सीसह्मि । (ख) तुवरेहि दाव णं गुरुदक्खिणाए । (ग) दिट्ठिआ ण गव्विदासि । (घ) उवदेसाणुरूवा चलणा लम्भिअ अज्ज गव्विदा भविस्सं । हन्त सिद्धं मे दोच्चं । सहि एक्कस्स दे चलणस्स अवसिदो राअणिक्खेवो । केवलं मुहमारुदो लम्भइदव्वो । अहवा पवादं एव्व एदं ठाणं । (ङ) कुदो दे अणुसओ । चिरं भवदा एवं कमेण अणुहविदव्वं । (च) सहि अरुणसदपत्तं विअ सोहदि दे चलणो । सव्वहा भत्तुणो अङ्कपरिवट्टिणी होहि । (छ) हला अवअणीअं मन्तेसि ।

[प्रसाधनकला अलंकरणकला । अभिविनीता शिक्षिता । गुरुदक्षिणा राज्ञे देया दक्षिणा मालविकाप्राप्तिरूपा । चरणौ लब्ध्वा रञ्जनार्थमिति शेषः । लम्भयितव्यः आर्द्ररागशोषणार्थमित्यर्थः । प्रवातं प्रकृष्टो वातः यत्र तत् । मुखवातमन्तरेणापि रागः शुष्येदित्यर्थः ।] **आर्द्रालक्तकमित्यादि** । [आर्द्रः अलक्तकः यावकरसरेखाविन्यासः यस्य तमस्या मालविकायाः चरणं] मुखमारुतेन वीजयितुं शोषयितुं [मे मम] प्रथमतरो मुख्यतरः [सेवावकाशः सेवनावसरः] प्रतिपन्नः पात्रः ॥ १३ ॥ [अनुशयः चिन्ता । शतं पत्राण्यस्य शतपत्रम् । अरुणं च तत् शतपत्रं च अरुणशतपत्रं तदिव । विकसित-

१ शोषयितुम्, शोषयतः. २ ०कामवेक्षते. ३ अहं. ४ दाणिं गुरु० ५ चलणं दाणीं. ६ अज्ज दाव. ७ ०विक्खेवो. ८ पवादो एव्व अअं पदेसो. ९ चलणं. १० मा अ० मन्तेहि.

बकुला०—मन्त्रयितव्यमेव मया मन्त्रितम् । (क)

माल०—प्रिया खल्वहं तव । (ख)

बकुला०—न केवलं मम । (ग)

माल०—कस्य वाऽन्यस्य । (घ)

बकु०—गुणेष्वभिनिवेशिनो भर्तुरपि । (ङ)

माल०—अलीकं मन्त्रयसे । एतदेव मयि नास्ति । (च)

बकु०—सत्यं त्वयि नास्ति । भर्तुः कृशेषु ईषत्परिपाण्डुरेषु दृश्यते अङ्गेषु । (छ)

निपु०—प्रथमगणितमिव हताशाया उत्तरम् । (ज)

बकु०—अनुरागोऽनुरागेण परीक्षितव्य इति सुजनवचनं प्रमाणीकुरु । (झ)

माल०—किमात्मनश्छन्देन मन्त्रयसे । (ञ)

बकु०—नहि नहि । भर्तुः खल्वेतानि प्रणयमृदुकान्यक्षराणि बिम्बान्तरितानि । (ट)

माल०—सखि देवीं विचिन्त्य न मे हृदयं विश्वसिति । (ठ)

(क) मन्तिदव्वं एव्व मए मन्तिदं । (ख) पिआ खु अहं तुह । (ग) ण केवलं मह । (घ) कस्स वा[1] अण्णस्स । (ङ) गुणेसु अहिणिवेसिणो भत्तुणो वि । (च) अलीअं मन्तेसि । एदं एव्व मइ णत्थि । (छ) सच्चं तुइ णत्थि । भत्तुणो किसेसु इसि[2]परिपण्डरेसु दसिइ अङ्गेसु । (ज) पुढम[3]गणिदं विअ हदासाए उत्तरं । (झ) अणुराओ अणुराएण परिक्खिद[4]व्वो त्ति सुअणवअणं पमाणीकरेहि । (ञ) किं अत्तणो छन्देन मन्तेसि । (ट) णहि णहि । भत्तुणो खु एदाइं पणअमि[5]दुलाइं अक्खराइं विम्बा[6]न्तरिदाइं । (ठ) हला देविं विचिन्तिअ ण मे हिअअं[7] विससदि ।

रक्ताम्भोजमिवेत्यर्थः । अभिनिवेशिनः आसक्तिमतः दृढपक्षपातिनो वा । अलीकमनृतम् । एतदेव त्वं भर्तुः प्रियेति यत्त्वयोक्तं तत् । भर्तुः कृशेषु इति । दरपाण्डुरेषु इति पाठे ईषत्पाण्डुरेषु । त्वयि बद्धभावस्य त्वामेव चिन्तयतो भर्तुरङ्गानि कृशानि जातानि । अतः तेभ्यः स्फुटं ज्ञायत एव यत्त्वं तस्य प्रियेति ।] **अनुराग इति** । [यथा त्वं तस्मिन्ननुरागवती तथा सोपि त्वयीति जानीहीत्यर्थः । छन्देन स्वचित्तानुवृत्या । बिम्बान्तरितानि शरीरान्तरसंक्रान्तानि । बिम्बं मुखं वा ।]

---

१ खु. २ दर–वर पण्डु., सुन्दरप० ३ ०भ–गु–णिदं. ४ पच्चेट्ठव्वो (प्रत्येष्टव्यः), पडिच्छिदव्वो (प्रतिच्छेत्तव्यः). ५ ०मिदुआइं (मृदुकानि), पणअमआई, पणअस्रूअआइं. ६ वन्तत्त (वक्त्रान्त०) ७ हिअअस्स पहविस्सं.

बकु०—मुग्धे भ्रमरसंबाध इति वसन्तावतारसर्वस्वं किं न चूतप्रसवोऽवतंसयितव्यः । (क)

माल०—त्वं तावद्दुर्जातेऽत्यन्तं सहाया भव । (ख)

बकु०—विमर्दसुरभिर्बकुलावलिका खल्वहम् । (ग)

राजा—साधु बकुलावलिके साधु ।

भावज्ञानानन्तरप्रस्तुतेन प्रत्याख्याने दत्तयुक्तोत्तरेण ।
वाक्येनेयं स्थापिता स्वे निदेशे स्थाने प्राणाः कामिनां दूत्यधीनाः१४

इरा०—हञ्जे पश्य । कारितैव बकुलावलिकयैतस्मिन् पदं मालविका । (घ)

निपु०—भट्टिनि निर्विकारस्याप्युत्सुकताजनक उपदेशः । (ङ)

(क) मुद्धे भमरसंबाधोत्ति वसन्तावदारसव्वस्सं किं ण चूदप्पसवो ओदंसिदव्वो । (ख) तुमं दाव दुज्जादे अच्चन्तं सहाया होहि । (ग) विमद्दसुरही बउलावलिआ खु अहं । (घ) हञ्जे पेक्ख । कारिदा एव्व बउलावलिआए एदस्सिं पदं मालविआ । (ङ) भट्टिणि णिव्विआरस्सवि उस्सुअदाजणओ उवदसो ।

भ्रमैरः सम्बाधः संकुल इति । भ्रमरपीडा स्यादिति हेतोरित्यर्थः । चूतप्रसवः आम्रमञ्जरी । न अवतंसयितव्यः कर्णपूरीकर्तव्यः किम् । अपि तु कर्तव्य एव । यथा चूतप्रसवमवतंसयितुकामः भ्रमरपीडां न गणयति तथा राजन्यनुरक्ता त्वं धारिणीं मा चिन्तयेति भावः ।] दुर्जाते दुःखे [देव्या व्यसने उत्पन्ने] । 'दुर्जातं व्यसने क्लीवमसम्यग्जातवस्तुनि ।' इति केशवस्वामी ॥ [विमर्दसुरभिः विमर्देन परिमलनेन सुरभिः सुगन्धिः बकुलानां माला । पक्षे विमर्दे सति आपदि आपतितायां सुरभिः मनोज्ञा साहाय्यकरणात् ।] भावज्ञानेत्यादि । [कस्यान्यस्य प्रिया । अलीकं मन्त्रयसे । एतदेव मयि नास्ति इति वाक्यैः मालविकायाः भावस्य प्राथमिकस्य मदनविकारस्य । 'निर्विकारात्मके चित्ते भावः प्रथमविक्रिया ।' इत्युक्तेः । अनुरागस्य इति यावत् । ज्ञानान्तरं भर्तुः कृशेषु इत्यादिना सुजनवचनं प्रमाणीकुरु इति प्रस्तुतेन वाक्येन । पुनश्च किमात्मनः छंदेन मन्त्रयसे इति तस्य प्रत्याख्याने निराकरणे कृते भर्तुः खलु एतानि इत्यादिवाक्येन दत्तमुचितं युक्तमुत्तरं यस्मिन् येन वा । तेन वाक्येन इयं मालविका स्वे निदेशे मदर्थकरणरूपे स्थापिता । भूयान् काम एषामस्तीति कामिनस्तेषां प्राणाः दूत्यधीना दूत्यायता इति यदुच्यते तत्स्थाने युक्तमेव । निसृष्टार्था इयं दूती । तदुक्तं साहित्यदर्पणे—उभयोर्भावमुन्नीय स्वयं वदति चोत्तरम् । सुश्लिष्टं कुरुते कार्यं निसृष्टार्था तु सा स्मृता ॥ इति । शालिनी वृत्तम्] ॥ १४ ॥ [पदं कारिता भर्तुरनुरागमधिकृत्य विश्वाससुत्पाद्य राजसमागमकर्मणि प्रवर्तिता इत्यर्थः । एतत्पदमिति पाठे इमं व्यवसायम् । 'पदं व्यवसितत्राण'—इत्यमरः ॥]

१ कामिनः. २ ०सम्बन्धो, संपादो भविस्सादित्ति. ३ ०सव्वरसभूदो. ४ ०पल्लवो. ५ ओदंसणिज्जो. ६ अच्चन्तसहाइणी. गच्छन्तस्स सहाइणी. ७ णु. ८ कारिदं...पदं पदं मालविआए. ९ अहिआरस्स उइदो उव० (अधिकारस्य उचित उप०)

इरा०—स्थाने खलु शङ्कितं मे हृदयम् । गृहीतार्था अनन्तरं चिन्तयिष्यामि । (क)

बकु०—एष द्वितीयोऽपि ते निर्वृत्तपरिकर्मा चरणः । यावद्द्वावपि सनूपुरौ करोमि । (इति नाट्येन नूपुरयुगलमामुच्य ।) हला उत्तिष्ठ । अनुतिष्ठ देव्या अशोकविकासयितृकं नियोगम् । (ख)

(उभे उत्तिष्ठतः ।)

इरा०—श्रुतो देव्या नियोगः । भवत्विदानीम् । (ग)

बकु०—एष उपारूढराग उपभोगक्षमः पुरतस्ते वर्तते (घ)

माल०—(सहर्षम् ।) किं भर्ता । (ङ)

बकु०—(सस्मितम् ।) न तावद्भर्ता । एषोऽशोकशाखावलम्बी पल्लवगुच्छकः । अवतंसयैनम् । (च)

विदूषकः—अपि श्रुतं भवता । (छ)

राजा—सखे पर्याप्तमेतावता कामिनाम् ।

अनातुरोत्कण्ठितयोः प्रसिध्यता समागमेनापि रतिर्न मां प्रति ।
परस्परप्राप्तिनिराशयोर्वरं शरीरनाशोऽपि समानुरागयोः ॥ १५ ॥

(क) ठाणे खु संकिदं मे हिअअं । गहीदत्था अणन्तरं चिन्तइस्सं । (ख) एसो दुदीओवि दे णिव्वुत्तपरिकम्मा चलणो । जाव दुवेवि सणूउरे करेमि । हला उट्ठेहि । अणुचिट्ठ देवीए असोअविआसइत्तअं णिओअं । (ग) सुदो देवीए णिओओ । होदु दाणिं । (घ) एसो उवारूढराओ उअभोअक्खमो पुरदो दे वट्टइ । (ङ) किं भट्टा । (च) ण दाव भट्टा । एसो असोअसाहावलम्बी पल्लवगुच्छओ । ओदंसेहि णं । (छ) अवि सुदं भवदा ।

[निर्विकारस्य स्वस्थचित्तस्यापि । उत्सुकताजनक उत्कण्ठाकारी । गृहीतार्था ज्ञातयथावद्वृत्तान्ता । निर्वृत्तं समाप्तं परिकर्म प्रसाधनम् । रागरेखानिवेशनमिति यावत् यस्य । उपारूढः वृद्धिं प्राप्तः रागः त्वद्विषयकोऽनुरागः पक्षे रक्तिमा यस्य सः । उपभोगक्षमः संभोगयोग्यः । पक्षे शरीरधारणयोग्यः । एष किं भर्ता । न तावद्भर्ता । इत्यत्र द्व्यर्थोक्त्या चतुर्थं पताकास्थानमुक्तं भवति । तदुक्तं दर्पणे—द्व्यर्थो वचनविन्यासः सुश्लिष्टः काव्ययोनितः । प्रधानार्थान्तरापेक्षी पताका स्थानकं परम् ॥ इति ॥ **पर्याप्तमिति** एतावता पर्याप्तं पर्याप्तिः । यद्वा पर्याप्तमलम् । एतन्मात्रश्रवणमपि कामिजनस्य तुष्ट्यै अलमित्यर्थः ।] **अनातुरेत्यादि** । अनातुरोत्कण्ठितयोः अनातुरोऽनार्तः ।

---

१ अनादरो०. २ समानरागयोः. ३ समत्त (समाप्त). ४ णं सणूउरं, णूउरशोभिदं. ५ णिओओत्ति, सुदं...णिओओत्ति दाणिं. ६ उओढ (उवोढ). ७ चिट्ठइ दिसइ. ८ दाव णं.

(मालविका रचितपल्लवावतंसा सलीलम[1]शोकाय पादं प्रहिणोति ।

राजा—वयस्य[2]

आदाय कर्णकिसलयमस्मादियमत्र चरणमर्पयति ।
उभयोः सदृशविनिमयादात्मानं वञ्चितं मन्ये ॥ १६ ॥

माल०—अपि नाम आवयोः सम्भावना सफला भवेत् । (क)

बकु०—सखि नास्ति ते दोषः । निर्गुणोऽयमशोको यदि कुसुमोद्भेदमन्थरो भवेद्य ईदृशं चरणसत्कारं लभते । (ख)

राजा—

अनेन तनुमध्यया मुखरनूपुरा[3]राविणा
नवाम्बुरुहकोमलेन चरणेन संभावितः ।
अशोक यदि सद्य एव कुसुमै[4]र्न संपत्स्यसे
वृथा[5] वहसि दोहदं ललितकामिसाधारणम् ॥ १७ ॥

(क) अवि णाम अम्हाणं संभावना सफला भवे । (ख) हला णत्थि दे दोसो णिग्गुणो[6] अअं असोओ जइ कुसुमुब्भेदमन्थरो[7] भवे जो इरिसं चरणसक्कारं लहेइ[8] ।

कामोत्कण्ठरहित इत्यर्थः । [उत्कण्ठा कामाभिलाषः अस्य सञ्जाता असौ उत्कण्ठितः कामी । अनातुरः च एकः पक्षः । उत्कण्ठितः च अन्यः पक्षः । तौ अनातुरोत्कण्ठितौ । यद्वा अनातुरा नायिका च उत्कण्ठितः नायकश्च तयोः ।] प्रसिद्ध्यता संभवता समागमेनापि संपर्केणापि मां प्रति मामनु । मत्पक्ष इत्यर्थः । रतिर्न शृङ्गारो न भवति । एकानुरागस्य रसाभासत्वात् । तथा चोक्तम्–' एकत्रैवानुरागश्चेद्बहुसक्तिश्च योषितः । अनौचित्यप्रवृत्तिश्च शृङ्गाराभास उच्यते ॥ ' इति । [किंतु समः तुल्यं अनुरागो ययोस्तयोः । अन्योन्यमुत्कण्ठितयोः इत्यर्थः । परस्परस्य प्राप्तिः तत्र निर्गता आशा ययोस्तयोः निराशयोः । शरीरनाशोपि मरणमपि वरं मनागभीष्टः । न तु विषमानुरागयोः संगम इति भावः । वंशस्थविलं वृत्तम्] ॥ १५ ॥ **आदायेत्यादि** । कर्णकिसलयं कर्णपूरार्थं किसलयम् । अत्र कर्णशब्देन कर्णपूरो लक्ष्यते ॥ [इयं मालविका अस्मादशोकात् कर्णकिसलयमादाय अत्र अस्मै चरणमर्पयति । अशोके पादं न्यस्यति । एवमुभयोः मालविकाऽशोकयोः सदृशयोः पल्लवगुच्छचरणयोः विनिमयात् विनिमयः परिवृत्तिः । न जातः तथा मम इति आत्मानं वञ्चितमकृतार्थं मन्ये] ॥ १६ ॥ [निर्गुणः गुणरहितः कुसुदोद्भेदे पुष्पदर्शने मन्थरः मन्दः भवेत् । झटिति पुष्पाणि न दर्शयेत्] । **अनेनेत्यादि** । हे अशोक तनुः कृशः मध्यः कटिः यस्यास्तया तनुमध्यया । मुखरः शब्दायमानः यः नूपुरः तेन आरौति इति आरावी तेन । नवं सद्योविकासितं यदम्बुरुहं कमलं तद्वत्कोमलेन सुकुमारेण अनेन चरणेन संभावितः स्पर्शनेन कृतसत्कारः त्वं यदि सद्यः

---

१. एतन्नास्ति क्वचित्. २ वयस्य पश्य. ३ ०पुरोद्ग्राहिना. ४ मुकुलैः. ५ मुधा. ६ अग्गुणो ७ ०मुमोम्भेद, मोग्गम. ८ अलभत, लंभिदो (लम्भितः), जो चल० लम्भिअ (लब्ध्वा).

सखे वचनावसरपूर्वं प्रवेष्टुमिच्छामि ।

त्रिदू०—एहि । एनां परिहासयिष्यामि । (क)

(उभौ प्रवेशं कुरुतः)

निपु०—भट्टिनि भर्तात्र प्रविशति । (ख)

इरावती—एतत्प्रथमं मम चिन्तितं हृदयेन । (ग)

विदू०—(उपसृत्य ।) भवति युक्तं नाम अत्रभवतः प्रियवयस्यः अयमशोकः वामपादेन ताडयितुम् । (घ)

उभे०—(ससंभ्रमम् ।) अहो भर्ता । (ङ)

विदू०—बकुलावलिके गृहीतार्थया त्वया अत्रभवती ईदृशमावनयं कुर्वती कस्मान्न निवारिता । (च)

(मालविका भयं रूपयति ।)

निपु०—भट्टिनि पश्य । किं प्रवृत्तमार्यगौतमेन (छ)

इरा०—कथं खलु ब्रह्मबन्धुरन्यथा जीविष्यति । (ज)

बकु०—आर्य एषा देव्या नियोगमनुतिष्ठति । एतस्मिन्नतिक्रमे परवतीयम् । प्रसीदतु भर्ता । (इत्यात्मना सहैनां प्रणिपातयति ।) (झ)

राजा—यद्येवमनपराद्धासि । उत्तिष्ठ भद्रे । (इति हस्तेन गृहीत्वा उत्थापयति ।)

(क) एहि । णं परिहासइस्सं । (ख) भट्टिणि भट्टा एत्थ पविसदि (ग) एदं पुढमं मम चिन्तिदं हिअएण । (घ) होदि जुत्तं णाम अत्तहोदो पिअवअस्सो अअं असोओ वामपादेण तादिदुं । (ङ) अम्हो भट्टा । (च) बउलावलिए गहीदत्थाए तुए अंत्तहोदी ईरिसं अविणअं करन्ती कीस ण णिवारिदा । (छ) भट्टिणि पेक्ख । किं पउत्तं अज्जगोदमेण । (ज) कहं खु बह्मबन्धु अण्णहा जीविस्सदि (झ) अज्ज एसा देवीए णिओअं अणुचिट्ठदि । एदस्सिं अदिक्कमे परवदी इअं। पसीददु भट्टा।

सपद्येव कुसुमैः न सम्पत्स्यसे युक्तो भविष्यसि तर्हि ललितकामिभिः ।विलासिकामुकैः साधारणं समानं दोहदं चरणताडनापेक्षारूपं वृथा व्यर्थं वहसि धारयसि । कृतमेतादृशेन दोहदधारणेनेत्यर्थः । पृथ्वीवृत्तम् । अत्र द्वितीयचरणे कोमलेनेत्यत्र यतिभङ्गो न दोषाय । प्रातिपदिकप्रत्यययोर्मध्यपातित्वे तस्यादोषत्वात् । तृतीणचरणे तु एवेत्यत्र यतिभङ्गो केषां-चिन्मते दोष एव] ॥ १७ [वचनस्यावसरः वचनावसरः स पूर्वः यस्मिन् कर्मणि । अत्र युक्तं नामेत्यत्र काकुरनुसंधेया । [गृहीतार्थया ज्ञाततदाशयया ।] भयं रूपयतीति । अत्र

---

१ वचनानुसरण०, पूर्वकं २ उपेत्य. ३ सममे. ४ ०त्वेनाम्. ५ भट्टिणि भट्टिणि; एत्थ एव्व. ६ एव्वं, इदं. ७ ण जुत्तं; अअं वाम०, अत्तमोदि ।पिअवअ (अत्रभवति प्रियवयस्ये) असोओ. ८ णं वाम०. ९ सही.

विदू०—युज्यते। देव्यत्र मानयितव्या। (क)

राजा—(विहस्य)—

किसलयमृदोर्विलासिनि कठिने निहतस्य पादपस्कन्धे।
चरणस्य न ते बाधा संप्रति वामस्य वामोरु॥ १८॥

(मालविका लज्जां नाटयति[१]।)

इरा०—(सासूयम्) अहो नवनीतहृदय आर्यपुत्रः। (ख)

माल०—बकुलावलिके एहि। अनुष्ठितमात्मनो नियोगं देव्यै निवेदयावः। (ग)

बकु०—तेन हि विज्ञापय भर्तारं विसर्जयेति। (घ)

राजा—भद्रे यास्यसि। मम तावदुत्पन्नावसरमर्थित्वं श्रूयताम्।

बकु०—अवहिता शृणु। आज्ञापयतु भर्ता। (ङ)

राजा—

धृतिपुष्पमयमपि जनो बध्नाति न तादृशं चिरात्प्रभृति।
स्पर्शामृतेन पूरय दोहदमस्याप्यनन्यरुचेः॥ १९॥

(क) जुज्जइ। देवी एत्थ माणइदव्वा। (ख) अहो णवणीदहिअओ[२] अज्जउत्तो। (ग) बउलावलिए एहि। अणुट्ठिदं अत्तणो णिओअं देवीए णिवेदेह्म। (घ) तेणहि विण्णवेहि भट्टारं विसज्जेहित्ति (ङ) अवहिदा सुणाहि। आणवेदु भट्टा।

भयकथनात्संभ्रमो नाम संध्यङ्गमुक्तं भवति॥ **किसलयेत्यादि**। [हे विलासिनि विलासः शृङ्गारभावजा क्रिया अस्या विद्यते इति तथोक्तातत्सम्बुद्धिः। अत इनिठनौ इति मत्वर्थीयः इन्। ऋन्नेभ्य इति ङीप्। यानस्थानासनादीनां मुखनेत्रादिकर्मणाम्। विशेषस्तु विलासः स्यादिष्टसंदर्शनादिना॥ इति विलासलक्षणमुक्तं साहित्यदर्पणे। कठिणे कठोरस्पर्शे पादपस्कंधे अशोकप्रकाण्डे निहितस्य दत्तस्य। किसलयमिव मृदुः किसलयमृदुः तस्य प्रवालसुकुमारस्य ते वामस्य चरणस्य हे वामोरु वामौ अतिसुन्दरौ ऊरू यस्याः सा वामोरूः तत्सम्बुद्धिः। संहितशफलक्षणवामादेश्च। इति ऊङ्। सम्प्रति बाधा पीडा न कचित्। आर्या जातिः]॥ १८॥ अत्र प्रसक्त्या संग्रहो नाम सध्यङ्गमुक्तं भवति।] नवनीतमिव अत्यन्तं मृदु हृदयं यस्य सः। इति सोल्लुण्ठं वचः। उत्पन्नः अवसरः यस्य तत्। लब्धावकाशमित्यर्थः] **धृतिपुष्पेति**। [अयमपि जनः अहमपि चिरात्प्रभृति दीर्घकालमारभ्य तादृशं धृतिरूपमभीष्टप्राप्तिजन्यपरितोषरूपं पुष्पं धृतिपुष्पं न बध्नाति। अतः न विद्यते अन्यस्य रुचिर्यस्य। यद्वा न अन्या त्वत्स्पर्शामृतादन्या रुचिर्यस्य। तस्य अनन्याभिलाषिणः अस्यापि ममापि स्पर्श एवामृतं तेन स्पर्शामृतेन आलिङ्गनादिनेत्यर्थः। दोहदं

---

१ रूपयति. २ णीदकप्पो अविणीदहिअओ क्खु (अविनीतहृदयः खलु).

इरा०—(सहसोपसृत्य ।) पूरय पूरय । ननु अशोकः कुसुमं दर्शयति । अयं पुनः पुष्प्यति फलति च । (क)

(सर्वे इरावतीं दृष्ट्वा संभ्रान्ताः ।)

राजा—(अपवार्य ।) वयस्य का प्रतिपत्तिरत्र ।

विदू०—किमन्यत् । जङ्घाबलमेव । (ख)

इरा०—बकुलावलिके साधु त्वयोपक्रान्तम् । मालविके त्वं तावत् सफलप्रार्थनं कुर्वार्यपुत्रम् । (ग)

उभे—प्रसीदतु भट्टिनी । के आवां भर्तुः प्रणयपरिग्रहस्य । (इति निष्क्रान्ते) (घ)

इरा०—अहो अविश्वसनीयाः पुरुषाः । मया खलु आत्मनो वञ्चनावचनं प्रमाणीकृत्य व्याधगीतरक्तया हरिण्येवाशङ्कितयैतन्न विज्ञातम् । (ङ)

विदू०—(जनान्तिकम् ।) प्रतियोजयेदानीं किमपि । कर्मगृहीतेन

(क) पूरेहि पूरेहि । [1]णं असोओ कुसुमं दंसेदि । अअं उण पुप्फंदि[2] फलदि अ । (ख) किं अण्णं । जंघाबलं[3] एव्व[4] । (ग) बउलावलिए साहु तुए उवक्कन्तं । मालविए तुमं दाव[5] सफलपत्थणं करेहि अज्जउत्तं । (घ) पसीददु भट्टिणी । का अह्मे भत्तुणे पणअपरिग्गहस्स । (ङ) अहो अविस्ससणीआ पुरिसा । मए क्खु अत्तणो वञ्चणावअणं पमाणीकरिअ[6] वाहगीदरत्ताए हरिणीए विअ असङ्किदाए एदं ण विण्णादं ।

पूरय] ॥ १९ ॥ पूरयेति अत्र संरब्धवचनात्तोटकं नाम संध्यङ्गमुक्तं भवति ॥ वयस्येत्यादि ।] का प्रतिपत्तिः को विचारः । क उपाय इत्यर्थः । अत्र भीतेर्गम्यमानत्वादुद्वेगो नाम संध्यङ्गमुक्तं भवति ॥ जङ्घाबलमव जङ्घाबलमाश्रित्य शीघ्रमितः पलायनमेवेति परिहासोक्तिः । साधु उपक्रान्तमभीष्टार्थस्य निपुणतयोपक्रमः कृतः । के आवां नहि इत्यर्थः । वञ्चनावचनं त्वया सह दोलाधिरोहणमनुभवितुमागच्छामीति प्रतारणावचनम् । प्रमाणीकृत्य सत्यत्वेन स्वीकृत्य अशङ्कितया अन्यतो भयमशङ्कमानया ।] एतदित्यनेन राज्ञः कपटाचरणं परामृश्यते । किमपि प्रतियोजय उपपन्नमनुपपन्नं वा उत्तरं कुर्वित्यर्थः । कर्मगृहीतेन कर्मणि चौर्यकर्मणि गृहीतेनापि कुम्भीलकेन

---

१ असोओ कुसुमं णं. २ पुप्फदि एव्व. ३ जंघावलम्बणं. ४ एव्व सरणं. ५ दाणिं सफलब्भत्थणं. ६ करिअ अक्खिवनाए (आक्षिप्तया) वाहजणगीदगहीदचित्ताए विअ हरिणीए एदं; अत्तणो वञ्चणा वाहजणगीदिरत्ताए...०किदाए ण विण्णादाः पमाणीकरिअ अक्खिवताए पिअधरिणाए हिअअस्सल्लं किदं एव्वं ण विण्णादं मए वाह० अविसंकिदाए हरिणीए विअ विणासोत्ति.

कुम्भीलकेन सन्धिच्छेदने शिक्षितोऽस्मीति वक्तव्यं भवति । (क)

राजा—सुन्दरि न मे मालविकया कश्चिदर्थः । मया त्वं चिरयसीति यथाकथंचिदात्मा विनोदितः ।

इरा०—विश्वसनीयोऽसि । मया न विज्ञातमीदृशं विनोदवस्तु आर्यपुत्रेणोपलब्धमिति । अन्यथा मन्दभागिन्यैवं न क्रियते । (ख)

विदू०—मा तावदत्रभवती अत्रभवतो दाक्षिण्यस्योपरोधं भणतु । समापत्तिदृष्टेन देव्याः परिजनेन सकथापि यदि अपराधः स्थाप्यते अत्र त्वमेव प्रमाणम् । (ग)

इरा०—ननु संकथा नाम भवतु । किमित्यात्मानमायासयिष्यामि ।

(इति रुष्टा प्रस्थिता ।) (घ)

राजा—(अनुसरन् ।) प्रसीदतु भवती ।

इरा०—(रशनासंदितचरणा व्रजत्येव ।)

राजा०—सुन्दरि न शोभते प्रणयिनि जने निरपेक्षता ।

इरा०—शठ अविश्वसनीयहृदयोऽसि । (ङ)

(क) पेडिजाएहि दाणिं किंपि । कम्मग्गहीदेण कुम्भीलएण संधिच्छेदे सिक्खिओम्मित्ति वत्तव्वं होदि । (ख) विस्ससणीओसि । मए ण विण्णादं ईरिसं विणोदवत्थुं अज्जउत्तेण उवलद्धंति । अण्णहा मन्दभाइणीए एव्वं ण करीअदि । (ग) मा दाव अत्तहोदा अत्तहोदो दक्खिण्णास उअरोहं भणदु । समावत्तिदिट्ठेण देवीए परिअणेण संकहावि जइ अवराहो ठावीअदि एत्थ तुमं एव्व पमाणं । (घ) णं संकहा णाम होदु । किति अत्ताणं आआसइस्सं । (ङ) सठ अविस्ससणीअहिअओसि ।

चोरेण सन्धिच्छेदने पिहितभूमिः सन्धिस्तस्याः छेदने भेदने । सुरङ्गाकरणे इत्यर्थः । शिक्षितः अभ्यासितास्मीति वक्तव्यम् । विश्वसनीयोसीत्यत्र विपरीतलक्षणानुसंधेया ॥ [ईदृशं विनोदवस्तु मालविकारूपं । एवं न क्रियते युवयोर्विनोदे उपरोधो न क्रियते । मा तावदिति । अत्रभवता मालविकया सह संकथा कुर्वता आत्मनः दाक्षिण्यमेव दर्शितम् । तत्र मया उपरोधः कृत इति मा ब्रूहि । यन्मालविकां प्रति उक्तं तदुपचारमात्रमेव । अतस्त्वदागमनं नोपरोध इति भावः । समापत्तिदृष्टेन यदृच्छादृष्टेन । स्थाप्यते प्रतिपाद्यते । गण्यते इत्यर्थः । रसनया मेखलया स्वस्थानात् च्युतया संदितौ बद्धौ । उपरुद्धौ इति यावत् । चरणौ यस्याः सा । बद्धे संदानितं मूतमुद्दितं संदितं सितम् । इत्यमरः । शठः गूढविप्रियकारी । तदुक्तं साहित्यदर्पणे-शठोयमेकत्र बद्ध-

---

१ ०कार्या. २ रुष्टा. ३ संदानित. ४ प्रणयिजने, प्रणयिजननिरपे०. ५ भो पडिवज्जेहि किंवि उत्तरं. ६ ०देण विअ. ७ ०च्छेदे, च्छेदणं, च्छेदणशिक्खिओ (शिक्षकः). ८ मए णाम- ९ एतारिसं. १० वत्थुअं, वुत्तन्तं (ईदृशोवृत्तान्तः) ११ अण्णहा दुक्खरं (दुष्करं)-दुक्खतरं दुक्खव्वावारिणी (व्यापारिणी) एव्वं ण करोमि. १२ अवराहं (अपराधं) १३ समीवट्ठिदेण. १४ परिचारिइत्थिअजणेण. १५ वारिअदि, क्खमीअदु. १६ कोत्ति- अकालं. १७ विस्सस.

राजा--

शठ इति मयि तावदस्तु ते परिचयवत्यवधीरणा प्रिये।
चरणपतितया न चण्डि तां विसृजसि मेखलयापि याचिता॥ २०॥

इरा०--इयमपि हताशा त्वामेवानुसरति। (इति रशनामादाय राजानं ताडयितुमिच्छति) (क)

राजा--एषा[2]।

बाष्पासारा हेमकाञ्चीगुणेन श्रोणीबिम्बादभ्युपेक्षाच्युतेन[3]।
चण्डी चण्डं हन्तुमभ्युद्यता मां विद्युद्दाम्ना मेघराजीव विन्ध्यम्॥२१॥

इरावती--किं मामेवं भूयोऽप्यपराद्धां करोषि। (इति सरशनं[4] हस्तमवलम्बते।) (ख)

राजा--

अपराधिनि मयि दण्डं संहरसि[5] किमुद्यतं कुटिलकेशि।
वर्धयसि विलसितं त्वं दासजनायात्र[6] कुप्यसि च॥ २२॥

नूनमिदमनुज्ञातम्[7]। (इति पादयोः पतति।)

(क) इअं पि हदासा तुमं एव्व अणुसरदि। (ख) किं मं एवं भूओ वि अवरद्धं करेसि।

भावो यः। दर्शितबहिरनुरागो विप्रियमन्यत्र गूढमाचरति॥' इति।] **शठ इत्यादि**-हे प्रिये। परिचयवति परिचयः [संस्तवः] यस्य स परिचयवान्। अतिशायने मतुप्। तस्मिन्मयि शठ इति गूढविप्रियकारीति अवधीरणा तिरस्कारः [तावत्साकल्येन] अस्तु। यतः 'अतिपरिचयादवज्ञा' इति वदन्ति तस्मादियमवधीरणा युक्तैवेत्यर्थः। हे चण्डि अत्यन्तकोपने। चरणपतितया मेखलया रशनया याचितापि प्रार्थितापि तामवधीरणां न विसृजसि न त्यजसि। किमिदं युक्तमिति शेषः। [अपरवक्त्र वृत्तम्]॥ २०॥ **बाष्पासारेत्यादि**। [बाष्पाणामासारो यस्याः सा बाष्पासारा अश्रुवर्षा चण्डी अत्यन्तकोपना इयं इरावती श्रोणीबिम्बात् नितम्बमण्डलात् अभ्युपेक्षया। कोपप्रस्थानसंरम्भादित्यर्थः। च्युतेन गलितेन हेमकाञ्चीगुणेन सुवर्णमेखलया। चण्डम्। कृतापराधत्वादित्यर्थः। यद्वा चण्डमुग्रं यथा तथा। मां बाष्पासारा सबाष्पवर्षा मेघराजी मेघपंक्तिः विद्युद्दाम्ना सौदामनीगुणेन विन्ध्यमिव हन्तुं प्रहर्तुमभ्युद्यता। उपमालंकारः। शालिनी वृत्तम्॥ २१॥ अपराद्धां कृतापराधाम्। ताडनं कुर्यामिति संभावनयेति भावः।] **अपराधिनीत्यादि**। [हे कुटिलकेशि अरालकेशि अपराधिनि कृतापराधे मयि उद्यतं दण्डं रशनया ताडनरूपं किं किमर्थं संहरसि निवर्तयसि। एवं दण्डसंहरणेन विलसितं विलासं वर्धयसि अत्र

---

१ चण्डतां, चण्डि तां. २ इयं इरावती; वयस्यैषा हि. ३ ०दभ्युपे० ४ रशनां हस्तेनावलम्बते; ०मालम्बते. ५ हरासि किमभ्यु; मद्य तं. ६ अद्य. ७ अस्मात्प्राक्-(आत्मगतं) इति क्वचित्.

इरावती—न खल्विमौ मालविकायाश्चरणौ यौ ते स्पर्शदोहदं पर-यिष्यतः । (इति निष्क्रान्ता [1]सचेटी ।) (क)

विदूषकः—उत्तिष्ठ । कृतप्रसादोऽसि । (ख)

राजा—(उत्थाय । इरावतीमपश्यन् ।) कथं गतैव प्रिया ।

विदूषकः—वयस्य दिष्ट्या अनेनाविनयेनाप्रसन्ना गतैषा । तद्वयं शीघ्रमपक्रमामः । यावदङ्गारको राशिमिवानुवक्रं प्रतिगमनं न करोति । (ग)

राजा—अहो [2]मदनस्य वैषम्यम् ।

मन्ये प्रियाहृतमनास्तस्याः प्रणिपातलङ्घनं सेवाम् ।
[3]एवं हि प्रणयवती सा शक्यमुपेक्षितुं कुपिता ॥ २३ ॥

(इति [4]निष्क्रान्तः सह वयस्येन ।)

इति तृतीयोऽङ्कः ।

(क) ण क्खु इमे मालविआए चलणा जा दे फरिसदोहलं पूरइस्सान्ति । (ख) उठेहि । किदप्पसादोसि । (ग) वअस्स दिट्ठिआ [6]इमस्स अविणअस्स अप्पसण्णा गदा एसा । ता वअं सिग्घं अवक्कमाम । जाव अङ्गारओ रासिं विअ अणुवक्कं पडिगमणं ण करेदि ।

अस्मै दासजनाय कुप्यसि च । क्रुधद्रुहेति चतुर्थी । आर्या छन्दः ॥ २२ ॥] **नूनमिति** । इदमेतद्दर्शनासंहरणमनुज्ञातमनुमतम् । मत्प्रार्थनया इति शेषः । [नूनमसंशयमिदं पादयोः पतनं त्वया अनुज्ञातम् । स्पर्शरूपं दोहदम् । हर्षदोहदेति पाठे हर्षहेतुं दोहदम् । अनया परुषोक्त्या अस्या अधीरात्वं सूचितम् । तदुक्तम्-'प्रियं सोत्प्रासवक्रोक्त्या मध्यधीरा दहेद्रुषा । धीराऽधीरा तु रुदितैरधीरा परुषोक्तिभिः॥' इति । अप्रसन्ना कलुषिताशया । कुपितेति यावत् । अङ्गारकः मङ्गलग्रहः । अनुवक्रं कुटिलगत्या । मङ्गलग्रह इव प्रत्यावृत्य किमप्यनिष्टं यावत् न कुर्यात्तावदपक्रमाम इति भावः । **मन्य इत्यादि** । प्रियाहृतमना मालविकाहृतमनाः प्रणिपातलंघनं प्रणामातिक्रमं तस्या इरावत्याः सेवामनुकूलाचरणं मन्ये । सेवायाः फलमाह प्रणयवती प्रेमवती सा इरावती कुपिता क्रुद्धा [अपि] एवमनेन क्रमेण प्रणिपातलंघनरूपेणोपेक्षितुमौदासीन्येन वर्तितुं शक्यं हि शक्या खलु । शक्यमिति निपातः । अत्र बीजानुसंधानादाक्षेपो नाम संध्यङ्गमुक्तं भवति । इदमनुसंधानमेवोत्तराङ्ककथोपयोगित्वाद्बिन्दुरित्यनुसंधेयम् ॥२३॥

इति श्रीकाटयवेमभूपविरचिते कुमारगिरिराजीये मालविकाग्निमित्रव्याख्याने तृतीयोऽङ्कः ॥

---

१ सह चेट्या, ससखा निष्क्रान्ता. २ मनसिजवै० मदनवै० ३ एवं प्रणयवती सा मयि-न हि. ४ परिक्रम्य निष्क्रान्ताः सर्वे. ५ मालविआच०—हरिस (हर्ष) दो०.६ देवोहि इमस्स अविणअस्स अपसारिना णिअन्तणा (नियन्त्रणा) जाव सिग्घं—सिदग्घं अव० ७ अप्पसादिता. ८ एतन्नास्ति बहुषु पुस्तकेषु.

चतुर्थोऽङ्कः ।

(ततः प्रविशति पर्युत्सुको राजा प्रतीहारी च ।)

राजा—(आत्मगतम् ।)

तामाश्रित्य श्रुतिपथगतामास्थया बद्धमूलः
संप्राप्तायां नयनविषयं रूढरागप्रवालः ।
हस्तस्पर्शे मुकुलित इव व्यक्तरोमोद्गमत्वा-
त्कुर्यात्क्लान्तं मनसिजतरुर्मां रसज्ञं फलस्य ॥ १ ॥

(प्रकाशम् ।) सखे गौतम ।

प्रतीहारी—जयतु भर्ता । असंनिहितो गौतमः । (क)

राजा—(आत्मगतम् ।) आम् । मालविकावृत्तान्तज्ञानाय मया प्रेषितः ।

(प्रविश्य ।)

विदूषकः—वर्धतां भवान् । (ख)

राजा—जयसेने जानीहि तावत्कं देवी धारिणी कथं वा सरुजचरणत्वाद्विनोद्यत इति ।

(क) जेदु भट्टा । असंणिहिदो गोदमो । (ख) वड्ढदु भवं ।

कविरिदानीमङ्कान्तरमारभते—**ततः प्रविशतीत्यादिना** ॥ **तामिति** ।
[श्रुतेः पन्थाः श्रुतिपथः । तमागतां कर्णमार्गोपस्थितां वाक्श्रवणविषयीभुतामि-
त्यर्थः । तां मालविकाम् । आश्रित्यावलम्ब्य आशया । तत्प्राप्त्यभिलाषेण बद्धं मूलं
येन स बद्धमूलो गृहीतमूलः । ततो नयनविषयं नेत्रगोचरं संप्राप्तायां दृष्टाया-
मित्यर्थः । तस्यां रूढरागप्रवालः रूढा रागरूपाः प्रवालाः किसलया यस्य स तथा-
भूतः । ततः पश्चात् हस्तस्पर्शे सति । व्यक्तरोमोद्गमत्वात् रोम्णां पुलकानामुद्गमः
आविर्भावः रोमोद्गमः । व्यक्तः रोमोद्गमः तस्य भावः व्यक्तरोमोद्गमत्वं तस्मात् । मुकु-
लित इव संजातमुकुल इव । तारकादित्वादितच् । मनसिजतरुः मदनरूपवृक्षः । क्लान्तं
विरहव्यथापर्याकुलं मां फलस्य मालविकाप्राप्तिरूपस्य रसज्ञं आस्वादज्ञं कुर्यात् ।]
मुकुलित इव संजातमुकुल इव कान्तं कामनायुक्तं कुर्यादिति प्रार्थनायां लिङ् ।
[अत्र मूलरोहणादीनां लोकप्रसिद्धेनैव क्रमेणोपन्यासाद् रत्नावल्यलंकारः । तदुक्तं-
'क्रमिकं प्रकृतार्थानां न्यासं रत्नावलीं विदुः ।' इति । मन्दाक्रान्ता वृत्तम् ।] ॥ १ ॥
अत्र प्रसञ्जितं बीजं प्रकरीस्थाने कृतमिति मन्तव्यम् ॥ [असंनिहितः न समीप-
वर्ती । आमिति स्मरणे । सरुजचरणत्वात् रुजया सहितौ सरुजौ चरणौ यस्याः सा
सरुजचरणा तस्या भावः सरुजचरणत्वं तस्मात् पीडायुक्तपादत्वात् । विनोद्यते

---

१ लब्ध. २ ०स्पर्शैः. ३ कुसुमित. ४ कान्तं. ५ आः; अये. ६ क्वासौ. ७ जेदु जेदु.

प्रतीहारी—यद्देव आज्ञापयति । (इति निष्क्रान्ता ।) (क)

राजा—सखे[1] को वृत्तान्तस्तत्रभवत्यास्ते सख्याः ।

विदूषकः—यो बिडालगृहीतायाः परभृतिकायाः । (ख)

राजा—(सविषादम् ।) कथमिव ।

विदूषकः—सा खलु तपस्विनी तया पिङ्गलाक्ष्या सारभाण्डभूगृहे मृत्युमुख इव निक्षिप्ता । (ग)

राजा—ननु मत्संपर्कमुपलभ्य[2] ।

विदूषकः—अथ किम् । (घ)

राजा—कः[3] एवं विमुखोऽस्माकं येन चण्डीकृता देवी ।

विदूषकः—शृणोतु भवान् । परिव्राजिकया मे कथितम् । ह्यः किल तत्रभवतीरावती रुजाक्रान्तचरणां देवीं सुखं प्रष्टुमागता । (ङ)

राजा—ततस्ततः ।

विदूषकः—ततः सा देव्या पृष्टा । किं न्ववलोकितो वल्लभजन इति । तयोक्तम् । मन्दो व उपचारो यत्परिजने संक्रान्तं वल्लभत्वं न ज्ञायते । (च)

(क) जं देवो आणवेदि । (ख) जो बिडालगहीदाए परहुदिआए । (ग) सा खु तवस्सिणी ताए पिङ्गलच्छिए सारभण्डभूघरए[4] मिच्चुमुहे विअ णिक्खित्ता । (घ) अह इं । (ङ) सुणादु भवं । परिव्वाजिआए[5] मे कहिदं । हिओ किल तत्तहोदी इरावदी रुजाकन्तचलणं[6] देविं सुहं[7] पुच्छिदुं आअदा । (च) तदो सा देवीए पुच्छिदा । किं णु[8] ओलोइदो वल्लहजणो त्ति । ताए उत्तं । मन्दो वो उवआरो जं परिजणे संकंतं वल्लहत्तणं ण जाणीअदि ।

विस्मृतदुःखा क्रियते इत्यर्थः । बिडालगृहीताया मार्जारातिक्रान्तायाः । परभृतिकायाः कोकिलायाः । परैः काकैः भृता परभृता सा एव परभृतिका । स्वार्थे कः । कप्रत्यये अजादित्वात् टापि च प्रत्ययस्थात्कात् इत्यत इत्वम् ।] [तपस्विनी अनुकम्प्या । पिङ्गलाक्ष्या क्रोधात्पिङ्गलत्वम् । यद्वा पिङ्गलाक्ष्या इति निन्दावचनम् । सारभाण्डानां उत्कृष्टद्रव्याणां भूगतगृहे । मत्संपर्कं मत्संबन्धम् । चण्डीकृता अत्यन्तं कोपिता । ह्यः पूर्वेद्युः । रुजया पीडया आक्रान्तश्चरणो यस्याः सा ताम् । वल्लभजनः प्रेमपात्रं भवतीत्यर्थः । मन्दः असमञ्जसः उपचारः उपचारपदम् । यद्यस्मात्कारणात् । परिजने मालविकायामिति भावः ।] निर्भेदादृतेऽपि स्फुटीकरणं विनापि । [उपन्यासः वागारम्भः । 'उपन्यासस्तु वाङ्मुखम्' इत्यमरः । मालविकायां शङ्क-

---

१ गौतम, सखे गौ० २ मत्सम्बन्धमुपलक्ष्य. ३ गौतम कः ४ गुहाए (गुहायां) ५ ०जिआ मे कहेइ (कथयति) ६ रुजाविहत्य, रुजाअन्त (रुजायमान) ७ सुहं पुच्छिआ. ८ किं णु ण; किं ण लक्खिदो जणो वल्लहोत्ति । ताए उत्तं मदो वा उवआरो वा जं दे परिअणस्स वल्लहत्तणं जाणन्ती वि पुच्छसि त्ति; किं उण लक्खिदो...। तदो ताए उत्तं कुदो वा दे उवआरो जं दे परिअणस्स...। तदो ताए उत्तमन्तीए कुदो वा उपआरो जं...। परि...त्तणं जाणिरस्सादित्ति ।

राजा—निर्भेदादृतेऽपि मालविकायामयमुपन्यासः शङ्कयति ।

विदूषकः—ततस्तयानुबध्यमानया भवतोऽविनयमन्तरेण परिगृहीतार्था कृता देवी । (क)

राजा—अहो दीर्घरोषता तत्रभवत्याः । अतः परं कथय ।

विदूषकः—किमतः परम् । मालविका बकुलावलिका च निगडपद्यावदृष्टसूर्यपादं पातालवासं नागकन्यके इवानुभवतः । (ख)

राजा—कष्टं कष्टम् ।

[1]मधुरस्वरा परभृता भ्रमरी च विबुद्धचूतसङ्गिन्यौ ।
कोटरमकालवृष्ट्या प्रबलपुरोवातया गमिते ॥ २ ॥

अप्यत्र कस्यचिदुपक्रमस्य गतिः स्यात् ।

विदूषकः—कथं भविष्यति । यत्सारभाण्डगृहे व्यापृता माधविका देव्या संदिष्टा । ममाङ्गुलीयकमुद्रामदृष्ट्वा न मोक्तव्या त्वया हताशा मालविका बकुलावलिका चेति । (ग)

(क) तदो ताए अणुबन्धिज्जमाणाए भवदो अविणअं अन्तरेण परिगहीदत्था किदा देवी । (ख) किं अदो वरं । मालविआ बउलावलिआ अ णिअलं[3]पदीओ अदिट्ठसुज्जपादं पादालवासं णाअकण्णआओ विअ अणुहोन्ति । (ग) कहं भविस्सदि । जं सारभ[4]ण्डघरए वाउदा माहविआ देवीए संदिट्ठा । मह अङ्गुलीअअमुद्दं अदेक्खिअ ण मोत्तव्वा तुए हदासा मालविआ बउलावलिआ अ त्ति ।

यति मालविकाविषयां शङ्कामुत्पादयतीत्यर्थः । अनुबध्यमानया साग्रहं पृच्छ्यमानया । अविनयमन्तरेण मालविकोपसर्पणरूपादाक्षिण्यवर्तनमधिकृत्य । परिगृहीतार्था ज्ञातवृत्तान्ता ।] धारिणी राज्ञोऽविनयमिरावत्याः सकाशाज्ज्ञातवतीत्यर्थः ॥ [निगडः शृंखला पदयोः ययोः ते निगडपद्यौ । स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् इति ङीष् । अदृष्टाः सूर्यपादाः रविकिरणा याभ्यां ते अदृष्टसूर्यपादे । पाताले पातालसदृशभूगृहे च वासः तम् ।] मधुरस्वरेत्यादि ॥ [मधुरः स्वरो यस्याः सा मधुरस्वरा कोकिला स्त्री । अजादित्वात् टाप् । विबुद्धः विकसितः यः चूतः आम्रस्तस्य सङ्गिन्यौ सङ्गते । प्रबलः पुरोवातः अग्रवायुर्यस्याः सा तया अकालवृष्ट्या कोटरं वृक्षरन्ध्रं गमिते प्रापिते । अत्र अप्रस्तुतेन भ्रमरीपरभृतयोः कोटरप्रवेशवृत्तान्तेन प्रस्तुतस्य मालविकाबकुलावलिकयोः निरोधस्य गम्यमानत्वादप्रस्तुतप्रशंसालंकारः । तदुक्तम्—' अप्रस्तुतप्रशंसा सा या सैव प्रस्तुताश्रया । ' इति ॥ २ ॥ उपक्रमस्य उपायारम्भस्य । गतिः प्रसरः । व्यापृता अधिकृता ।

---

१ मधुररवा परभृतिका; ०स्वरा परभृतिः २ अणुखिज्जमाणा...परिगदत्था (परिगतार्था) किदा. ३ लवदिओ. (लवत्यौ) ४ ०भाण्डे भाण्डवाउदा, गिहव्वावारिदा.

राजा—(निःश्वस्य । सपरामर्शम्[१]।) सखे किमत्र कर्तव्यम्[२]।

विदूषकः—(विचिन्त्य ।) अस्त्यत्रोपायः । (क)

राजा—क इव ।

विदूषकः—(सदृष्टिक्षेपम् ।) कोऽप्यदृष्टः शृणोति । कर्णे ते कथयामि । (इत्युपश्लिष्य कर्णे ।) एवमिव । (इत्यावेदयति ।) (ख)

राजा—(सहर्षम् ।) सुष्ठु[३] चिन्तितम् । प्रयुज्यतां सिद्धये ।

(प्रविश्य ।)

प्रतीहारी—देव प्रवातशयने देवी निषण्णा रक्तचन्दनधारिणा परिजनहस्तगतेन चरणेन भगवत्या कथाभिर्विनोद्यमाना तिष्ठति । (ग)

राजा—तेन ह्यस्मत्प्रवेश[४]योग्योऽयमवसरः ।

विदूषकः—तद्गच्छतु भगवान् । अहमपि देवीं द्रष्टुमरिक्तपाणिर्भविष्यामि । (घ)

राजा—जयसेनायास्तावत्संवेद्य[५] गच्छ ।

विदूषकः—तथा । (कर्णे ।) भवति एवमिव । (इत्यावेद्य निष्क्रान्तः ।) (ङ)

राजा—जयसेने प्रवातशयनमार्गमादेशय ।

प्रतीहारी—इत इतो देवः । (च)

(ततः प्रविशति शयनस्था देवी परिव्राजिका विभवतश्च परिवारः ।)

देवी—भगवति रमणीयं कथावस्तु । ततस्ततः । (छ)

(क) अत्थि एत्थ उवाओ । (ख) को वि अदिट्ठो सुणोदि । कण्णे दे कहेमि । एव्वं विअ । (ग) देव पवादसँअणे देवी णिसण्णा रत्तचन्दणधारिणा परिअणहत्थँगदेण चलणेण भअवदीऍ कहाहिं विणोदिज्जमाणा चिट्ठदि । (घ) ता गच्छदु भवं । अहं वि देवीं पक्खिदुं अरित्तपाणी भविस्सं । (ङ) तह । होदि एव्वं विअ । (च) इदो इदो देवो । (छ) भअवदि रमणिज्जं कहावत्थु । तदो तदो ।

कर्णे ते कथयामि एवमिव ।] अत्र राज्ञः कर्णे विदूषकोक्त उपायो नियमेन मालविकाप्राप्तिहेतुत्वान्नियताप्तिर्नाम चतुर्थावस्था सूचिता । अत्र पूर्वं प्रकरीस्थानोक्तबीजस्यानया नियताप्त्या समन्वयादवमर्शो नाम चतुर्थसंधिः प्रतिपादित इति मन्तव्यम् ॥ [प्रकृष्टः वातः यस्मिन् तत्स्थानं प्रवातं तस्मिन् शयनं तत्र । **रक्तेति** । शोधापनोदार्थं निषिक्तं रक्तचन्दनं तद्धारिणा । परिजनहस्तं गतेन चरणेन उपलक्षिता । संवेद्य अस्मद्रहस्यं] निवेद्य ।

---

१ एतन्नास्ति क्वचित्. २ प्रतिकर्तव्यम्. ३ साधु प्रयु. ४ प्रयाण ५ अस्मद्रहस्यं विदितं कुरु. ६ सअणीए ७ ॰गहीदेन (गृहीतेन), ८ ॰दीए पडिवाजिआए.

परिव्राजिका—(सदृष्टिक्षेपम् ।) देवि अतः परं पुनः कथयिष्यामि । अत्रभवान्विदिशेश्वरः संप्राप्तः ।

देवी—अहो आर्यपुत्रः । (इत्युत्थातुमिच्छति ।) (क)

राजा—अलमलमुपचारयन्त्रणया ।

अनुचितनूपुरविरहं नार्हसि तपनीयपीठकालम्बि ।
चरणं रुजा परीतं कलभाषिणि मां च पीडयितुम् ॥ ३ ॥

धारिणी—जयत्वार्यपुत्रः । (ख)

परिव्राजिका—विजयतां देवः ।

राजा—(परिव्राजिकां प्रणम्योपविश्य ।) देवि अपि सह्या ते वेदना ।

धारिणी—अस्ति मे विशेषः । (ग)

(ततः प्रविशति यज्ञोपवीतबद्धाङ्गुष्ठः संभ्रान्तो विदूषकः ।)

विदूषकः—परित्रायतां परित्रायतां भवान् । सर्पेण दष्टोऽस्मि । (घ)

(सर्वे विषण्णाः ।)

राजा—कष्टं कष्टम् । क्व भवान्परिभ्रान्तः ।

विदूषकः—देवीं द्रक्ष्यामीत्याचारपुष्पग्रहणकारणात्प्रमदवनं गतोऽस्मि । (ङ)

देवी—हा धिक् हा धिक् । अहमेव ब्राह्मणस्य जीवितसंशयनिमित्तं जातास्मि । (च)

(क) अह्मो अज्जउत्तो । (ख) जेदु अज्जउत्तो । (ग) अत्थि मे विसेसो । (घ) परित्ताअदु परित्ताअदु भवं । सप्पेण दठ्ठोह्मि । (ङ) देविं देक्खिस्सं त्ति आआरपुप्फग्गहणकारणादो पमदवणं गदोह्मि । (च) हद्धि हद्धि । अहं एव्व बह्मणस्स जीविदसंसअणिमित्तं जादह्मि ।

[उपचारयन्त्रणया आचारपालनक्लेशेन ।] **अनुचितेति** । [हे कलभाषिणि कलं मधुरं भाषितुं शीलं यस्यास्तथाभूते । अनुचितः नूपुरस्य मञ्जीरस्य विरहः यस्य तथाभूतं नूपुरविश्लेषानर्हमित्यर्थः । तपनीयस्य सुवर्णस्य पीठकमालम्बते तथाभूतं सुवर्णपादपीठनिहितामित्यर्थः । रुजा वेदनया परीतं व्याप्तम् । चरणं मां च पीडयितुं नार्हसि । तवोत्थानेन तव चरणस्य पीडा स्यात् । तदवलोकयतः ममापि । अतो मा उत्तिष्ठेति भावः । अत्र रुजा परीतमिति वाक्यार्थस्याग्निमित्रपीडां प्रति हेतुत्वात्काव्यलिङ्गमलंकारः ।] ॥ ३ ॥ **तत इति** । यज्ञोपवीतेन बद्धोऽङ्गुष्ठो यस्य स तथोक्तः । अत्र कल्पनाया गम्यमानत्वाच्चलनं नाम संध्यङ्गमुक्तं भवति ॥ [आचारार्थं रिक्तपाणिना देवी न द्रष्टव्या इति य आचारस्तदर्थं तत्परिपालनार्थं पुष्पाणि तेषां कारणात् ।]

---

१ तत्रभवान् ईश्वरः. २ पीठिका०; लम्बम्. ३ अज्ज अत्थि. ४ ०ग्गहणार्थं. ५ अतः परं–परित्ताअदु परित्ताअदु इत्य० क्वचित्.

विदूषकः—तस्मिन्नशोकस्तबककारणात्प्रसारिते दक्षिणहस्ते कोटरनिर्गतेन सर्परूपेण कालेन दष्टोऽस्मि । नन्वेते द्वे दंशपदे । (क)

परिव्राजिका—तेन हि दंशच्छेदः पूर्वकर्मेति श्रूयते । स तावदस्य क्रियताम् ।

छेदो दंशस्य दाहो वा क्षतेर्वा रक्तमोक्षणम् ।
एतानि दष्टमात्राणामायुष्याः प्रतिपत्तयः ॥ ४ ॥

राजा—संप्रति विषवैद्यानां कर्म । जयसेने क्षिप्रमानीयतां ध्रुवसिद्धिः ।

प्रतीहारी—यद्देव आज्ञापयति । (इति निष्क्रान्ता ।) (ख)

विदूषकः—अहो पापेन मृत्युना गृहीतोऽस्मि । (ग)

राजा—मा कातरो भूः । अविषोऽपि कदाचिद् दंशो भवेत् ।

विदूषकः—कथं न भेष्यामि । सिमसिमायन्ति मेऽङ्गानि । (घ)
(इति विषवेगं रूपयति ।)

(क) तहिं असोअत्थवअकारणादो पसारिदे दक्खिणहत्थे कोडरणिग्गदेण सप्परूवेण कालेण दट्ठोह्मि । णं एदाइं दुवे दंसणपदाइं । (ख) जं देवो आणवेदि । (ग) अहो पावेण मिच्चुणा गहिदोह्मि । (घ) कहं ण भाइस्सं । सिमसिमाअन्ति मे अङ्गाइं ।

[स्तवककारणात्स्तवकग्रहणार्थम् । पूर्वकर्म प्रथमप्रतिक्रिया ।] छेदो दंशस्येत्यादि । [दंशस्य दंशस्थानस्य च्छेदः । क्षतेः व्रणात् । रक्तस्य मोक्षणं स्रावणम् । दष्टमात्राणां दष्टा एव दष्टमात्राः तेषाम् । दंशक्षण एव इत्यर्थः । आयुष्याः आयुषे हिताः आयुर्दा इत्यर्थः । प्रतिपत्तय उपायाः । तदुक्तं वैद्यचन्द्रोदये–' आदौ तु स्रावयेद्रक्तं छित्त्वा शस्त्रेण दंशतः । बहिर्वेगीकृते रक्ते विषं तस्माद्विनश्यति ॥ ऊर्ध्वस्रोतोनुगे क्ष्वेडे न मन्त्रा नौषधिक्रिया । ' इति ॥ वाग्भटे च–' दंशं मण्डलिनां मुक्त्वा पित्तलत्वादथापरम् । प्रतप्तैर्हेमलोहाद्यैर्दहेदाशूल्मुकेन वा ॥ करोति भस्मसात्सद्यो वह्निः किं नाम न क्षणात् । निष्पीड्यानूद्धरेद्रक्तं मर्मसन्ध्यगतं तथा ॥ न जायते विषावेगो बीजनाशादिवाङ्कुरः । विषे प्रविसृते विध्येच्छिरां सा परमा क्रिया । शिरास्वदृश्यमानासु योज्या शृङ्गजलौकसः ॥ ' इति । पथ्यावक्त्रं वृत्तम् ॥४॥ कर्म उपायकरणकौशलम् । सिमसिमायन्ति सिमसिमेति कम्पनादिविकारस्यानुकरणवाचि । ततः सिमसिमशब्दात् अव्यक्तानुकरणाद्यजवरार्धात् इति डाचि लोहितादिडाज्भ्यः इति क्यषि वा क्यष इति आत्मनेपदविकल्पात्परस्मैपदम् ।] ध्रुवसिद्धिरिति तस्य वैद्यस्य नाम । सिमसिमायन्ति मेऽङ्गानि अनेन संतापः सूच्यते । विषवेगं विषप्राप्तिं रूपयति प्रकाशयति । विषवेगास्तु वसन्तराजीये कथिताः—

---

१ क्षतस्यारक्त०, मोचनम्. २ ०आयुषः. ३ अत्थवअस्स; असोअत्थपुप्फका०. ४ पसारिदो...तदो.

देवी—हा दर्शितमशुभं विकारेण (विषारेण) । अवलम्बध्वं ब्राह्मणम् । (क)

(परि[1]जनः ससंभ्रममवलम्बते ।)

विदू०—(राजानं विलोक्य ।) भोः भवतो बाल्यात्प्रियवयस्यो-ऽस्मि । तद्विचार्यापुत्राया मे जनन्या योगक्षेमं वह । (ख)

राजा—मा भैषीः । स्थिरो भव । अचिरात्त्वां वैद्यश्चिकित्[2]सते ।

(प्रविश्य ।)

जय०—देव आज्ञापितो ध्रुवसिद्धिर्विज्ञापयति । इहैवानीयतां गौतम इति । (ग)

राजा—तेन हि वर्षवरपरिगृहीतमेनं तत्रभवतः सकाशं प्रापय । (घ)

जय०—तथा ।

विदू०—(देवीं विलोक्य ।) भवति जीवेयं वा न वा । यन्मयात्र-भवन्तं सेवमानेन तेऽपराद्धं तन्मर्षय । (ङ)

देवी—दीर्घायुर्भव । (च)

(निष्क्रान्तौ विदूषकः प्रतीहारी च ।)

राजा—प्रकृतिभीरुस्तपस्वी । ध्रुवसिद्धे[3]रपि यथार्थनाम्नः सिद्धिं न मन्यते ।

(क) हा[4] दंसिदं असुहं विआरेण । अ[5]वलम्भध बह्मणं । (ख) भोः भवदो [6]बालत्तणादो पिअवअसस्सोह्मि । तं विआरिअ अपुत्ताए मे जणणीए जोगक्खेमं वहेहि । (ग) देव आणाविदो धुवसिद्धी विण्णावेदि । इह एव्व आणीअ[7]दु गोदमोत्ति । (घ) तह । (ङ) भोदि जीवेअं वा ण वा । जं मए अत्तभवन्तं सेवमाणेण ते अवरद्धं तं म[8]रिसेहि । (च) दीहाऊ होहि ।

'वैवर्ण्यं वेपथुर्दाहः फेनः स्कन्धस्य भञ्जनम् । दुःखं जाड्यं मृतिश्चेति विषवेगाः स्युरष्टधा' इति । [हा कष्टम् । अशुभममङ्गलं मरणरूपं विषवेगाधिक्यात् । बाल्याद्बाल्यप्रभृति । अपुत्राया मयि मृते इति भावः । योगक्षेमं योगः अप्राप्तस्य प्राप्तिः तेन सहितं क्षेमं लब्धस्य परिपालनम् । जीवनयात्राचिन्तामित्यर्थः । चिकित्सते विषप्रतिक्रियां करिष्यतीत्यर्थः । कितेर्व्याधिप्रतिकारे गुप्तिज्किद्भ्यः इति सन् । प्रकृत्या स्वभावतः भीरुः । तपस्वी दीनः । ध्रुवा निश्चयेन भाविनी सिद्धिर्यस्य तस्य । सिद्धिं न मन्यते विषप्रतीकारं कुर्यादित्यत्र विश्वासं न गच्छति ।

---

१ परिव्राजिका; पारिपार्श्विका २ विषवैद्यः चिकित्सिष्यति–रसयिष्यति. ३ सिद्धि-मपि यथार्थनामानं सिद्धिमन्तं न. ४ ही ही; हा...आहिअं (आधिक्यं). ५ हला अव० ६ बाल्लादोवि; बालवअस्सोम्हि । ता अविआरेण बुध्धाए (बालवयस्योऽस्मि । तदविचारेण वृद्धायाः) ७ अदु सो ८ सव्वं ऊबराहं मरि०

(प्रविश्य ।)

जय०—जयतु भर्ता । ध्रुवसिद्धिर्विज्ञापयति । उदकुम्भविधाने सर्पमुद्रितं किमपि कल्पयितव्यम् । तदन्विष्यतामिति । (क)

(क) जेदु भट्टा । धुवसिद्धी विण्णावेदि । उदकुम्भविहाणे[1] सप्पमुद्दिअं किंपि कप्पइदव्वं । तं अण्णेसीअदु त्ति ।

उदकुम्भविधानं नाम विषदोषशमनार्थः कर्मविशेषः । तस्मिन्कर्तव्ये । उदकुम्भविधानं भैरवतन्त्रोक्तं यथा । "भैरवी उवाच–देवदेव जगन्नाथ जगतां हितकारक । केनोपायेन भगवन्मर्त्यः सर्पविषं जयेत् ॥ ईश्वर उवाच-शृणु देवि प्रवक्ष्यामि यन्नोक्तं कस्यचित्पुरा । उदकुम्भविधानेन विषं राजिमतां जयेत् ॥ घटमेकं समादाय मृन्मयं चाव्रणं शुभम् । कन्याकर्तितसूत्रेण वेष्टनं तद्गलं चरेत ॥ कोशातक्यग्निकः पाठा सूर्यवल्ल्यमृताभयाः । शेलुः शिरीषः किणिहीहरिद्रे क्षौद्रसाहृया ॥ पुनर्नवा त्रिकटुकं बृहत्यौ सारिवे बला । कल्कमेषां कुमार्याश्च रसेन परिकल्पयेत् ॥ घटान्तर्लेपयेत्तेन बहिर्भागं तु धूपयेत् । तद्गन्मधूकमधुकपद्मकेसरचन्दनैः ॥ मौनेन जलमाहृत्य नद्यस्ताम्रघटेन वै । तं घटं पूरयेन्मन्त्रमिममुच्चार्य यत्नतः ॥ ॐ नमः पुरुषसिंहाय नमो नारायणाय च । यथासौ नाभिजानाति रणे कृष्णः पराजयम् ॥ एतेन सत्यवाक्येन सलिलं चामृतायताम् । हस्तेन तं घटं स्पृष्ट्वा उत्तराभिमुखः स्थितः ॥ एतेन मन्त्रराजेन जलं तदभिमन्त्रयेत् । नमो वैडूर्यमाते हुलु हुलु रक्ष मां सर्पविषेभ्यः ॥ गौरि गान्धारि मातङ्गि चाण्डालि स्वाहा । अनूर्वनुजाय विनतानन्दनाय काश्यपाय पक्षिराजाय नारायणवाहनायामृतहरणाय । ॐ नमो गरुडायेदं जलममृतरूपं कुरु कुरु दर्वीकराद्यखिलपन्नगानां विषं संहर । ॐ नमो नारायणायेति । पिप्पल्यो ध्यामकं मांसी खपूरः कुन्दरुस्तथा । पञ्चवल्कत्रयष्टीनागपुष्पैलवालुकम् ॥ जीवकर्षभकोशीरं सितापद्मकमुत्पलम् । कुमार्या स्नातया कुम्भे क्षिपत्संचूर्ण्य भैरवि ॥ सुरसामार्कवकुशशिरीषाम्बुदनिम्बकैः । बद्धकूर्चेन तत्तोयं सेचयेच्छतवारकम् ॥ सर्पदष्टप्रदेशं तु मन्त्रमेनं पठन्पुनः । अनूर्वनुज इत्यादि यावद्रोमाञ्चहर्षणम् ॥ विषमुक्तो भवेज्जन्तुस्तक्षकेणापि दंशितः । अपमृत्युविनाशार्थं सिञ्चच्छिरसि मानवः ॥ सर्पबाधाप्रशमनं विषरोगनिवारणम् । उदकुम्भविधानं ते मया देवि प्रकीर्तितम् ॥ गृहे सिञ्चञ्जलमिदं पलायन्ते भुजंगमाः । स्मरणादोषधीनां तु सकृन्मन्त्रस्य कीर्तनात् ॥ " इति ॥ नागमुद्राविधिस्तु रसरत्नावल्याम्—"नागार्जुन महाबाहो वद मे गुह्यमुत्तमम् । उरगाणां महाघोरविषबाधापकर्षणम् ॥ नागार्जुन उवाच–शृणु विप्र प्रवक्ष्यामि लोकानां हितकाम्यया । नागमुद्राविधानं तु रहस्यं परमं स्फुटम् ॥ सपादपलमानेन सुवर्णेन सुशोभनम् । नागं विधाय मतिमानग्न्युत्तारणपूर्वकम् । नागं करेण संस्पृश्य मन्त्रानेतांस्त्रिरुच्चरेत् ॥ श्रीनागस्य प्राणाः इह प्राणाः । श्रीनागस्य जीव इह स्थितः । श्रीनागस्य सर्वेन्द्रियाणि इह स्थितानि । श्रीनागस्य

[1] विहाणेण.

देवी--इदं सर्पमुद्रितमङ्गुलीयकम् । पश्चान्मम हस्ते देह्येतत् । ([1]इति प्रयच्छति ।) (क)

([2]प्रतीहारी गृहीत्वा प्रस्थिता ।)

राजा—जयसेने कर्मसिद्धावाशु प्रतिपत्तिमा[3]नय ।

प्रती०—यद्देव आज्ञापयति । (ख)

परि०—यथा मे हृदयमाचष्टे तथा निर्विषो गौतमः ।

राजा—भूयादेवम् ।

(प्रविश्य ।)

जय०—जयतु देवः । निवृत्तविषवेगो गौतमो मुहूर्तेन प्रकृतिस्थः संवृत्तः । (ग)

देवी--दिष्टया वचनीयान्मुक्तास्मि । (घ)

प्रती०—एष पुनरमात्यो वाहतको विज्ञापयति । राजकार्यं बहु मन्त्रयितव्यम् । तद्दर्शनेनानुग्रहमिच्छामीति । (ङ)

(क) इदं सप्पमुद्दिअं अङ्गलीअअं । पच्छा मम हत्थे देहि णं । (ख) जं देवो आणवेदि । (ग) जेदु देवो । णिवुत्तविसवेगो गोदमो मुहुत्तेण पकिदित्थो संवुत्तो । (घ) दिट्ठिआ वअणीआदो मुत्तह्मि । (ङ) एसो उण अमच्चो वाहतओ विण्णावेदि । राअकज्जं बहु मन्तिदव्वं । ता दंसणेण अणुग्गहं इच्छामि त्ति ।

वाङ्मनःप्राणा इहायान्तु स्वाहा । इति प्रतिष्ठापितप्राणं श्रीनागं नमस्कुर्यात् ॥ एवं प्राणप्रतिष्ठां वै कृत्वा नागं निधापयेत् । उदकुम्भमुखे रम्ये पात्रे ताम्रमये शुभे ॥ सर्षपैः पूरिते रक्तसूत्रवेष्टितकन्धरे । स्थापयेद्दक्षहस्तेन संस्पृश्य मन्त्रमुच्चरेत् ॥ अथ मन्त्रः–ॐ ह्रः सर्पकुलाधिपतये श्रीनागायामृतमूर्तये हुलु हुलु सर्पविषं शमय शमय नमस्ते स्वाहा ॥ इति मन्त्रेणाभिमन्त्र्य चाष्टोत्तरशतं सुधीः । नागमुद्रां ततः कृत्वा पूजयेत्संस्तुवीत च ॥ नागराज नमस्तुभ्यं गरदोषनिबर्हण । भूतेशाभरणश्रेष्ठ विषं संहर ते नमः ॥ तत उद्वास्य तं नागं तोयेनानेन सेचयेत् ॥ विषं निर्विषतां याति सर्पदष्टस्य तत्क्षणात् ॥ इति गुह्यं मया विप्र तव स्नेहात्प्रकाशितम् । विषदोषहरं नृणां किमन्यत्कथयामि ते ॥ "इति ॥ सर्पमुद्रितं सर्पप्रतिमायुक्तमित्यर्थः । पश्चान्नाममुद्राविधाने समाप्ते । कर्मणो नागमुद्राविधानस्य सिद्धौ । कर्मणः मालविकामोचनरूपस्येति गूढार्थः । हृदयमाष्टे अन्तःप्रसन्नतयेत्यर्थः । प्रकृतौ गुणसाम्ये तिष्ठतीति तथोक्तः । वचनीयात् निन्दारूपदोषात् । मन्त्रयितव्यं गूढं विचारणीयम् ।

१ इत्यङ्गुलीयकं ददाति. २ जयसेना नाट्येन गृह्णाति. ३ प्रतिपादय.

देवी—गच्छत्वार्यपुत्रः कार्यसिद्धये । (क)

राजा—आतपाक्रान्तोऽयमुद्देशः । शीतक्रिया चास्या रुजः प्रशस्ता । तदन्यत्र नीयतां शयनीयम्[1] ।

देवी—बालिकाः आर्यपुत्रवचनमनुतिष्ठत । (ख)

परिजनः—तथा । (ग)

(निष्क्रान्ता देवी परिव्राजिका परिजनश्च ।)

राजा—जयसेने गूढेन[2] पथा मां प्रमदवनं प्रापय ।

प्रतीहारी—इत इतो देवः । (घ)

राजा—जयसेने समाप्तकृत्यो[3] ननु गौतमः ।

प्रतीहारी—अथ किम् । (ङ)

राजा—

इष्टाधिगमनिमित्तं प्रयोगमेकान्तसाधुमपि[4] मत्वा ।
संदिग्धमेव सिद्धौ[5] कातरमाशङ्कते चेतः[6] ॥ ५ ॥

(प्रविश्य ।)

विदूषकः—वर्धतां भवान् । सिद्धानि ते मङ्गलकर्माणि । (च)

राजा—जयसेने त्वमपि स्वनियोगमशून्यं कुरु ।

प्रतीहारी—यद्देव आज्ञापयति । (इति निष्क्रान्ता ।) (छ)

राजा—वयस्य[7] क्षुद्रा[8] माधविका । न खलु किंचिद्विचारितमनया ।

(क) गच्छदु अज्जउत्तो कज्जसिद्धी ए । (ख) बालिआओ अज्जउत्तवअणं अणुचिट्ठह । (ग, तह । (घ) इदो इदो देवो । (ङ) अह इं । (च) वड्ढदु[9] भवं । सिद्धाइं दे[10] मङ्गलकम्माइं[11] (छ) जं देवो आणवेदि ।

समाप्तं कृत्यं मालविकामोचनरूपं यस्य । समाप्तकाम्यः इति पाठे काम्यं इष्टं कर्म इति स एवार्थः ।] इष्टाधिगमेत्यादि । [इष्टं वाञ्छितं वस्तु मालविकारूपं तस्य अधिगमे प्राप्तौ निमित्तं साधनभूतम् प्रयोगमुपायं एकान्तसाधुं निश्चयेन कार्यस्य साधकं मत्वापि कातरं मे चेतः सिद्धौ इष्टसंपादने संदिग्ध संदेहयुक्तमेव सत् आशङ्कते बिभेति । यद्वा-० निमित्तमेकान्तसाधुमपि प्रयोगं सिद्धौ संदिग्धमेव मत्वा मे चेतः इत्यादि । नियोगमुचितं कर्म । अशून्यं कुरु अनुतिष्ठेत्यर्थः । तदनुष्ठानार्थं गच्छेति

१ शयनम्. २ गूढपथेन. ३ ०करणीयो. ४ साध्यं; मत्वा—लब्ध्वा. ५ सिद्धः. ६ हृदयम्. ७ गौतम. ८ क्षुद्रमाधविका. ९ जेदु १० मे. ११ सव्व.

विदूषकः--देव्या अङ्गुलीयकमुद्रां दृष्ट्वा कथं विचारयति । (क)

राजा--न खलु मुद्रामधिकृत्य ब्रवीमि । एतयोर्बद्धयोः किंनिमित्तोऽयं मोक्षः । किं देव्याः परिजनमतिक्रम्य भवान्संदिष्ट इत्येवमनया प्रष्टव्यम् ।

विदूषकः--ननु पृष्टोऽस्मि । पुनर्मन्दस्यापि मे तस्मिन्प्रत्युत्पन्ना मतिः । (ख)

राजा--कथ्यताम् ।

विदूषकः--भणितं मया । दैवचिन्तकैर्विज्ञापितो राजा सोपसर्गो वो नक्षत्रं सर्वबन्धनमोक्षः क्रियतामिति । (ग)

राजा--(सहर्षम् ।) ततस्ततः ।

विदूषकः--तच्छ्रुत्वा देव्येरावतीचित्तं रक्षन्त्या राजा किल मोचयतीत्यहं संदिष्ट इति । ततो युज्यत इति तया संपादितोऽर्थः । (घ)

राजा--(विदूषकं परिष्वज्य ।) सखे प्रियोऽहं तव ।

न हि बुद्धिगुणेनैव सुहृदामर्थदर्शनम् ।
कार्यसिद्धिपथः सूक्ष्मः स्नेहेनाप्युपलभ्यते ॥ ६ ॥

(क) देवीए अङ्गुलीअअमुद्दिअं देक्खिअ कहं विआरेदि । (ख) णं पुच्छिदोह्मि । पुणो मन्दस्स वि मे तस्सिं पच्चुप्पण्णा मदी । (ग) भणिदं मए । देव्वचिन्तएहिं विण्णाविदो राआ सोवसग्गं वो णक्खत्तं सव्वबन्धणमोक्खो करीअदु त्ति । (घ) तं सुणिअ देवीएं इरावदीचित्तं रक्खन्तीए राआ किल मोएदित्ति अहं संदिट्ठो त्ति । तदो जुज्जदि त्ति ताए संपादिदो अत्थो ।

भावः । क्षुद्रा नीचा । मन्दप्रज्ञा वा । विचारितमाशङ्कया पृष्टमित्यर्थः । अतिक्रम्य मुक्त्वेत्यर्थः । प्रत्युत्पन्ना मतिः मया समयोचितमुत्तरं दत्तमित्यर्थः । दैवचिन्तकैः ज्योतिःशास्त्रज्ञैः । सोपसर्गं उपसर्गेण सह सोपसर्गं पापग्रहादियुक्तत्वात् । मोचयति इति हेतुना । यद्वा इति प्रकाशने । इति प्रकाशयन्त्या । 'इति हेतौ प्रकाशने' इति मेदिनी ।]
न हि बुद्धीत्यादि । [सुहृदां मित्राणाम् । ' सुहृद्दुर्हृदौ मित्रामित्रयोः ' इति निपातनात्साधुः ।] अर्थदर्शनं अभीष्टसिद्ध्युपायदर्शनं बुद्धिगुणेन बुद्धेः प्रकर्षेण एव केवलेन न । किं तु कार्यसिद्धेः पंथाः कार्यसिद्धिपथः । ' ऋक्पूरब्धूःपथामानक्षे ' इत्यप्रत्ययः समासान्तः । यद्वा पथशब्दः अदन्तोप्यस्ति स ग्राह्यः । तथा च त्रिकाण्डशेषः-' वाटः पथश्च मार्गश्च ' इति । सूक्ष्मः दुर्ग्राह्योपि स्नेहेनापि उपलभ्यते । स्नेहबलादपि दृश्यते इत्यर्थः । तदुक्तं विक्रमोर्वशीये-'अतिस्नेहः खलु कार्यदर्शी' इति॥५॥

१ द्वयोः. २ किं वा. ३ ०पदं सूक्ष्मं. ४ उपलक्ष्यते. ५ तह पच्चुप्पण्णं उत्तरं आसि; पच्चुप्पण्णबुद्धिणा मए कहिदं देवचिं०. ६ भणिदा. ७ राआ भणिओ. ८ ता सव्व० ९ देवीए धारिणीए...किल मोचेदि मालविअंति तुमं एव्व मोचेहिचि संदि. १० ताए मालविआए वि.

विदूषकः—त्वरतां भवान् । समुद्रगृहे सखीसहितां मालविकां स्थापयित्वा भवन्तं प्रत्युद्गतोऽस्मि । (क)

राजा—अहमेनां संभावयामि । गच्छाग्रतः ।

विदूषकः—एतु भवान् । (परिक्रम्य ।) इदं समुद्रगृहम् । (ख)

राजा—(साशङ्कम् ।) वयस्य एषा कुसुमावचयव्यग्रहस्ता सख्यास्ते इरावत्याः परिचारिका चन्द्रिका सन्निकृष्टमागच्छति । इतस्तावदावां भित्तिगूढौ भवावः ।

विदूषकः—अहो कुम्भीलकैः कामुकैश्च परिहरणीया खलु चन्द्रिका । (ग)

(उभौ यथोक्तं[1] कुरुतः ।)

राजा—गौतम कथं नु ते सखी मां प्रतिपालयति । एहि । एनां गवाक्षमाश्रित्य विलोकयावः ।

विदूषकः—तथा । (घ)

(उभौ विलोकयन्तौ तिष्ठतः[2] ।)

(ततः प्रविशति मालविका वकुलावलिका च ।)

वकुलावलिका—सखि प्रणम भर्तारम् । (ङ)

राजा—मन्ये[3] प्रतिकृतिं मे दर्शयति ।

मालविका—(सहर्षम् ।) नमस्ते । (द्वारमवलोक्य । सविषादम् ।) सखि मां विप्रलम्भयसि । (च)

(क) तुवरदु भवं । समुद्दघरए सहीसहिदं[4] मालविअं ठाविअ भवन्तं पच्चुग्गदोम्हि । (ख) एदु[5] भवं । ईदं[6] समुद्दघरं । (ग) अहो कुम्भीलएहिं कामुएहिं अ परिहरणीआ खु चन्दिआ । (घ) तह । (ङ) सहि पणम भट्टारं । (च) णमो दे । हला मं विप्पलम्भेसि ।

समुद्रगृहं जलयन्त्रगृहं । 'समुद्रगृहमित्युक्तं जलयन्त्रनिकेतनम्' इति हारावली । मुद्रायुक्तं गृहमिति केचित् । संभावयामि गत्वा संमानयामि ।] अहो इत्यामन्त्रणे । [कुम्भीलकैश्चौरैः । कामुकैः कामिभिः । प्रियागृहमभिसरद्भिरिति शेषः । चन्द्रिका ज्योत्स्ना । राज्ञा चन्द्रिकेत्युक्ते ज्योत्स्नेति अर्थान्तरं गृहीतं परिहासार्थं विदूषकेण । ते सखी मालविकेत्यर्थः । गवाक्षं वातायनम् । भट्टारं पूज्यं राजानं भर्तारमिति वा । 'भट्टारो

---

१ यथासमर्थितं. २ स्थितौ. ३ शङ्के...निर्दिशति. ४ ससहिं. ५ एदु एदु. ६ एदं. ७ अस्मात्परं–जो पस्सदो पिट्ठदो देक्खीअदि (यः पार्श्वतः पृष्ठतो दृश्यते); जं पिट्ठदो पासदो देक्खसि; इत्यधिकं क्वचित्.

राजा—सखे हर्षविषादाभ्यामत्रभवत्याः प्रीतोऽस्मि ।

सूर्योदये भवति या सूर्यास्तमये च पुण्डरीकस्य ।
वदनेन सुवदनायास्ते समवस्थे क्षणादूढे ॥ ७ ॥

बकुला०—नन्वेष चित्रगतो भर्ता । (क)

उभे—(प्रणिपत्य ।) जयतु भर्ता । (ख)

मालवि०—सखि तदा संमुखस्थिता भर्तू रूपदर्शनेन न तथा वितृष्णास्मि यथाद्य । मया विभावितश्चित्रगतदर्शनो भर्ता । (ग)

विदू०—श्रुतं भवता । अत्रभवती चित्रे यथा दृष्टस्तथा न दृष्टो भवानिति मन्त्रयते । मुधेदानीं मञ्जूषेव रत्नभाण्डं यौवनगर्वं वहसि । (घ)

राजा—सखे कुतूहलवानपि निसर्गशालीनः स्त्रीजनः । पश्य ।

कात्स्न्येन निर्वर्णयितुं च रूप-
मिच्छन्ति तत्पूर्वसमागमानाम् ।
न च प्रियेष्वायतलोचनानां
समग्रपातीनि विलोचनानि ॥ ८ ॥

(क) णं एसो चित्तगदो भट्टा । (ख) जेदु भट्टा । (ग) हला तदा संमुहट्ठिदा भट्टिणो रूवदंसणेण ण तह वितिण्हह्मि जह अज्ज । मए विभाविदो चित्तगददंसणो भट्टा । (घ) सुदं भवदा । अत्तहोदी चित्ते जह दिट्ठो तह ण दिट्ठो भवं ति मन्तेदि । मुहा दाणिं मज्जूसा विअ रअणभण्डअं जोव्वणगव्वं वहेसि ।

भगवान् पूज्य इति त्रिकाण्डशेषः ।] सूर्योदय इत्यादि । [पुण्डरीकं सूर्यविकासि कमलं तस्य सूर्योदये या अवस्था विकासरूपा भवति । अस्तमये च या अवस्था म्लानतारूपा भवति । ते उभे अवस्थे सुवदनाया वदनेन क्षणादूढे धृते । हर्षान्मुखविकासः विषादान्म्लानता जातेत्यर्थः । आर्याछन्दः ॥ ७ ॥ सखीति-न वितृष्णास्मि न तथा मे रूपदर्शनतृष्णा गता यथाद्य । यतो मया अद्य विभावितः सावधानेन दृष्ट इत्यर्थः । अत्रभवतीति-यथा चित्रे तव रूपं समाकर्षकं तथा न प्रत्यक्षतया दृष्टमिति । मञ्जूषा पेटा । मुधेति यथा भाण्डस्थरत्नानि मञ्जूषाया अनुपकारीणि तेषामौज्ज्वल्यस्य वहिरप्रकटनात्तथा भवतो तारुण्यं न कस्मैचिदपि गुणायेति । कुतूहलवान् प्रियालोकने उत्सुकोपि । 'रम्यवस्तुसमालोके लोलता स्यात्कुतूहलम् ।' इति सा. द. । निसर्गेण प्रकृत्या शालीनोऽधृष्टः ।] कात्स्न्येनेति । [आयतलोचनाः प्रियाणां रूपं कात्स्न्येन साकल्येन निर्वर्णयितुमालोकयितुमिच्छन्ति च । स पूर्वः प्रथमः समागमो यासां तासां तत्पूर्वसमागमानाम् । आयते दीर्घे लोचने यासां ता आयतलोचनास्तासां विलोचनानि प्रियेषु वल्लभेषु समग्राणि पतन्तीति तानि तथोक्तानि न भवन्ति । प्रियस्वरूपं साकल्येन द्रष्टुमनसोपि नवसंगमोत्थलज्जायोगात्तथा कर्तुं न प्रभवन्तीत्यर्थः ।

१ समागतानाम्. २ वृत्तीनि. ३ संभमदिट्ठे भट्टिणो रूवे जहा ण वितिण्हह्मि तहा अज्ज वि मए भाविदो अवितिण्हदंसणो भट्टा (संभ्रमदृष्टे भर्तु रूपे यथा न वितृष्णास्मि तथा अद्यापि मया भावितो अतितृष्णदर्शनो भर्ता). ४ तत्त०, अत्तहोदीए... मन्दिदं (मन्त्रितं).

माल०—सखि कैषा पार्श्वपरिवृत्तवदनेन भर्त्रा स्निग्धया दृष्ट्या निध्यायते । (क)

बकुला०—नन्वियं पार्श्वगतेरावती । (ख)

माल०—सखि अदक्षिण इव भर्ता मे प्रतिभाति यः सर्वं देवीजनमुज्झित्वैकस्या मुखे बद्धलक्ष्यः । (ग)

बकुला०—(आत्मगतम् ।) चित्रगतं भर्तारं परमार्थतो गृहीत्वासूयति । भवतु । क्रीडिष्यामि तावदेतया । (प्रकाशम् ।) सखि भर्तुर्वल्लभैषा । (घ)

माल०—ततः किमिदानीमात्मानमायासयिष्यामि । (इति सासूयं परावर्तते ।) (ङ)

राजा—सखे पश्य ।

भ्रूभङ्गभिन्नतिलकं स्फुरिताधरोष्ठं
सासूयमाननमितः परिवर्तयन्त्या ।
कान्तापराधकुपितेष्वनया विनेतुः
संदर्शितेव ललिताभिनयस्य शिक्षा ॥ ९ ॥

(क) हला का एसा पासपरिउत्तवअणेण भट्टिए सिणिद्धाए दिट्ठिए णिज्झाईअदि । (ख) णं इअं पासगदा इरावदी । (ग) सहि अदक्खिणो विअ भट्टा मे पडिभादि जो सव्वं देवीजणं उज्झिअ एक्काए मुहे बद्धलक्खो । (घ) चित्तगदं भट्टारं परमत्थदो गेण्हिअ असूअदि । होदु । कीडिस्सं दाव एदाए । हला भट्टिणो वल्लहा एसा । (ङ) तदो किं दाणिं अत्ताणं आआसेमि ।

उपजातिर्वृत्तम् ॥ ८ ॥ पार्श्वे परिवृत्तं वदनं येन स तथा तेन । स्निग्धया प्रेमयुक्तया । निध्यायते विलोक्यते । अदक्षिणः सर्वासु स्त्रीषु समरागो न भवति तथा । ततः किमिति—यतो मय्यपि एवमस्थिरप्रेमा भवेदिति भावः । सासूयम् असूया परप्रेमासहत्वं तया सहितं यथा स्यात्तथा ।] भ्रूभङ्गेत्यादि । [भ्रुवोर्भङ्गेन कुटिलतापादनेन भिन्नो विकृतः तिलको विशेषको यत्र तादृशम् । स्फुरितः अधरोष्ठः यत्र तत् । 'ओत्वोष्ठयोः समासे वा' इति वा पररूपम् । आननं सासूयं इतः चित्रप्रदेशात् परिवर्तयन्त्या अनया मालविकया विनेतुः आचार्यस्य गणदासस्य । कर्तरि षष्ठी । कान्तापराधकुपितेषु कान्तस्य प्रियस्य अपराधे अन्यस्त्रीसंगमादिरूपे कुपितानि क्रोधकरणानि । नपुंसके भावे क्तः । तेषु विषये ललितः रमणीयः यः अभिनयः कोपव्यञ्जकचेष्टाविशेषः तस्य । कर्मणि षष्ठी । शिक्षा संदर्शिता इव इत्युत्प्रेक्षा । वसन्ततिलकं वृत्तम्] ॥ ९ ॥ [अनुनयाय सान्त्वनाय सज्जः संनद्धः । उद्युक्त इति यावत् ।

---

१ पश्य ते सख्या मुखम्. २ ०रुषितेषु, विषयेष्व० ३ ईसिपरिउत्तवअणा, ०उत्तमुहेण. ४ भट्टिणो पास. ५ एव्व. ६ परमत्थं. ७ संकप्पिअ.

विदूषकः—अनुनयसज्ज इदानीं भव । (क)

माल०—आर्यगौतमोऽप्यत्रैव सेवत एनम् । (पुनः स्थानान्तराभिमुखी भवितुमिच्छति ।) (ख)

बकुला०—(मालविकां रुद्ध्वा ।) न खलु कुपितेदानीं त्वम् । (ग)

माल०—यदि चिरं कुपितामेव मां मन्यस एष प्रत्यानीयते कोपः । (घ)

राजा—(उपेत्य ।)

कुप्यसि कुवलयनयने चित्रार्पितचेष्टया किमेतन्मे ।
ननु तव साक्षादयमहमनन्यसाधारणो दासः ॥ १० ॥

बकुला०—जयतु भर्ता । (ङ)

माल०—(आत्मगतम् ।) कथं चित्रगतो भर्ता मयासूयितः । (इति सव्रीडवदनाऽञ्जलिं करोति ।) (च)

(राजा मदनकातर्यं रूपयति ।)

विदूषकः—किं भवानुदासीन इव । (छ)

राजा—अविश्वसनीयत्वात्सख्यास्तव ।

विदूषकः—अत्रभवत्यामयं तवाविश्वासः । (ज)

राजा—श्रूयताम् ।

(क) अणुणअसज्जो दाणिं होहि । (ख) अज्जगोदमो वि एत्थ एव सेवदि णं । (ग) ण खु कुविदा दाणिं तुमं । (घ) जइ चिरं कुविदं एव्व मं मण्णेसि एसो पच्चाणीअदि कोवो । (ङ) जेदु भट्टा । (च) कहं चित्तगदो भट्टा मए असूइदो । (छ) किं भवं उदासीनो विअ । (ज) अत्तहोदीए अअं तुह अविस्सासो ।

भव । प्रत्यानीयते । विगतोपीति शेषः ।] कुप्यसीत्यादि । [हे कुवलयनयने कमलेक्षणे चित्रे अर्पिता लिखिता या चेष्टा इरावत्यवलोकनरूपा तया मे मह्यं कुप्यसि किमेतत् । सर्वथाऽयुक्तमिदमित्यर्थः । ननु अयमहं अन्यासां स्त्रीणां साधारणो न भवतीति तथा । त्वदेकचित्त इत्यर्थः । तव साक्षात् प्रत्यक्षतया स्थितः दासोऽस्मि । आर्या] ॥ १० ॥ [असूयितः असूञ् उपतापे इत्यतः कण्ड्वादेः क्तः । व्रीडया व्रीडेन वा सहितं सव्रीडं सलज्जं वदनं यस्याः सा । वदनमिति पाठे सव्रीडं वदनं यस्मिन् कर्मणि तद्यथा तथा । मदनेन कामविकारेण कातर्यं धैर्याभावम् । उदासीनो निरुत्साहः ।

१ किमेवमयि. २ सव्रीड-प्रणय-वदनं. ३ निरूपयति. ४ गोदमो एत्थ णं संसं०.

पथि नयनयोः स्थित्वा स्वप्ने तिरोभवति क्षणा-
त्सरति सहसा बाह्वोर्मध्यं गतापि सखी तव ।
मनसिजरुजा क्लिष्टस्यैवं समागममायया
कथमिव सखे विश्रब्धं स्यादिमां प्रति मे मनः ॥ ११ ॥

बकुला०——सखि बहुशः किल भर्ता विप्रलब्धः । इदानीं तावदात्मा विश्वसनीयः क्रियताम् । (क)

माल०——सखि मम पुनर्मन्दभाग्यायाः स्वप्नसमागमोऽपि भर्तुर्दुर्लभ आसीत् । (ख)

बकुला०——भर्ता कथयत्वस्या उत्तरम् । (ग)

राजा——

उत्तरेण किमात्मैव पञ्चबाणाग्निसाक्षिकम् ।
तव सख्यै मया दत्तो न सेव्यः सेविता रहः ॥ १२ ॥

बकुला०——अनुगृहीते स्वः । (घ)

(क) सहि बहुसो किल भट्टा विप्पलद्धो । दाणिं दाव अत्ता विस्ससणिज्जो करीअदु । (ख) सहि मह उण मन्दभग्गाए सिविणसमाअमो वि भट्टिणो दुल्लहो आसि । (ग) भट्टा कहेदु से उत्तरं । (घ) अणुगहीदम्ह ।

अत्रभवत्यामयं तवाविश्वासः । अस्मिन्वाक्ये काकुरनुसन्धेया । **पथि नयनयोरित्यादि** । [तव सखी स्वप्ने नयनयोः पथि मार्गे स्थित्वा दृग्गोचरीभूय क्षणात् तिरोभवति दृष्टिपथान्नश्यति । बाह्वोर्मध्यं गतापि आलिङ्गनार्थं धृतापि सहसा अकस्मात्सरति अपगच्छति । अबला सतीति पाठे सहसा बलादित्यर्थः । एवं हे सखे समागममायया समागमे संगमे या माया प्रतारणा तया हेतुभूतया मनसिजरुजा कामव्याधिना क्लिष्टस्य पीडितस्य मम मनः इमां मालविकां प्रति कथं विश्रब्धं विश्वासयुक्तं स्यात् । न कथंचिदपीत्यर्थः । अनेन अस्या नायिकाया मुग्धात्वं ध्वनितम् । तदुक्तं साहित्यदर्पणे–' प्रथमावतीर्णयौवनमदनविकारा रतौ वामा । कथिता मृदुश्च माने समधिकलज्जावती मुग्धा ॥ ' इति । हरिणी वृत्तम् ॥११॥ विश्वसनीयो विश्वासार्हः ।] **उत्तरेणेत्यादि** । [उत्तरेणोत्तरदानेन कोऽर्थः । अत्र कर्तव्यनिर्देश एव समर्थमुत्तरमित्याशयेनाह–पञ्चबाण एव अग्निः पञ्चबाणाग्निः स साक्षी यस्मिन् कर्मणि तद्यथा तथा । मया आत्मा एव तव सख्यै दत्तः । मदनाग्निसाक्षिकं भार्यात्वेनाङ्गीकृतेत्यर्थः । स च ममात्मा रहः रहसि न सेव्यः मालविकया किं तु तस्याः सेवक एव । अद्यप्रभृति तस्याः सेवापर एव स्यामिति भावः । ' अत्र मदने वह्नित्वारोपस्य प्रकृते मालविकायै देहसमर्पणरूपे कार्ये उपयुक्तत्वात्परिणामालंकारः ' अ. रा.] ॥ १२ ॥

---

१ स्थित्वा. २ रहसि...गतापि पलायते. ३ गताऽप्यबला सती ४ क्लिश्यत्येव, क्लान्तस्य, आविष्टस्य. ५ दाव तुए अत्ता. ६ देहि, करेदु.

विदू०—(परिक्रम्य ससंभ्रमम् ।) बकुलावलिके एष बालाशोकवृक्षस्य पल्लवानि लङ्घयति हरिणः । एहि निवारयाव एनम् । (क)

बकुला०—तथा । (इति प्रस्थिता ।) (ख)

राजा—वयस्य एवमेवास्मिन्रक्षणक्षणेऽवहितेन त्वया भवितव्यम् ।

विदू०—एवमपि गौतमः संदिश्यते । (ग)

बकुला०—(परिक्रम्य ।) आर्य गौतम अहमप्रकाशे तिष्ठामि । त्वं द्वाररक्षको भव । (घ)

विदू०—युज्यते । (ङ)

(निष्क्रान्ता बकुलावलिका ।)

विदू०—इदं तावत्स्फटिकस्थलमाश्रितो भवामि । (तथा कृत्वा ।) अहो सुखस्पर्शता शिलाविशेषस्य । (इति निद्रायते ।) (च)

(मालविका ससा॒ध्वसं तिष्ठति ।)

राजा—

विसृज सुन्दरि संगमसाध्वसं
तव चिरात्प्रभृति प्रणयोन्मुखे ।
परिगृहाण गते सहकारतां
त्वमतिमुक्तलताचरितं मयि ॥ १३ ॥

मालविका—देव्या भयेनात्मनः प्रियं कर्तुं न पारयामि । (छ)

(क) बउलावलिए एसो बालासोअरुक्खस्स पल्लवाइं लङ्घेदि हरिणो । एहि णिवारेम णं । (ख) तह । (ग) एव्वं वि गोदमो संदिसेअदि । (घ) अज्ज गोदम अहं अप्पआसे चिट्ठामि । तुमं दुवाररक्खओ होहि । (ङ) जुज्जइ । (च) इमं दाव फलिहत्थलं अस्सिदो होमि । अहो सुहप्फरिसदा सिलाविसेसस्स । (छ) देवीए भएण अत्तणो पिअं कादुं ण पारेमि ।

लङ्घयति भक्षणार्थमाक्रामति । अयं राज्ञे रहो दातुमपसरणार्थं व्याज इति स्फुटमेव । रक्षणक्षणे इरावत्याद्यागमे रहस्यरक्षणावसरे । संदिश्यते कार्यज्ञस्य मम नैतदावश्यकमिति भावः ।] विसृजेत्यादि । [हे सुन्दरि संगमसाध्वसं संगमे यत्साध्वसं भयं तद्विसृज । चिरात्प्रभृति बहुकालादारभ्य तव प्रणयोन्मुखे प्रणयः प्रेम याञ्चा वा तस्य उन्मुखे उत्सुके मयि सहकारतामाम्रवृक्षत्वं सहचरत्वं च गते त्वमतिमुक्तलता माधवीलता तस्याश्चरितं कृत्यं परिगृहाण प्रतिपद्यस्व । अतिमुक्तलता यथा विगतसाध्वसा सर्वात्मना सहकारमालिङ्गति तथा मामालिंगेति भावः । अत्र मामालिंगेत्यस्य पर्यायेण भङ्ग्यन्तरेणाभिधानात्पर्यायोक्तमलङ्कारः । द्रुतविलम्बितं वृत्तम् ॥१३॥

---

१ अस्मद्रक्षणे., अमिन् रक्षणे. २ तथा त्वया. ३ ससाध्वसा. ४ ननु. ५ लंघिदुं इच्छेदि-आअच्छदि. ६ ०क्खम्भं. ७ संसिदो (संश्रितः). ८ अत्तणोवि.

राजा—अयि न[1] भेतव्यम् ।

मालविका—(सोपालम्भम् ।) यो न बिभेति स मया भट्टिनीदर्शने दृष्टसामर्थ्यो भर्ता । (क)

राजा—

दाक्षिण्यं नाम बिम्बोष्ठि बैम्बिकानां[2] कुलव्रतम् ।
तन्मे दीर्घाक्षि ये प्राणास्ते त्वदाशानिबन्धनाः ॥ ॥ १४ ॥

तदनुगृह्यतां चिरानुरक्तो[3]ऽयं जनः । (इति संश्लेषम[4]भिनयति ।)

(मालविका नाट्येन परिहरति ।)

राजा—(आत्मगतम् ।) रमणीयः खलु नवाङ्गनानां मदनविषय[5]व्यापारः । तथा हि ।

हस्तं कम्पवती[6] रुणद्धि रशनाव्यापारलोलाङ्गुलिं[7]
हस्तौ स्वौ नयति स्तनावरणतामालिङ्ग्यमाना बलात् ।
पातुं पक्ष्मलचक्षुरुन्नमयतः साचीकरोत्याननं
व्याजेनाप्यभिलाषपूरणसुखं निर्वर्तयत्येव[9] मे ॥ १५ ॥

(क) जो ण भाअदि सो मए भट्टिणीदंसणे दिट्ठसमत्थो भट्टा ।

सोपालम्भं सोल्लुण्ठम् । भट्टिनीदर्शने इरावतीदर्शने । दृष्टसामर्थ्यः इति । भर्तापि भीतः किमुताहमिति अर्थापत्त्योक्तम् । ०समवस्थ इति पाठे दृष्टा समा अवस्था यस्येति तथोक्तः ।] दाक्षिण्यमित्यादि । बैम्बिकास्तदन्त्या राजानः । [हे बिम्बोष्ठि बिम्बं पक्वतुण्डीफलमिव ओष्ठौ यस्यास्तथाभूते । दाक्षिण्यं सर्वासु दयितास्वनुकूलाचरणं नाम । नामेति प्राकाश्ये । कुलव्रतं सर्वैरवश्यं पालनीयो नियमः । तत्ततो हे दीर्घाक्षि दीर्घे अक्षिणी यस्यास्तथाभूते । 'बहुव्रीहौ सक्थ्यक्ष्णोः–' इति समासान्ते षचि 'षिद्गौरादिभ्यः' इति ङीष् । मे ये प्राणास्ते त्वदाशानिबन्धनाः तव या प्राप्त्याशा सा निबन्धनमाधारो येषां ते तथोक्ताः । इतरास्वानुकूल्येन वर्तमानस्यापि मे जीवितं त्वदधीनम् । त्वं मम प्राणभूतेत्यर्थः । पथ्यावक्त्रं वृत्तम् ।] ॥ १४ ॥ हस्तमित्यादि । [कम्पवती जातकम्पा रशनायां यो व्यापारः नीवीविश्लेषणार्थं चालनरूपस्तत्र लोला अङ्गुल्यो यस्य तम् । मम करं रुणद्धि प्रतिबध्नाति । बलात्प्रसह्य आलिङ्ग्यमाना आत्मनः हस्तौ स्तनयोः आवरणतामावरकत्वं नयति । हस्ताभ्यां कुचावाच्छादयतीत्यर्थः । प्रशस्तानि पक्ष्माणि अक्षिलोमानि ययोस्तादृशे चक्षुषी यत्र तत्तथोक्तम् । सिध्मादित्वात्प्रशंसायां मत्वर्थे लच् । आननं पातुं चुम्बितुमुन्नमयतोऽभिमुखमूर्ध्वं कुर्वतो मे । उन्नमयन्तं मामनादृत्येत्यर्थः ।

१ न भे० न भेतव्यं. २ नायकानां. ३ रक्तहृदयः. ४ उपजनयति. ५ विषयावतारः. ६ कम्पयते. ७ ०ङ्गुलीः. ८ नेत्रमु०. ९ संभवत्यो.

(ततः प्रविशतीरावती निपुणिका च ।)

इरावती—हञ्जे निपुणिके सत्यं त्वं परिगतार्था चन्द्रिकया समुद्रगृहालिन्दे शयित एकाकी आर्यगौतमो दृष्ट इति । (क)

निपुणिका—अन्यथा कथं भट्टिन्यै विज्ञापयामि । (ख)

इरावती—तेन हि तत्रैव गच्छामः संशयान्मुक्तमार्यपुत्रस्य प्रियवयस्यं प्रष्टुं च । (ग)

निपुणिका—सावशेषमिव भट्टिन्या वचनम् । (घ)

इरावती—चित्रगतमार्यपुत्रं प्रसादयितुं च । (ङ)

निपुणिका—अथ कथमिदानीं भर्तैव न प्रसाद्यते । (च)

इरावती—मुग्धे यादृशश्चित्रगतस्तादृश एवान्यसंक्रान्तहृदय आर्यपुत्रः । केवलमुपचारातिक्रमं प्रमार्जितुमयमारम्भः । (छ)

निपुणिका—इत इतो भट्टिनी । (ज)

(उभे परिक्रामतः ।)

(क) हञ्जे णिउणिए सच्चं तुमं[1] परिगदत्था चन्दिआए समुद्दघरआलिन्दे[2] सइदो एआई अज्जगोदमो दिट्ठोत्ति । (ख) अण्णहा[3] कह भट्टिणीए विण्णावेमि । (ग) तेण हि तहिं एव्व गच्छामो संसआदो मुत्तं अज्जउत्तस्स पिअवअस्सं पुच्छिदुं अ । (घ) सावसेसं विअ भट्टिणीए वअणं । (ङ) चित्तगदं[4] अज्जउत्तं पसादेदुं अ । (च) अह कहं[5] दाणिं भट्टा एव्व ण प्पसादीअदि । (छ) मुद्धे जारिसो चित्तगदो तारिसो[6] एव्व अण्णसंकन्तहिअओ अज्जउत्तो । केवलं उवआरादिक्कमं पमज्जिदुं अअं आरम्भो । (ज) इदो इदो भट्टिणी ।

षष्ठी च अनादरे इति षष्ठी । तत् साचीकरोति तिर्यग्धारयति । एवं व्याजेन प्रति-
षेधरूपेणापि मे अभिलाषपूरणेन संगमेच्छापूर्त्या यत्सुखं तन्निर्वर्तयति विदधात्येव ।
शार्दूलविक्रीडितं वृत्तम्] ॥ १५ ॥ चन्द्रिकया करणभूतया परिगतो ज्ञातोऽर्थो यया ।
यद्वा चन्द्रिकया दृष्ट इति योज्यम् । अर्थमाह समुद्रेति । संशयात्सर्पदंशोत्पन्नमरणभयात् ।
इरावत्या भाषणे चकारप्रयोगादाह सावशेषमिवेति । भट्टा एव साक्षाद्भर्ता । किमिति चित्र-
गतः प्रसाद्यते इत्यर्थः । मुग्धे मनुष्यस्वभावानभिज्ञे । यादृश इति । अधुना अन्यसंक्रा-
न्तहृदयत्वाच्चित्रगतस्य इव भर्तुः मत्सान्निध्ये भावानुदयादित्यर्थः । मत्सरस्य नायिकान्तरेण
सह द्वेषस्य । वयस्यया बकुलावलिकया । निगडबन्धने कृता शृङ्खलया निगृहीता ।

---

१ तुए संदिट्ठं. २ लिन्दे एआई. ३ अण्णहा भट्टिणीए ण विण्णावीअदि. ४ अण्णं अः ःम । चित्त०. ५ अहं दाणिं भट्टा एव किं ण पच्चणूणीअदि (प्रत्यनुनीयते); कहं भट्टा एव ण अणुणीअदि. ६ भट्टा ण तारिओ एव्व अण्ण० इत्य०.

(प्रविश्य ।)

चेटी—जयतु भट्टिनी । देवी भणति । न मे एष मत्सरस्य कालः । तव खलु बहुमानं वर्धयितुं वयस्यया सह निगडबन्धने कृता मालविका । यद्यनुमन्यस आर्यपुत्रस्य प्रियं कर्तुं तथा करोमि । यत्तवेष्टं तन्मे भणेति । (क)

इरावती—नागरिके विज्ञापय देवीम् । का वयं भट्टिनीं नियोजयितुम् । परिजननिगडनेन दर्शितो मय्यनुग्रहः । कस्य वान्यस्य प्रसादेनायं जनो वर्धत इति । (ख)

चेटी—तथा । (इति निष्क्रान्ता ।) (ग)

निपुणिका—(परिक्रम्यावलोक्य च ।) भट्टिनि एष द्वारदेशे समुद्गगृहस्य विपणिगत इव बलीवर्द आर्यगौतम आसीन एव निद्रायते । (घ)

इरावती—अत्याहितम् । न खलु सावशेषो विषविकारो भवेत् । (ङ)

निपुणिका—प्रसन्नमुखवर्णो दृश्यते । अपि च ध्रुवसिद्धिना चिकित्सितः । तदस्याशङ्कनीयं पापम् । (च)

(क) जेदु भट्टिणी । देवी भणादि । ण मे एसो मच्छरस्स कालो । तुह खु[1] बहुमाणं वड्ढेदुं वअस्सिआए सह णिअलबन्धणे किदा मालविआ । जइ अणुमण्णसि अज्जउत्तस्स पिअं कादुं तह करेमि । जं तुह इच्छिअं तं मे भणाहित्ति । (ख) णाअरिए विण्णावेहि देविं । का वअं भट्टिणिं णिओजेदुं । परिअणणिअलणेण[3] दंसिदो मइ अणुग्गहो । कस्स वा अण्णस्स पसादेण अअं जणो वड्ढदित्ति । (ग) तह । (घ) भट्टिणि एसो दुवारदेसे[4] समुद्दघरस्स विपणिगदो[5] विअ बलीवद्दो अज्जगोदमो आसीणो एव्व णिद्दाअदि । (ङ) अच्चाहिदं[6] । ण खु सावसेसो विसविआरो हवे । (च) पसण्णमुहवण्णो[7] दीसइ । अवि अ धुवसिद्धिणा चिइच्छिदो । ता से असङ्कणिज्जं पावं ।

अयं जनः अहमित्यर्थः । कस्य वान्यस्य अपि तु तवैवेत्यर्थः वर्धते उत्कर्षवान्भवति । विपणिगतः पण्यवीथिकास्थः । प्रसन्नः जीवत इव अकलुषः मुखवर्णो यस्य । चिकित्सितः कृतविषविकारप्रतिकारः । पापं मृत्युरूपम् ।] अत्याहितं नाम जीवानपेक्षि कर्म । 'अत्याहितं महाभीतिः कर्म जीवानपेक्षि च ।' इत्यमरसिंहः ।

---

१ केवलं तुह खु, तेण खु तुह. २ अज्जउत्तं वि तुह किदेविण्णविस्सं; विण्णावइस्सम् ३ निग्गहेण. ४ दुवारोच्छङ्गे (द्वारोत्सङ्गे); दुवारुदेसे (द्वारोद्देशे); दुवारे. ५ वुसहो विअ विसद्दो, णिवुत्तविसवेअ. ६ अम्हो । अच्चा०, किं णु खु अच्चा० । सावसेसो विअ विस०: सावसेसविसो, सावसेसे विसे विरतो भवे. ७ मुहो.

विदूषकः—(उत्स्वप्नायते ।) भवति मालविके— (क)

निपुणिका—श्रुतं भट्टिन्या । कस्यैष आत्मनीनो हताशः कितवः । सर्वकालमित एव स्वस्तिवाचनमोदकैः कुक्षिं पूरयित्वा सांप्रतं मालविकामुत्स्वप्नायते । (ख)

विदूषकः—इरावतीमतिक्रामन्ती भव । (ग)

निपुणिका—एतदत्याहितम् । इमं भुजंगभीरुकं ब्रह्मबन्धुमनेन भुजंगकुटिलेन दण्डकाष्ठेन स्तम्भान्तरिता भाययिष्यामि । (घ)

इरावती—अर्हत्येव कृतघ्न उपद्रवस्य । (ङ)

(निपुणिका विदूषकस्योपरि दण्डकाष्ठं पातयति ।)

विदूषकः—(सहसा प्रबुध्य ।) अविधा अविधा । भो वयस्य सर्पो म उपरि पतितः । (च)

राजा—(सहसोपसृत्य ।) सखे न भेतव्यं न भेतव्यम् ।

माल०—(अनुसृत्य ।) भर्तः मा तावत्सहसा निष्क्राम । सर्प इति भण्यते । (छ)

(क) भोदि मालविए । (ख) सुदं भट्टिणीए । कस्स एसो अंत्तणीणो[1] हदासो किदवो । सव्वकालं इदो एव्व सोत्थिवाअणमोदएहिं कुच्छिं पूरिअ संपदं मालविअं उस्सिविणावेदि । (ग) इरावदिं अदिक्कमन्ती होहि । (घ) ऐदं[2] अच्चाहिदं । इमं भुअङ्गभीरुअं बह्मबन्धुं इमिणा भुअङ्गकुडिलेण दण्डकट्ठेण खम्भन्तारिदा भाँअइस्सं[3] । (ङ) अरुहदि एव्व किदग्घो[4] उवद्दवस्स । (च) अविहा अविहा । भो वअस्स सप्पो[5] मे उवरि पडिदो । (छ) भट्टा मा दाव सहसा णिक्कम[6] । सप्पोत्ति भणीअदि[7] ।

[उत्स्वप्नायते निद्रावशो नरो यत्किंचित्स्वमनोगतं प्रकटयति तदुत्स्वप्नायित-मित्युच्यते । स्वस्तिवाचने लब्धा मोदकाः । स्वस्तिवाचनमोदकास्तैः ।] कस्यैष ...उत्स्वप्नायते । अत्र दोषोद्घाटनादपवादो नाम संध्यङ्गमुक्तं भवति । अत्रैव रोषभाषणात्संफेटो नाम संध्यंगमुक्तं भवति । [अतिक्रामन्ती अतिशयाना । इरावत्या अपि भर्तुः प्रेयसी । भाययिष्यामि भयाकुलं करिष्यामि । भियो णिच् । भीतेर्हेतुजन्यत्वाभावान्न षुक् । नाप्यात्मनेपदम्] 'उवद्दवस्स' इत्यत्र क्वचित् 'अर्हतेः' इति प्राकृते कर्मणि षष्ठी ॥ उपरि पतितः । अत्रोद्वेजनाद्युक्तिर्नाम संध्यङ्गमुक्तं भवति ॥ अनेन इरावत्यागमनं [कुटिलगतिः कुटिला वक्रा गतिर्यस्य । पक्षे गतिः प्रवृत्तिः ।

---

१ अत्तणिओअसंपादणे विस्ससणिज्जो हदासो; अब्भवहारसंवादापेक्खी ओदरिओ. २ सुदं एदं. ३ भाअआमि; ताडइस्सं. ४ किदवो (कितवः), किदग्घो सप्पदंसस्स. ५ दव्वीकरो (दर्वीकरः). ६ णिक्कमिस्ससि. ७ भणादि.

इरा०—हा धिक् हा धिक्। भर्तैत एव धावति। (क)

विदू०—(सप्रहासम्।) कथं दण्डकाष्ठमेतत्। अहं पुनर्जाने यन्मया केतकीकण्टकैर्दंशं कृत्वा सर्पस्य इव दंशः कृतस्तन्मे फलितमिति। (ख)

(प्रविश्य पटाक्षेपेण।)

बकुला०—मा तावद्भर्ता प्रविशतु। इह कुटिलगतिः सर्प इव दृश्यते। (ग)

इरा०—(स्तम्भान्तरिता राजानमुपेत्य।) अपि निर्विघ्नमनोरथो दिवासंकेतो मिथुनस्य। (घ)

(सर्वे इरावतीं दृष्ट्वा संभ्रान्ताः।)

राजा—प्रिये अपूर्वोऽयमुपचारः।

इरा०—बकुलावलिके दिष्ट्या दूत्याधिकारविषया संपूर्णा ते प्रतिज्ञा। (ङ)

बकुला०—प्रसीदतु भट्टिनी। किं नु खलु दर्दुरा व्याहरन्तीति देवः पृथिवीं विस्मरति। (च)

विदू०—मा तावत्। भवत्या दर्शनमात्रेणात्रभवान्प्रणिपातलङ्घनं विस्मृतः। भवती पुनरद्यापि प्रसादं न गृह्णाति। (छ)

(क) हद्धि हद्धि। भट्टा इदो एव्व धावदि। (ख) कहं दण्डकट्ठं एदं। अहं उण जाणे जं मए केदईकण्टएहि दंसं करिअ सप्पस्स इव दंसो किदो तं मे फलिदंति। (ग) मा दाव भट्टा पविसदु। इह कुडिलगई सप्पो विअ दीसदि। (घ) अवि णिव्विग्घमणोरहो दिवासंकेदो मिहुणस्स। (ङ) बउलावलिए दिट्ठिआ दुच्चाहिआरविसआ संपुण्णा दे पडिण्णा। (च) पसीददु भट्टिणी। किं णु खु दद्दुरा वाहरन्तित्ति देवो पुढवीं विसुमरेदि। (छ) मा दाव। होदीए दंसणमत्तेण अत्तभवं पणिवादलङ्घणं विसुमरिदो। होदी उण अज्जवि पसादं ण गेण्हेदि।

सूचितम्। दिवासंकेतः-दिवा दिवसे संकेतः समागमार्थं कृतः समयः। दूतस्य भावो दूत्यं स एवाधिकारः दूत्याधिकारा स विषयो यस्याः। दूत्यभिसार इति पाठे दूत्या अभिसारः संगमार्थं नायकनायिकयोः संकेतस्थलं प्रत्यानयनं स विषय उद्देश्यं यस्याः। दर्दुरा व्याहरन्त्याक्रोशन्तीति। [इति हेतोः देवः इन्द्रः पृथिवीं विस्मरति पृथिव्यां वर्षणं कर्तुं विस्मरति। अपि तु न। तथा मम जल्पितं श्रुत्वा देवः भट्टिनीं न

---

१ ससंभ्रमम्–मा २ एतन्नास्ति क्वचित् ३ प्रिये. ४ सप्पस्स उवरि अअसो (अयशः) किदं. ५ खु. ६ आव सिद्धा मणोरहा दिवासंकेदमिहुणस्स; दिवससंगमो. ७ देवीए पुढवीए देव्वो वरिसिदुं विरमति (देव्यां पृथिव्यां देवो वर्षितुं विरमति), पुढविं वरिसिदुं सुमरेदि. ८ अस्मात्परं–किं मए किदंति देवो पुच्छिद्दव्वो–इत्यधिकं क्वचित्. ९ तुमम्...गेण्हेसि.

इरा०—कुपितेदानीमहं किं करिष्यामि । (क)

राजा—अस्थाने कोप इत्यनुपपन्नं त्वयि । तथा हि ।

कदा मुखं वरतनु कारणादृते
तवागतं क्षणमपि कोपपात्रताम् ।
अपर्वणि ग्रहकलुषेन्दुमण्डला
विभावरी कथय कथं भविष्यति ॥ १६ ॥

इरा०—अस्थान इति सुष्ठु व्याहृतमार्यपुत्रेण । अन्यसंक्रान्तेष्वस्माकं भागधेयेषु यदि पुनः कुप्येयं ततो हास्या भवेयम् । (ख)

राजा—त्वमन्यथा कल्पयसि । अहं पुनः सत्यमेवं[1] कोपस्थानं न पश्यामि । कुतः ।

नार्हति कृतापराधोऽप्युत्सवदिवसेषु परिजनो बन्धम्[2] ।
इति मोचिते मयैते प्रणिपतितुं[3] मामुपगते च[4] ॥ १७ ॥

इरावती—निपुणिके गच्छ देवीं विज्ञापय । दृष्टो भवत्याः पक्षपातो नन्वद्येति । (ग)

(क) कुविदा दाणिं अहं किं करिस्सं । (ख) अट्ठाणेत्ति सुट्ठु वाहेरिदं[5] अज्जउत्तेण । अण्णसंकन्तेसु अह्माणं भाअहेएसु जदि उण कुप्पेअं[6] तदो हस्सा भवेअं । (ग) णिउणिए गच्छ । देवीं विण्णवेहि । दिट्ठो[7] भवदीए पक्खवादो णं अज्जत्ति ।

विस्मरिष्यतीति भावः । पृथिवीं वर्षितुं स्मरतीति पाठे यथा महेन्द्रकृतवृष्टौ दर्दुराक्रोशितानां न कश्चित्संबन्धः तथा मालविकापरिग्रहे न मदुक्तानां कश्चित्संबन्धः । यथा भेकशब्दं श्रुत्वा इन्द्रो न वर्षति तथा मदुक्तानि श्रुत्वा भर्ता मालविकां न परिग्रहीष्यतीति भावः । अस्थाने अकारणम् ।] **कदेत्यादि** । [हे वरतनु वरा श्रेष्ठा तनुः यस्यास्तत्संबुद्धौ । तव मुखं कारणादृते कारणं विना कदा क्षणमपि कोपपात्रतां क्रोधास्पदत्वं आगतम् । न कदापीत्यर्थः । तदेव दृष्टान्तेन विशदयति । विभावरी रात्रिः अपर्वणि पूर्णिमाभिन्नकाले ग्रहेण राहुणा कलुषं धूसरमिन्दुमण्डलं चन्द्रबिम्बं यस्यां तथा कथं भविष्यति । न कथमपीत्यर्थः । अत्र चन्द्रो रात्रेर्मुखस्थानीयः । दृष्टान्तालंकारः । रुचिरा वृत्तम् ॥ १६ ॥ अन्यसंक्रान्तेषु मालविकां गतेषु । हास्या उपहासार्हा । मम कोपस्याकिंचित्करत्वात् । स्थाने एव कोपो युज्यते इति भावः ।] **नार्हतीत्यादि** । [परिजनः सेवकजनः कृतः अपराधः मया सह भाषणरूपो येन स कृतापराधोपि उत्सवदिवसेषु बन्धं बन्धनं नार्हति इति अतो हेतोः एते मालविकाबकुलावलिके मया बन्धान्मोचिते । मां प्रणिपतितुमुपगते च । केवलं कृतज्ञतादर्शनार्थमागते नान्यस्मात्कारणादिति कृतमन्यथा कल्पनेयेति भावः] ॥ १७ ॥ [पक्षपातो

१ मेवात्र. २ बन्धुम्; दण्डम्. ३ समाजयितुम्. ४ अस्मात्परं—विदू०-दयालु खु एसो. भीरुओ अ । इत्यधिकं क्वचित्. ५ भणिदं. ६ कुपिदा भविस्सं. ७ दिट्ठं भ० पक्खवादित्तणं.

निपुणिका—तथा । (इति निष्क्रान्ता ।) (क)

विदूषकः—(आत्मगतम् ।) अहो अनर्थः संपतितः । बन्धनभ्रष्टो गृहकपोतो बिल्लाया मुखे पतितः । (ख)

(प्रविश्य ।)

निपुणिका—(अपवार्य ।) भट्टिनि यदृच्छादृष्टया माधविकया आख्यातम् । एवं खल्वेतन्निर्वृत्तमिति । (इति कर्णे कथयति ।) (ग)

इरावती—(आत्मगतम् ।) उपपन्नम् । सत्यमयमत्र ब्रह्मबन्धुना कृतः प्रयोगः । (विदूषकं विलोक्य । प्रकाशम् ।) इयमस्य कामतन्त्रसचिवस्य नीतिः । (घ)

विदूषकः—भवति यदि नीतेरेकमप्यक्षरं पठेयं तदा गायत्रीमपि विस्मरेयम् । (ङ)

राजा—(आत्मगतम् ।) कथं नु खल्वस्मात्संकटादात्मानं मोचयिष्यामि ।

(प्रविश्य ।)

(क) तह । (ख) अहो अणत्थो संपडिदो । बन्धणब्भट्टो गिहकवोदो बिल्लाए मुहे पडिदो । (ग) भट्टिणि जदिच्छादिट्ठाए माहविआए आचक्खिदं । एव्वं खु एदं णिव्वुत्तंति । (घ) उववण्णं । सच्चं अअं एत्थ बम्हबन्धुणा किदो पओओ । इअं इमस्स कामतन्तसचिवस्स णीदी । (ङ) भोदि जदि णीदिए एकंवि अक्खरं पढेअं तदो गाअत्तिं वि विसुमरेअं ।

मयि अनुकूला वृत्तिः । अद्य राज्ञो मालविकया संगमदिवसे । मालविका धारिण्यैव बन्धनान्मोचिता इति मन्वानाया इयं विपरीतलक्षणया निन्दोक्तिः । बन्धनाद्भ्रष्ट इति आपद आपदन्तरमापतितमित्यर्थः । यदृच्छया अतर्कितम् । निर्वृत्तं निष्पन्नम् । कामतन्त्रे मदनरहस्ये सचिवः साहाय्यकारी तस्य । यदि नीतेरिति । यदि नीतिज्ञानस्य गन्धोपि मयि स्यात्तर्हि गायत्रीमपि विस्मरेयम् । यथा गायत्रीविस्मरणं सम्यसंभाव्यं तथा नीतिज्ञानमपीत्यर्थः । पाठान्तरे–प्रेषितो भवेत् नीतिज्ञोहं चेद्राज्ञः मालविकायाश्च संगमं कुर्यामेव किं तु नैतदेवमित्यर्थः ।] [अनुधावन्ती अनुसृत्य

१ अपवार्य, स्वगतम्. २ मोक्ष्यामि, मोचयामहे-वहे. ३ प्र० सावेगं, सावेगा जय० ४ भो. ५ कवोदओ. ६ बिडालिआए आलोए; मन्दारलतालग्गो...चिल्लिआलोए. ७ वण्णं एव्व । बम्हबन्धुणाकिदो अअं;०वण्णं सव्वं बम्ह० उब्भिण्णो दुप्पओओ (उद्भिन्नो दुष्प्रयोगः). ८ णीदिगदं. ९ तदो णं,–णं मए अत्तभवं पेसिदो हवे; ण मए अत्तभवं संसिदो (संश्रितः) भवे· नीदावेकमपि अक्षरं पठितं तदात्मानं गोहत्यां प्रापितो भवेयम् (टी.)

जयसेना—(सावेगम् ।) देव कुमारी वसुलक्ष्मीः कन्दुकमनुधावन्ती पिङ्गलवानरेण बलवत्त्रासिताङ्कनिषण्णा देव्याः प्रवातकिसलयमिव वेपमाना न किमपि प्रकृतिं प्रतिपद्यते । (क)

राजा—कष्टम् । कातरो बालभावः ।

इरावती—(सावेगम् ।) त्वरतामार्यपुत्र एनां समाश्वासयितुम् । मास्याः संत्रासजनितो विकारो वर्धताम् । (ख)

राजा—अय[1]मेनां संज्ञापयामि । (इति सत्वरं परिक्रामति ।)

विदूषकः—(आत्मगतम् ।) साधु रे पिङ्गलवानर । साधु परित्रातस्त्वया संकटात्स्वपक्षः । (ग)

(निष्क्रान्तः[2] सवयस्यो राजा इरावती निपुणिका प्रतीहारी च ।)

मालविका—सखि देवीं चिन्तयित्वा वेपते मे हृदयम् । न जानेऽतः परं किं वानुभवितव्यं भविष्यतीति । (घ)

(नेपथ्ये)

आश्चर्यमाश्चर्यम् । अपूर्ण एव पञ्चरात्रे दोहदस्य मुकुलैः संनद्धस्तपनीयाशोकः । यावद्देव्यै निवेदयामि । (ङ)

(क) देव कुमारी वसुलच्छी कन्दुअं अ[3]णुधावन्ती पिङ्गलवाणरेण बलिअं ता[4]सिदा अ[5]ङ्कणिसण्णा देवीए प[6]वादकिसलअं विअ वेवमाणा ण किंवि पकिदिं पडिवज्जइ । (ख) तुवरदु अज्जउत्तो णं स[7]मस्सासइदुं । मा से संतासजाणिदो विआरो वड्ढदु[8] । (ग) साहु रे पिंगलवाणर । साहु परित्तादो तुए[9] संकटादो सपक्खो । (घ) हला देविं चिन्तिअं[10] वेवदि मे हिअअं । ण जाणे अदो वरं[11] किं वा अणुहविदव्वं हविस्सादित्ति । (ङ) अच्चरिअं अच्चरिअं । अपुण्णे एव्व पञ्चरत्ते दोहलस्स मुउलेहिं संणद्धो तवणीआसोओ । जाव देवीए णिवेदेमि ।

ग्रहणार्थं त्वरया गच्छन्ती । प्रवाते प्रकृष्टवातस्थले स्थितं किसलयं पल्लव इव वेपमाना कम्पमाना । न किमपि प्रकृतिं प्रतिपद्यते कथमपि स्वास्थ्यं न लभते । मोहं न जहातीति भावः । संज्ञापयामि संज्ञां चेतनां लम्भयामि । स्वपक्षः चापलकारित्वात्त्वत्पक्षोहमिति परिहासोक्तिः । अथ वा सपक्षः साहाय्यकारित्वादहं नृपश्च । देवीं चिन्तयित्वा यदेमं वृत्तान्तं देवी ज्ञास्यति तदा तस्याः कोपप्रकारं चिन्तयित्वेत्यर्थः । दोहदस्य मालविकाकृतस्य पादताडनरूपस्य । तस्मादारभ्य पञ्चरात्रेऽपूर्णे असमापिते

---

१ अयमहं. २ निष्क्रान्तौ राजा विदूषकश्च, निष्क्रान्तो वयस्येन. ३ अणुहोन्ती. ४ (त)डिदा, उत्तासिता. ५ अङ्के. ६ पवादचल, पवादे. ७ समस्सासेदुं ८ वुट्टदु. ९ तुए १० चिन्तअन्तीए. ११ किं अणुहोदव्वं.

(श्रुत्वा प्रहृष्टे[1])

बकुलावलिका—आश्वसितु सखी। सत्यप्रतिज्ञा देवी। (क)

मालविका—तेन हि प्रमदवनपालिकायाः पृष्ठतो भवावः। (ख)

बकुलावलिका—तथा। (ग)

(इति निष्क्रान्ते[2]।)

इति चतुर्थोऽङ्कः।

(क) आससिदु सही। सच्चप्पइण्णा देवी। (ख) तेण हि पमदवणपालिआए पुठ्ठदो होम। (ग) तह।

एव ॥ **सत्यप्रतिज्ञेति**। सत्या प्रतिज्ञा यद्यशोकः पञ्चरात्राभ्यन्तरे कुसुमं दर्शयति ततस्तवाभिलाषपूरयितृकं प्रसादं दास्यामीत्येवंरूपा यस्याः सा तथोक्ता। स्वप्रतिज्ञानुरूपमाचरिष्यत्येवेति भावः। इदमाश्वासे हेतुः।] अत्र देव्यनुग्रहरूपकार्यसंग्रहणादादानं नाम संध्यङ्गमुक्तं भवति ॥ **तेन हीति**। इदं मालविकाकृतमुद्यानपालिकानुसरणमुत्तराङ्कोपयुक्तद्वाद्बिन्दुरित्यनुसंधेयम् ॥

॥ इति श्रीकाटयवेमभूपविरचिते कुमारगिरिराजीये मालविकाग्निमित्रव्याख्याने चतुर्थोऽङ्कः ॥

---

१ प्रहृष्टे भवतः. २ निष्क्रान्ताः सर्वे.

पञ्चमोऽङ्कः ।

(ततः प्रविशत्युद्यानपालिका ।)

उद्यानपालिका—उपक्षिप्तो मया कृतसत्कारविधिस्तपनीयाशोकस्य वेदिकाबन्धः । यावदनुष्ठितनियोगमात्मानं देव्यै निवेदयामि । (परिक्रम्य ।) अहो दैवस्यानुकम्पनीया मालविका । तस्यां तथा चण्डी देव्यनेनाशोककुसुमवृत्तान्तेन प्रसादसुमुखी भविष्यति । कुत्र नु खलु भवेद्देवी । (विलोक्य ।) अहो एष देव्याः परिजनाभ्यन्तरः किमपि जतुमुद्रालाञ्छितां मञ्जूषां गृहीत्वा चतुःशालातः कुब्जः सारसको निष्क्रामति । प्रक्ष्यामि तावदेनम् । (ततः प्रविशति यथानिर्दिष्टः कुब्जः ।) (क)

उद्यान०—(उपसृत्य ।) सारसक कुत्र प्रस्थितोऽसि । (ख)

सारसकः—मधुकरिके विद्यापारगामिनां ब्राह्मणानां नित्यदक्षिणा दातव्या । तामार्यपुरोहितस्य हस्तं प्रापयितुम् । (ग)

उद्यान०—किंनिमित्तम् । (घ)

(क) उवक्खित्तो मए किदसक्कारविहिणो[1] तवणीआसोअस्स वेदिआबन्धो[2] । जाव अणुट्ठिदणिओअं अत्ताणं देवीए णिवेदेमि । अहो देव्वस्स अणुकम्पणीआ मालविआ । तस्सिं[3] तह चण्डिआ देवी इमिणा असोअकुसुमवुत्तन्तेण[4] पसादसुमुही[5] हविस्सदि । कहिं णु खु हवे देवी । अम्हो एसो देवीए[6] परिअणब्भन्तरो किंवि जदुमुद्दालञ्छिदं मञ्जूसं[7] गेण्हिअ चदुस्सालादो कुज्जो सारसओ[8] णिक्कमदि । पुच्छिस्सं दाव णं । (ख) सारसअ कहिं पत्थिदोसि । (ग) महुअरिए विज्जापारगामिणं[9] बह्मणाणं णिच्चदक्खिणा[10] दादव्या । तां अज्जपुरोहिदस्स हत्थं पाविदुं । (घ) किंणिमित्तं ।

कविरिदानीमङ्कान्तरमारभमाणः कथासंघटनार्थं प्रथमं प्रवेशकं नामार्थोपक्षेपकं प्रस्तौति—**ततः प्रविशतीत्यादिना** । [कृतः सत्कारसंबद्धः विधिः संमार्जनरङ्गवल्लीरचनादिः । दोहदादि सत्कारकर्म इति केचित् । यस्य तस्य । वेदिकाबन्धो मूलं परितो वेदिकारचना । दैवस्य अनुकम्पनीया दयार्हा । दैवं दयाप्रवणं जातमित्यर्थः । किमपि कमप्यर्थमुद्दिश्य । जतुनो लाक्षाया मुद्रया लाञ्छितां चिह्नितां मञ्जूषां पेटिकाम् । चतुःशालातः संजवनात् । विद्यापारगामिनामधीतवेदवेदाङ्गानाम् । नित्यदक्षिणा प्रतिदिनदेया दक्षिणा । दक्षिणां मासिकीमिति पाठे मासस्येयं मासिकी तावत्कालपर्याप्ता ।] कालात् ठञ् इति ठञ् । ततः टिड्ढाणञ्० इत्यादिना ङीप् । पुरोहितस्य राज्ञः पुरोधसः।

---

१ विहिणा. २ भित्तिबन्धो. ३ जं तस्सिं तह चण्डीकिदा. ४ हरिसदोहलवुत्त०. ५ दाभिमुही. ६ देवीपरि०. ७ चीरम०.; चीरबन्धं. ८ सारसिओ. ९ ०भरिआणं. १० दक्खिणा मासिआ; इमाइं दक्खिणाणिक्काणि । ताइं पुरो०.

सार०—यदाप्रभृति श्रुतं सेनापतिना यज्ञतुरंगरक्षणे नियुक्तो भर्तृदारको वसुमित्र इति तदाप्रभृति तस्यायुर्निमित्तमष्टादशसुवर्णपरिमाणां दक्षिणां देवी दक्षिणीयैः परिग्राहयति । (क)

उद्यान०—युज्यते । अथ कुत्र देवी । किं वानुतिष्ठति । (ख)

सार०—मङ्गलगृह आसनस्था भूत्वा विदर्भविषयाद्भ्रात्रा वीरसेनेन प्रेषितं लेखकैर्वाच्यमानं लेखं शृणोति । (ग)

उद्यान०—कः पुनर्विदर्भराजवृत्तान्तः । (घ)

सार०—वशीकृतः किल वीरसेनप्रमुखैर्भर्तुर्विजयदण्डैर्विदर्भनाथः । मोचितश्चास्य दायादो माधवसेनः । दूतश्च तेन महासाराणि रत्नवाहनानि शिल्पकारिकाभूयिष्ठं परिजनं चोपायनीकृत्य भर्तुः सकाशं प्रेषितः श्वः किल भर्तारं पश्यतीति । (ङ)

उद्यान०—गच्छ । अनुतिष्ठात्मनो नियोगम् । अहमपि देवीं प्रेक्षिष्ये । (इति निष्क्रान्तौ ।) (च)

प्रवेशकः ।

(ततः प्रविशति प्रतीहारी ।)

(क) [1]जदप्पहुदि सुदं सेणावइणा जण्णतुरंगरक्खणे णिउत्तो भट्टिदारओ वसुमित्तोत्ति तदप्पहुदि तस्स [2]आऊसणिमित्तं [3]अट्ठादससुवण्णपरिमाणं दक्खिणं देवी दक्खिणीएहिं परिग्गाहेदि ! (ख) जुज्जइ । अह कहिं देवी । किं वा अणुचिट्ठदि । (ग) मङ्गलघरे आसणत्था भविअ विदब्भविसआदो भादुणा वीरसेणेण पेसिदं लेह[4]करेहिं वाइअमाणं लेहं सुणादि । (घ) को उण विदब्भराअवुत्तन्तो[5] । (ङ) वसीकिदो किल वीरसेणप्पमुहेहिं भत्तुणो विजअदण्डेहिं विदब्भणाहो । मोइदो [6]अ से दाआदो माहवसेणो । दूदो अ तेण महासाराणि र[7]अणवाहणाणि सिप्पआरिआभूइट्ठं परिअणं अ उवाअणीकरिअ भट्टिणो सआसं पेसिदो सुवो किल भट्टारं देक्खिस्सादित्ति । (च) गच्छ । अणुचिट्ठ अत्तणो णिओअं । अहं वि देवीं[9] पेक्खिस्सं ।

श्रुतं देव्या इति शेषः । भर्तृदारकः राजपुत्रः । आयुर्निमित्तमायुषो वृद्धयर्थम् । अष्टादश सुवर्णाः स्वर्णकर्षाः परिमाणं यस्यास्ताम् । 'सुवर्णो ना स्वर्णकर्षे' इति विश्वः । दक्षिणीयो दक्षिणार्हः । 'कडङ्करदाक्षिणाच्छ च' इति छप्रत्ययः । [विजयन्ते शत्रूनिति विजयाः । एरच् इत्यच् । विजयाश्च ते दण्डाः सैन्यानि च तैः । 'दण्डः सैन्ये दमे यमे ।' इति हैमः। मोचितो वन्धादित्यर्थः। महान्सारो येषां तानि महासाराणि महार्घाणि। यद्वा महान्ति च तानि साराणि श्रेष्ठानि च तानि ।] **ततः प्रविशतीत्यादि।**

---

१ जदप्पहुदि सेनापदी (०पतिः) वसुमित्तो तद०. २ आउसो णि०. ३ णिक्कसदसु०. ४ लिपिअरेः, ०अरेहिं. ५ ०वुत्तन्तो सुणिअदि (श्रूयते). ६ किल. ७ रअणाणि ८ सिप्पिदारिआ. ९ देवीए सआसं गच्छम्हि । तुमं वि अत्तणो णिओअं अणुचिट्ठ.

प्रतीहारी—आज्ञप्तास्म्यशोकसत्कारव्यापृतया देव्या । विज्ञापय आर्यपुत्रम् । इच्छाम्यार्यपुत्रेण सहाशोकवृक्षस्य प्रसूनलक्ष्मीं प्रत्यक्षीकर्तुमिति । तद्यावद्धर्मासनगतं देवं प्रतिपालयामि । (इति परिक्रामति ।) (क)

(नेपथ्ये वैतालिकौ ।)

प्रथमः—दिष्ट्या दण्डेनारिशिरःसु वर्तते देवः ।

परभृतकलव्याहारेषु त्वमात्तरतिर्मधुं
नयसि विदिशातीरोद्यानेष्वनङ्ग इवाङ्गवान् ।
विजयकरिणामालानत्वं गतैः प्रबलस्य ते
वरद वरदारोधोवृक्षैः सहावनतो रिपुः ॥ १ ॥

द्वितीयः—

विरचितपदं वीरप्रीत्या सुरोपम सूरिभि-
श्चरितमुभयोर्मध्येकृत्य स्थितं क्रथकैशिकान् ।

(क) आणत्तह्मि असोअसक्कारवावुदाए देवीए । विण्णावेहि अज्जउत्तं । इच्छह्मि अज्जउत्तेण सह असोअरुक्खस्स पसूनलच्छि पच्चक्खीकादुंति । ता जाव धम्मासणगदं देवं पडिवालेमि ।

[अशोकस्य सत्कारः संमानकरणं तत्र व्यापृतया । प्रसूनलक्ष्मीं पुष्पशोभाम् । धर्मासनगतं न्यायासनस्थितम् । वैतालिकौ राज्ञः कालादेः बोधकरौ बन्दिविशेषौ । दण्डेन शासनेन ॥] **परभृतेत्यादि** । [हे वरद अभीष्टद । अङ्गवान् शरीरवान् अनङ्ग मदन इव परभृतानां कोकिलानां कलेषु मधुरेषु व्याहारेषु रुतेषु आत्ता कृता रतिः प्रीतिर्येन स आत्तरतिः त्वम् । राजपक्षे परभृतानां सेवकानाम् । बन्दिनामित्यर्थः । व्याहारेषु स्तुतिषु इत्यपि योज्यम् । विदिशा नाम नदी तस्याः तीरयोर्यानि उद्यानानि उपवनानि तेषु मधुं वसन्तं नयसि । यद्वा अङ्गवान् प्रशस्तशरीरवान् त्वम् । अनङ्गः काम इव । आत्ता गृहीता रतिः संतोषः तन्नाम्नी पत्नी च येन सः । विदिशातीरोद्यानेषु परभृतानां कोकिलानां बन्दिनां च कलव्याहारेषु मधुं वसन्तं माधुर्यं च नयसि । परभृतेति उद्यानविशेषणं वा । किं च प्रबलस्य ते तव विजयकरिणां विजयहस्तिनां आलानत्वं बन्धनस्तम्भत्वं गतैः । आलानांकैरुपोढबलस्येति पाठे उपोढवलस्य उपोढं वृद्धिं गतं बलं सामर्थ्यं यस्य तस्य प्रकृष्टसामर्थ्यस्य ते आलानमङ्कः चिह्नं येषां तैः । आलानांकैर्बन्धनशृंखलचिह्नितैः इत्यर्थः । 'आलानं बन्धस्तम्भेऽथ शृंखले' इत्यमरः । वरदारोधोवृक्षैः वरदा नाम विदर्भदेशस्था काचिन्नदी तस्या रोधसि स्थिता वृक्षा रोधोवृक्षास्तैस्तीरस्थतरुभिः सह रिपुः वैदर्भः अवनतः नम्रतां गतः । उत्तरार्धे सहोक्तिरलंकारः । हरिणी वृत्तम् ॥ १ ॥] **विरचितेत्यादि** । [हे सुरोपम देवतुल्य । परिघगुरुभिः

१ दण्डेनैव, दण्डैरेव रिपुशि०. २ ०मालानांकैरुपोढबलस्य. ३ एतन्नास्ति क्वचित्. ४ ०वत्सलाए. ५ ०रुक्खप्पसू०. ६ कुसुम.

तव हृतवतो दण्डानीकैर्विदर्भपतेः श्रियं
परिघगुरुभिर्दोर्भिः शौरेः[1] प्रसह्य च रुक्मिणीम् ॥ २ ॥

प्रतीहारी—एष जयशब्दसूचितप्रस्थानो भर्तैत एवागच्छति। अहमपि तावदस्य प्रमुखात्किंचिदपसृत्यैतन्मुखालिन्दतोरणं समाश्रिता भवामि। (इत्येकान्ते स्थिता।) (क)

(ततः[2] प्रविशति सवयस्यो राजा।)

राजा—

कान्तां विचिन्त्य सुलभेतरसंप्रयोगां
श्रुत्वा विदर्भपतिमानमितं बलैश्च।
धाराभिरातप इवाभिहतं सरोजं
दुःखायते च[3] हृदयं सुखमश्नुते च ॥ ३ ॥

(क) एसो जअसद्दसूइदप्पत्थाणो भट्टा इदो एव्व आअच्छदि। अहं वि दाव इमस्स पमुहादो[4] किंवि ओसरिअ[5] एदं मुहालिन्दतोरणं समस्सिदा होमि।

परिघास्त्रवद् दृढैः अर्गलादीर्घैरिति वा। प्रसह्य हठात् रुक्मिणीं हृतवतः शौरेः। शूरस्य गोत्रापत्यं पुमान् शौरिः कृष्णः तस्य। दण्डानीकैः शासकसेनाभिः विदर्भपतेः श्रियं प्रसह्य बलात् हृतवतः तव च। उभयोः चरितं सूरिभिः कविभिः वीरप्रीत्या शूरप्रीत्या विरचितानि पदानि शब्दाः यत्र तथाभूतं सत्।] क्रथकैशिकान् विदर्भदेशान् मध्येकृत्य। आक्रम्येत्यर्थः। 'मध्ये पदे निवचने च' इति गतिसंज्ञायां 'कुगतिप्रादयः' इति समासः। समासानन्तरं 'समासेऽनञ्पूर्वे क्त्वो ल्यप्' इति ल्यबादेशः। ["अत्र गुणोत्कृष्टेन विष्णुना राज्ञः समीकरणात्तुल्ययोगितालंकारः। तदुक्तं–'गुणोत्कृष्टैः समीकृत्य वचोऽन्या तुल्ययोगिता।' इति रत्नाकरदर्पणकारादीनां मते तु अत्र प्रकृताप्रकृतयोः समस्तत्वान्नायमलंकारः। तैरिह व्यस्तयोरेव प्रकृताप्रकृतयोः प्रयोजकतास्वीकारात्। अतस्तेषां मते दीपकमेवेदम्। तदुक्तं–प्रकृतानां चेतरेषामौपम्यं गम्यते यदि। समानधर्मसम्बन्धात् दीपकम्" इति' इति अ० रा०। हरिणी वृत्तम् ॥ २ ॥ जय इति शब्दो जयशब्दः तेन सूचितं प्रस्थानं यस्य सः। मुखे स्थितमलिन्दं मुखालिन्दं तस्य तोरणम्। **कान्तां विचिन्त्येत्यादि**। [कान्तां मालविकां] सुलभेतरसंप्रयोगां [सुलभादितरो दुर्घट इत्यर्थः संप्रयोगः प्राप्त्युपायो यस्याः ताम्।] दुर्लभसमागमाम्। [विचिन्त्य विदर्भपतिं मम बलैः सैन्यैः आनमितं वशीकृतं च श्रुत्वा। आतपे सूर्यप्रकाशे स्थितं धाराभिः वृष्टिपातैः अभिहतं ताडितं च सरोजमिव मम हृदयम्। एकस्य विषादहेतुत्वात्] दुःखायते। 'सुखादिभ्यः कर्तृवेदनायाम्' इति क्यङ्।] अपरस्य हर्षहेतुत्वात् सुखमश्नुते अनुभवति च। उपमासंकीर्णः यथासंख्यमलंकारः। वसन्ततिलका वृत्तम्] ॥ ३ ॥

१ विष्णोः, २ प्रविश्य सवयस्यः. ३ मम मनः ४ हालोआदो (आलोकात्) ५ ०रिअ खम्भान्तरिदा होमि.

विदूषकः—यथाहं पश्यामि तथैकान्तसुखितो भवान्भविष्यति ।(क)

राजा—कथमिव ।

विदूषकः—अद्य किल देव्या पण्डितकौशिकी भणिता । भगवति यत्त्वं प्रसाधनगर्वं वहसि तद्दर्शय मालविकायाः शरीरे वैदर्भं विवाहनेपथ्यमिति । तया च सविशेषालंकृता मालविका । तत्रभवती कदाचित्पूरयेद्भवतोऽपि मनोरथम् । (ख)

राजा—सखे मदपेक्षानुवृत्त्या[1] निवृत्तेर्ष्याया धारिण्याः पूर्वचरितैः संभाव्येते[2] एतत् ।

प्रतीहारी—(उपगम्य ।) जयतु भर्ता । देवी विज्ञापयति । तपनीयाशोकस्य कुसुमसौभाग्यदर्शनेन ममारम्भः सफलः क्रियतामिति ।(ग)

राजा—ननु तत्रैव देवी[3] ।

प्रतीहारी—अथ किम् । यथार्हसंमानसुखितमन्तःपुरं विसृज्य मालविकापुरोगेणात्मनः परिजनेन सह देवं प्रतिपालयति । (घ)

(क) जह अहं पेक्खामि[4] तह ऐकन्तसुहिदो[5] भवं हविस्सदि । (ख) अज्ज किल देवीएं[6] पण्डितकोसिकी भणिदा । भअवदि जं तुमं पसाहणगव्वं[7] वहसि तं दंसेहि मालविआए सरीरे वैदेब्भअं[8] विवाहणेवच्छंति । तीए[10] अं[11] सविसेसालंकिदा मालविआ । तत्तहोदी कदावि पूरेइ भवदोवि मणोरहं । (ग) जेदु[12] भट्टा । देवी विण्णावेदि । तवणीआसोअस्स कुसुमसोहग्गदंसणेण[13] मह आरम्भो सफलो[14] करीअदुत्ति । (घ) अह इं । जहारहसंमाण[15]-सुहिअं अन्तेउरं[16] विसज्जिअ मालविआपुरोएण अत्तणो परिअणेण सह[17] देवं पडिवालेदि ।

अत्र मालविकारूपबीजानुसंधानात्संधिर्नाम निर्वहणसंध्यङ्गमुक्तं भवति । [एकान्तमत्यन्तं सुखमस्य संजातमिति सुखितः ।] कथमिवेति प्रश्ने । अत्र कार्यान्वेषणाद्विरोधो नाम संध्यङ्गमुक्तं भवति । [प्रसाधनगर्वमहमेव प्रसाधिका अलंकर्त्रीत्येवंरूपम् । वैदर्भं विदर्भदेशीयम् । विदर्भदेशीयानां प्रसाधनविधौ प्रसिद्धत्वात् । विवाहसंबन्धि नेपथ्यमलंकरणम् । तत्रभवती धारिणीत्यर्थः ।] अत्र कार्योपदर्शनात्पूर्वभावो नाम संध्यङ्गमुक्तं भवति । [मदपेक्षानुवृत्त्या मदिच्छानुकूलवर्तनेन । निवृत्ता ईर्ष्या यस्याः तस्याः । यथार्हश्चासौ संमानश्च तेन सुखितम् । मालविका पुरोगा अग्रेसरी यस्य तेन ।

१ मदपेक्षानुवृत्त्याऽनया धारिण्यापूर्वा०; मदपेक्षामनुसृत्य-प्राप्य. २ एवैतत्. ३ तिष्ठति. ४ देक्खामि. ५ सव्वहा ए० ६ देवीए एव्वं धारिणीए. ७ णेउणं (नैपुण्यं). ८ तत्तभोदीए भा०. ९ नास्त्येतत्कचित्. १० तदो ताए. ११ वि. १२ जेदु जेदु. १३ ०सोहा (शोभा) कुसुमोग्गमासिरि अज्जउत्तेण सह पच्चक्खीकादुं इच्छामित्ति. १४ सफलीक. १५ ०संभाणण; यथाहं संमान्य सर्वं. १६ उरजणं. १७ पण्डिदकोसिकीए समं.

राजा—(सहर्षं विदूषकं विलोक्य ।) जयसेने गच्छाग्रतः ।

प्रतीहारी—इत इतो देवः । (सर्वे परिक्रामन्ति ।) (क)

विदूषकः—(विलोक्य ।) भो वयस्य किंचित्परिवृत्तयौवन इव वसन्त प्रमदवने लक्ष्यते । (ख)

राजा—[1]यथाह भवान् ।

अग्रे विकीर्णकुरबकफलजालक[2]भिद्यमानसहकारम् ।
परिणामाभिमुखमृतोरुत्सुकयति यौवनं चेतः ॥ ४ ॥

विदूषकः—(परिक्रम्य) भो अयं स दत्तनेपथ्य इव कुसुमस्तबकैस्तपनीयाशोकः । अवलोकयतु भवान् । (ग)

राजा—स्थाने खल्वयं प्रसवमन्थरोऽभूत् । यदिदानीमनन्यसाधारणीं शोभामुद्वहति । पश्य ।

सर्वाशोकतरू[3]णां प्रथमं सूचितवसन्तविभवानाम् ।
निर्वृत्तदोहदेऽस्मिन्संक्रान्तानीव कुसु[4]मानि ॥ ५ ॥

विदूषकः—भोः विस्रब्धो भव । अस्मासु संनिहितेष्वपि धारिणी पार्श्वपरिवर्तिनीं मालविकामनुमन्यते । (घ)

(क) [5]इदो इदो देवो । (ख) भो वअस्स किंचि[6] परिवुत्तजोव्वणो विअ वसन्तो पमदवणे लक्खीअदि । (ग) भो[7] अअं सो दिण्णणेवच्छो विअ कुसुमत्थवएहिं तवणीआसोओ । ओलोअदु भवं । (घ) भो[8] विसद्धो होहि । अह्मेसु सं[9]णिहिदेसु वि धारिणी पासपरिवट्टिणीं मालविअं [10]अणुमण्णेदि ।

परिवृत्तं गतं यौवनं तारुण्यं यस्य स तथोक्तः ।] **अग्रे विकीर्णेत्यादि** । [अग्रे पुरतः । विकीर्णानि कुरवकाणि कुरण्टकपुष्पाणि यत्र तत् विकीर्णकुरवकं च फलजालकेन भिद्यमानाः भिन्ना दृश्यमानाः सहकारा यत्र तच्च तथोक्तम् । यद्वा विकीर्णानां कुरवकाणां फलजालकेन भिद्यमानाः सहकारा यत्र तच्च तथोक्तम् । परिणामस्य अभिमुखं समाप्तमध्यावस्थं ऋतोः यौवनं चेतः उत्सुकयति सोत्कण्ठं करोति । आर्या वृत्तम् ॥ ४ ॥ दत्तनेपथ्यः कृतभूषणः । प्रसवमन्थरः प्रसवे पुष्पधारणे मन्थरः अलसः ।] **सर्वाशोकेत्यादि** । [प्रथमं वसन्तावताराम्भे सूचितः ज्ञापितः वसन्तस्य विभवः पुष्पादिसंपत्तिर्यैः तेषाम् । सर्वे च ते अशोकतरवस्तेषां कुसुमानि । निर्वृत्तः दोहदः नारीपादाघातरूपः यस्य स निर्वृत्तदोहदः तस्मिन् अस्मिन् पुरो दृश्यमाने तपनीयाशोके संक्रान्तानि इव । अस्य कुसुमातिशये सर्वेषां पुष्पाणामेकत्र समावेशकल्पनया क्रियोत्प्रेक्षालंकारः । आर्याजातिः ॥ ५ ॥ विश्रब्धः मालविकाप्राप्तिविषये विश्वस्तः । संनिहितेषु समीपस्थेषु । पार्श्वपरिवर्तिनीं तस्याः पार्श्वे अवस्थानमित्यर्थः ।]

---

१ यथावृत्तं भवानाह. २ ०विभि०, विभज्य०, कहीय०. ३ ०लतानां. ४ मुकुलानि. ५ एदु. एदु. ६ किंवि. ७ अहो. ८ तह । भो. ९ उवगतेसु. १० अणुणेदि.

राजा—(सहर्षम् ।) सखे पश्य ।

मामियमभ्युत्तिष्ठति देवी विनयादुपस्थिता[1] प्रियया ।
विस्मृतहस्तकमलया[2] नरेन्द्रलक्ष्म्या वसुमतीव ॥ ६ ॥

(ततः प्रविशति धारिणी[3] परिव्राजिका मालविका विभवतश्च परिवारः ।)

मालविका—(आत्मगतम् ।) जानामि निमित्तं कौतुकालंकारस्य । तथापि बिसिनीपत्रगतमिव सलिलं वेपते मे हृदयम् । अपि च दक्षिणेतरदपि मे नयनं बहुशः स्फुरति । (क)

विदू०—भो वयस्य विवाहनेपथ्येन सविशेषं खलु शोभते अत्रभवती मालविका । (ख)

राजा—पश्याम्येनाम्[4] । यैषा

अनतिलम्बिदुकूलनिवासिनी बहुभिराभरणैः[5] प्रतिभाति मे ।
उडुगणैरुदयोन्मुखचन्द्रिका[6] गतहिमैरिव[7] चैत्रविभावरी ॥ ७ ॥

देवी—(उपेत्य[8] ।) जयत्वार्यपुत्रः । (ग)

(क) जाणामि णिमित्तं कोदुआलंकारस्स[9] । तह वि बिसिणीपत्तगदं[10] विअ सलिलं वेवदि मे हिअअं । अवि अ दक्खिणेदरं वि मे णअणं[11] बहुसो फुरदि । (ख) भो[12] वअस्स विवाहणेवच्छेण सविसेसं खु सोहदि अत्तहोदि मालविआ । (ग) जेदु अज्जउत्तो ।

मामियमित्यादि । [इयं देवी धारिणी प्रियया मालविकया विनयात्सविनयमुपस्थिताऽनुवर्तमाना । अनूत्थिता इति पाठे देवीमुत्थितामनूत्थितेत्यर्थः । विस्मृतं हस्ते वर्तमानं कमलं यया तया विस्मृतहस्तकमलया नरेन्द्रलक्ष्म्या राजलक्ष्म्या उपस्थिता वसुमती भूदेवी इव मामभ्युत्तिष्ठति अभ्युत्थानेन संभावयति । विस्तृतहस्तकमलयेति पाठे विस्तृतं हस्त एव कमलं यस्याः । पक्षे विस्तृतं हस्तवर्ति कमलं यस्या इति योज्यम् । नरेन्द्रलक्ष्म्येत्युपमानेन मालविकाया भाग्यातिशयो ध्वनितः । वसुमतीवेति धारिण्याः क्षमाशीलता सूचिता । उपमालंकारः । आर्याजातिः ॥ ६ ॥ कौतुकं विवाहोत्सवस्तत्संबन्धी अलंकारो नेपथ्यविधानं तस्य । बिसिन्याः कमलिन्याः पत्रगतं पत्रस्थितम् । दक्षिणादितरत् दक्षिणेतरद् वाममित्यर्थः । वामनयनस्फुरणेनेष्टलाभः सूचितः ।] अनतिलम्बीत्यादि । [नातिलम्बते इत्यनतिलम्बि यद् दुकूलं क्षौमं तन्निवस्ते परिधत्ते इति निवासिनी । इयं मालविका बहुभिः आभरणैः युक्ता मे प्रतिभाति । केवेत्याह । गतमपसृतं हिमं कान्तिप्रतिबन्धकं तुहिनं येषां तैः उडुगणैः नक्षत्रसमूहैः युक्ता । उदयोन्मुखी आसन्नोदयेत्यर्थः । चन्द्रिका यस्यां तथाभूता चैत्रविभावरी चैत्ररात्रिः इव । उपमालंकारः । द्रुतविलम्बितं वृत्तम् ॥ ७ ॥

---

१ ०अनूत्थिता, वचनादनुत्थिता. २ विस्तृत. ३ देवी. ४ पश्याम्याभरणालंकृतामेनाम्. ५ लघुभि. ६ ०कौमुदी. ७ हत. ८ उपसृत्य. ९ मइ कोदु०. १० ०पुक्खरपत्तगब्भगअसलिलं, पुक्खरपत्तगअं. ११ णअणं पप्फु०. १२ भो असंदेहं वेवाहिअ.

विदूषकः—वर्धतां भवती । (क)

परिव्राजिका—विजयतां देवः ।

राजा—भगवति अभिवादये ।

परिव्राजिका—अभिप्रेतसिद्धिरस्तु ।

देवी—(सस्मितम् ।) आर्यपुत्र एष तेऽस्माभिस्तरुणीजनसहायस्याशोकः संकेतगृहं कल्पितः । (ख)

विदूषकः—भोः आराधितोऽसि । (ग)

राजा—(सव्रीडमशोकमभितः परिक्रामति ।)

नायं देव्या भाजनत्वं न नेयः सत्काराणामीदृशानामशोकः ।
यः सावज्ञो माधवश्रीनियोगे पुष्पैः शंसत्यादरं त्वत्प्रयत्ने[1] ॥ ८ ॥

विदूषकः—भो विस्रब्धो भूत्वा त्वं यौवनवतीमिमां पश्य । (घ)

देवी—काम् । (ङ)

विदूषकः—भवति तपनीयाशोकस्य कुसुमशोभाम् । (च)

(सर्वे उपविशन्ति ।)

राजा—(मालविकां विलोक्य । आत्मगतम् ।) कष्टः खलु संनिधिवियोगः[2] ।

(क) वड्ढदु भोदी । (ख) अज्जउत्त एस ते अह्मेहिं तरुणीजणसहाअस्स असोओ संकेदघरो[3] कप्पिदो । (ग) भो आराहिओसि । (घ) भो वीसद्धो भविअ तुमं जोव्वणवदिं इमं पेक्ख । (ङ) कं । (च) भोदि तवणीआसोअस्स कुसुमसोहम् ।

तरुणीजनः सहायः सहचरः यस्य तस्य तव । संकेतगृहं रतिसंकेतस्थानम् । त्वामत्र प्रियजनेन संगमयितुमिच्छाम इति ध्वनितोऽर्थः । व्रीडया व्रीडेन वा सहितं यथा तथा सव्रीडं सलज्जम् । अशोकमिति 'अभितः परित' इत्यादिना द्वितीया ।] **नायं देव्या इत्यादि** । [अयमशोकः देव्या ईदृशानां सत्काराणां संकेतकरणरूपसंमानानां भाजनत्वं पात्रतां न नेय इति न । अपि तु नेय एव । द्वौ नञौ प्रकृतार्थदार्ढ्यं गमयतः । यः अशोकः माधवश्रिया वसन्तलक्ष्म्या नियोगे कुसुमधारणरूपे सावज्ञः कृतावमाननः सन् त्वत्प्रयत्ने दोहदपूरणरूपे पुष्पैः पुष्पसमृद्ध्या आदरं शंसति । त्वत्प्रयत्ने दर्शितादरस्यास्य त्वया संमानकरणमत्यन्तमुचितमेवेति भावः । अत्र पूर्वार्धार्थे उत्तरार्धार्थस्य हेतुत्वात्काव्यलिङ्गमलंकारः । शालिनी वृत्तम् ॥ ८ ॥ इमां मालविकामिति विदूषकस्याभिप्रेतोऽर्थः । संनिधिवियोगः

१ यत्प्रयत्ने. २ वियोगो ममाद्य; कष्टं खलु ममाद्य संनिहितस्यापि विप्रयोगः ।
३ घरअं, गेहको.

अहं रथाङ्गनामेव प्रिया सहचरीव मे ।
अनुज्ञातसंपर्का धारिणी रजनीव नौ ॥ ९ ॥

(प्रविश्य[1] ।)

कञ्चुकी[2]—विजयतां[3] देवः । देव अमात्यो विज्ञापयति । तस्मिन् विदर्भविषयोपायने[4] द्वे शिल्पकारिके मार्गपरिश्रमादलघुशरीरे[5] इति[6] पूर्वं न प्रवेशिते । संप्रति देवोपस्थानयोग्ये[7] संवृत्ते । तदाज्ञां देवो दातुमर्हतीति ।

राजा—प्रवेशय ते ।

कञ्चुकी—यदाज्ञापयति देवः । (इति निष्क्रम्य ताभ्यां सह पुनः प्रविश्य ।) इत इतो भवत्यौ ।

प्रथमा—(जनान्तिकम् ।) सखि मदनिके अपूर्वमपीदं राजकुलं प्रविशन्त्याः प्रसीदति मे हृदयम् । (क)

द्वितीया—ज्योत्स्निके ममाप्येवमेव । अस्ति खलु लोकप्रवादः आगामि सुखं दुःखं वा हृदयसमवस्था कथयतीति । (ख)

प्रथमा—स सत्य इदानीं भवतु । (ग)

कञ्चुकी—एष देव्या सह देवस्तिष्ठति । उपसर्पतां भवत्यौ ।

(उभे उपसर्पतः ।)

(मालविका परिव्राजिका च चेट्यौ दृष्ट्वा परस्परमवलोकयतः ।)

(क) हला मदणिए[8] अपुव्वंवि इमं राअउलं पविसन्तीए पसीददि मे हिअं । (ख)[10] जोसिणीए महवि एव्वं एव । अत्थि खु लोअप्पवादो[11] आआमि सुहं दुक्खं वा हिअअसमवत्था कहेदित्ति । (ग) सो सच्चो दाणिं[12] होदु ।

संनिधौ सामीप्ये वियोगः ।] अहं रथाङ्गेत्यादि । [अहं रथाङ्गस्य चक्रस्य नाम यस्य स रथाङ्गनामा चक्रवाक इव । मे प्रिया मालविका सहचरी चक्रवाकी इव । नौ आवयोः अनुज्ञातसंपर्का अनुज्ञातः अनुमतः संपर्कः संगमो यया सा धारिणी रजनीव । उपमालंकारः । सा च पूर्वार्धे सामान्यधर्मानुपादानात् लुप्ता । उत्तरार्धे पूर्णा । पथ्यावक्त्रं वृत्तम् ॥ ९ ॥ विदर्भविषयाद्विदर्भदेशादागते उपायने । अलघु असुन्दरं जडं वा शरीरं ययोस्ते । देवोपस्थानयोग्ये देवस्य राज्ञस्तव

---

१. ततः प्रविशति कञ्चुकी. २ काञ्चुकेयः. ३ जयतु जयतु. ४ विदर्भराजोपायने. ५ ०अऊसशरीरे. ६ इति कृत्वा. ७ ०स्थाने. ८ रअणिए. ९ अब्भन्तरगदे अप्पा. १० हंजे जो०. ११ लोअवादो. १२ दाणिं णो.

उभे—(प्रणिपत्य ।) जयतु भर्ता । जयतु भट्टिनी । (क)

(रा[1]जाज्ञया उभे उपविष्टे ।)

राजा—कस्यां कलायाम[2]भिविनीते भवत्यौ ।

उभे—भर्तः संगीतेऽभ्यन्तरे स्वः । (ख)

राजा—देवि गृह्यतामनयोरन्यतरा ।

देवी—मालविके इतः पश्य । कतरा ते संगीतसहकारिणी रोचते । (ग)

उभे—(मालविकां दृष्ट्वा ।) अहो भर्तृदारिका । (प्रण[3]म्य ।) जयतु जयतु भर्तृदारिका । (इति तया सह बाष्पं विसृज[4]तः) (घ)

(सर्वे सविस्मयमवलोकयन्ति ।)

राजा—के भ[5]वत्यौ । का वेयम् ।

उभे—देव इयमस्माकं भर्तृदारिका । (ङ)

राजा—कथमिव ।

उभे—शृणोतु भर्ता । यः स भर्त्रा विजयदण्डैर्विदर्भनाथं वशीकृत्य बन्धनान्मोचितः कुमारो माधवसेनो नाम तस्येयं कनीयसी भगिनी मालविका नाम । (च)

देवी—कथं राजदारिकेयम् । चन्दनं खलु मया पादुकापरिभोगेण दूषितम् । (छ)

(क) जेदु भट्टा । जेदु भ[6]ट्टिणी । (ख) भट्टा संगीदे अब्भँन्तरेह्म । (ग) मालविए इदो पेक्ख[8] । कदरा ते संगी[9]दंसहआरिणी रुच्चदि । (घ) अह्मो भट्टिदारिआ । जेदु जेदु भट्टिदारिआ । (ङ) दे[10]वं इअं अह्माणं भट्टिदारिआ । (च) सुणादु भट्टा । जो सो भट्टि[11]णा विजअदण्डेहिं विदब्भणाहं वसीकरिअ बन्धणादो मोइओ कुमारो माहवसेणो णाम तस्स इअं कणीअसी भइणी मालविआ णाम । (छ) [12]कहं राअदारिआ इअं । चन्दणं खु मए पादुआपरिभोए[13]ण दूसिदं ।

उपस्थाने सेवायां योग्ये । हृदयसमवस्था हृदयस्य दशा । सत्यो भवतु सुखप्राप्त्येत्यर्थः । अभिविनीते शिक्षिते । अभ्यन्तरे लब्धशिक्षे । निपुणे इत्यर्थः । विजयदण्डैर्जयिनीभिः सेनाभिः । कनीयसी । 'युवाल्पयोः कनन्यतरस्याम्' इति युवशब्दस्य कनादेशः । ईयसुन उगित्वात् ङीप् । पादुकापरिभोगेण उपानहमिवोपयुज्येत्यर्थः । यथा सुरभिचन्दनस्य पादुकात्वेनोपयोगोऽत्यन्तं गर्ह्यस्तथा अस्या

---

१ राजनिर्देशात्. २ ०अभियोगो भवत्योः. ३ प्रणिपत्य. ४ विकिरतः. ५ वा भवत्यौ का चेयम्. ६ अस्मात्परं–राजा । स्वागतम् । इतो निषीदतम् । इत्यधिकं क्वचित्. ७ अभिविणीदे. ८ देक्ख. ९ ०सहाइणी. १० भट्टा एसा. ११ भट्टिणो. १२ अम्हो. १३ पादुभोवओएण (०कोपयोगेन).

राजा—अथात्रभवती कथमित्थंभूता ।

मालवि०—(निःश्वस्य । आत्मगतम् ।) विधिनियोगेन । (क)

द्वितीया—शृणोतु भर्ता । दायादवशंगतेऽस्माकं भर्तृदारके माधवसेने तस्यामात्येन आर्यसुमतिना अस्मादृशं परिजनमुज्झित्वा गूढमपनीतैषा । (ख)

राजा—श्रुतपूर्वं मयैतत् । ततस्ततः ।

द्वितीया—एतावदेव । अतः परं न जानीमः । (ग)

परिव्राजिका—अतः परमहं मन्दभाग्या कथयिष्यामि ।

उभे—भर्तृदारिके आर्यकौशिक्या इव स्वरसंयोगः । (घ)

माल०—ननु सैव । (ङ)

उभे—यतिवेषधारिण्यार्यकौशिकी दुःखेन विभाव्यते । भगवति वन्दावहे । (च)

परिव्राजिका—स्वस्ति भवतीभ्याम् ।

राजा—कथमाप्तवर्गोऽयं भगवत्याः ।

परिव्राजिका—एवमेतत् ।

विदू०—तेन हि कथयतु भगवत्यत्रभवत्या वृत्तान्तावशेषम् । (छ)

परिव्राजिका—(सवैक्लव्यम् ।) श्रूयतां तावत् । माधवसेनसचिवं सुमतिं ममाग्रजमवगच्छ ।

(क) विहिणिओएण । (ख) सुणादु भट्टा । दाआदवसंगदे अम्हाणं भट्टिदारए माहवसेणे तस्स अमच्चेण अज्जसुमदिणा अम्हारिसं परिअणं उज्झिअ गूढं अवणीदा एसा । (ग) एत्तिअं एव्व अदो वरं ण आणीमो । (घ) भट्टिदारिए अज्जकोसिईए विअ सरसंजोओ । (ङ) णं सा एव्व । (च) जदिवेसधारिणी अज्जकोसिई दुक्खेण विभावीअदि । भअवदि वन्दामो । (छ) तेण हि कहेदु भअवदी अत्तहोदीए उत्तंन्तावसेसं ।

अपि परिचारिकासु नियोजनमिति भावः । इत्थंभूता एतामवस्थां गता । अस्मादृशं दासीरूपम् । उज्झित्वा त्यक्त्वा । गूढमप्रकाशम् । स्वरसंयोगः स्वरसंघटना । तस्या इव अस्याः स्वर आभातीत्यर्थः । दुःखेन असौकर्येण । विभाव्यते अभिज्ञायते ।

---

१ ०एतावत्. २ ०भागिनी. ३ भवत्याः. ४ विहिणो णि०. ५ आणीदा. ६ भट्टा; भट्टा एत्तिअं जाणीमो न अदो परम्. ७ ०जोओ सुणीआदि. ८ णमो दे. ९ कहेदु दाणिं. १० उत्तान्तसेसं, उत्तान्तं दाव असेसम्.

राजा——उपलब्धम्[1] । ततस्ततः ।

परि०——स इमां तथागतभ्रातृकां मया सार्धमपवाह्य भवत्संबन्धापेक्षया पथिकसार्थं विदिशा[2]गामिनमनुप्रविष्टः ।

राजा——ततस्ततः ।

परि०——स चाटव्य[3]न्ते निविष्टो गताध्वा वणिग्ज[4]नो विश्रमितुम् ।

राजा——ततस्ततः ।

परिव्राजिका——ततः

तूणीर[6]पट्टपरिण[7]द्धभुजान्तराल-
मा[8]कर्णलम्बिशिखिपिच्छ[9]कलापधारि ।
कोदण्डपाणि निनदत्[10]प्रतिरोधकाना-
मापातदुष्प्रसहमाविरभूदनीकम् ॥ १० ॥

(मालविका भयं रूपयति ।)

विदू०——भवति मा बिभेहि । अतिक्रान्तं खलु भगवती कथयति । (क)

राजा——ततस्ततः ।

परि०——ततो मुहूर्तं बद्ध[11]युद्धास्ते पराङ्मुखीकृताः सार्थवाहयोद्धारस्तस्करैः ।

(क) भोदि मा भआहि । अदिक्कंतं खु भअवदी[12] कहेदि ।

तथागतभ्रातृकां तथागतो बन्धनं प्राप्तो भ्राता यस्यास्ताम् । अपवाह्य अपनीय । भवत्संबन्धापेक्षया भवता यः संबन्धो वैवाहिकस्तदपेक्षया तमुद्दिश्य । पथिकसार्थमध्वगसमूहम् । विदिशा अग्निमित्रस्य राजधानी तां गच्छतीति गामी तम् । गताध्वा गतः आक्रान्तः अध्वा मार्गो येन सः । **तूणीरपट्टेत्यादि** । तूणीरानां शरधीनां पट्टैर्बन्धनवध्रीभिः परिणद्धानि विशालतां गतानि भुजान्तरालानि भुजमध्यभागा यस्य । आकर्णं कर्णौ मर्यादीकृत्य लम्बते इति लम्बी शिखिपिच्छानां कलापस्तस्य धरतीति धारि । कोदण्डानि धनूंषि पाणिषु यस्य तत्कोदण्डपाणि । निनदत् शब्दायमानम् । आपाते प्रथमाभिगमे एव दुष्प्रसहं दुःखेन सोढुं शक्यम् । एवंविधं प्रतिरोधकानां मार्गप्रतिरोधिनामनीकं सैन्यमाविरभूत् प्रादुरासीत् । 'पिच्छबर्हे नपुंसकम्' इति, 'कलापो भूषणे बर्हे तूणीरे संहतावपि' इति, 'प्रतिरोधिपरास्कन्दि' इति चामरः । वसन्ततिलका वृत्तम् ॥ १० ॥ बद्धयुद्धाः बद्धं कृतं युद्धं यैस्ते । कृतयुद्धा इत्यर्थः । बद्धायुधा इति पाठे बद्धानि युद्धार्थमायुधानि यैस्ते ।

---

१ उपलक्षितं–तः; अस्मात्परं–विदू० । एत्तिअं सच्चं । राजा–इत्य० क्वचित् २ वैदिश. ३ ०व्यन्तरे; अटव्यामन्तरे. ४ ०जनोऽध्वश्रमार्तः; ०अध्वश्रमान्मार्गे. ५ किं चान्यत् किं नु भूयः. ६ ०बन्ध; बद्ध ७ ०परिबद्ध. ८ आपार्ष्णि. ९ ०बर्हकलापशोभि. १० विनदत्. ११ प्रतिबद्ध–बद्धायुधाः. १२ अत्र–तत्त–भोदी.

राजा—भगवति अतः परमिदानीं कष्टं श्रोतव्यम् ।

परिव्राजिका—ततः स मत्सोदर्यः

इमां परीप्सुर्दुर्जाते पराभिभवकातराम् ।
भर्तृप्रियः प्रियैर्भर्तुरानृण्यमसुभिर्गतः ॥ ११ ॥

प्रथमा—हा हतः सुमतिः । (क)

द्वितीया—अतः खलु भर्तृदारिकाया इयं समवस्था संवृत्ता । (ख)

(परिव्राजिका बाष्पं विसृजति ।)

राजा—भगवति तनुभृतामीदृशी लोकयात्रा । न शोच्यस्तत्रभवान्सफलीकृतभर्तृपिण्डः । ततस्ततः ।

परिव्राजिका—ततोऽहं मोहमुपगता यावत्संज्ञामुपलभे तावदियं दुर्लभदर्शना संवृत्ता ।

राजा—महत्खलु कृच्छ्रमनुभूतं भगवत्या ।

परिव्राजिका—ततो भ्रातुः शरीरमग्निसात्कृत्वा पुनर्नवीभूतवैधव्यदुःखया मया त्वदीयं देशमवतीर्येमे काषाये गृहीते ।

राजा—युक्तः सज्जनस्यैष पन्थाः । ततस्ततः ।

परिव्राजिका—तत इयमप्याटविकेभ्यो वीरसेनं वीरसेनाच्च देवी

(क) हा हदो सुमती । (ख) अदो खु भट्टिदारिआए इअं समवत्था संवुत्ता ।

सार्थवाहयोद्धारः वणिक्पक्षीया योधाः ।] इमामित्यादि । दुर्जाते आपदि पराभिभवकातराम् । परेषां शत्रूणां [शत्रुकृत इत्यर्थः । यद्वा परैः] अभिभवः आक्रमणं तस्मात्कातरां भीतामिमां मालविकां परीप्सुः पर्याप्तुं परित्रातुमिच्छुः । 'आप्ज्ञप्यृधामीत्' इतीत्त्वम् । 'अत्रलोपोऽभ्यासस्य' इत्यभ्यासलोपः । '.पर्याप्तिः स्यात्परित्राणं हस्तधारणमित्यपि' इत्यमरः । भर्तृप्रियः स्वामिभक्तः । प्रियैरिष्टैः [प्रयत्नेन रक्षणीयैरपि] असुभिः प्राणैर्भर्तुः [अनृणस्य भावः] आनृण्यमनृणत्वं गतः प्राप्तः। [आत्मनः भर्तृदत्तं पालनरूपमृणं तद्दुहितृरक्षणे स्वप्राणव्ययेन निरयातयत् ।] मृत इति भावः ॥ ११ ॥ तनुभृतां देहिनाम् । तनुत्यजामिति पाठे तनुं त्यजन्ति म्रियन्ते इति तनुत्यजो मर्त्यास्तेषामित्यर्थः । लोकयात्रा लोकस्थितिः । सफलीकृतो भर्तृपिण्डो भर्तृदत्तं वेतनं येन सः । दुर्लभं दर्शनं यस्यास्तथाभूता । केनाप्यपहृतेत्यर्थः । कृच्छ्रं कष्टम् । अग्निसात्कृत्वा दग्ध्वेत्यर्थः । पुनः भ्रातृमरणेन । काषाये कषायेण वर्णेन रञ्जिते वाससी परिगृहीते परिव्राजिकात्वं स्वीकृतम् । आटविकेभ्यः वनचरेभ्यः । तस्करेभ्य

---

१ हन्त इतः परं कष्टतरं. २ सुमतिः. ३ दुर्जातेः. ४ विकिरति. ५ ०त्यजां. ६ शोचितव्यः. ७ ०प्रतिज्ञः. ८ कष्टं ९ भ्रातृ १० ०कृत. ११ त्वदीयदेश. १२ सेयं. १३ अहो; हंहो गदो तादो मरणम्; हदो तादो अज्जसुमदी अम्हाणम्. १४ एआरिसी.

गता देवीगृहे लब्धप्रवेशया मया पुनर्दृष्टा । इत्येतदवसानं कथायाः ।

मालविका—(आत्मगतम् ।) किं नु खलु सांप्रतं भर्ता भणति (क)

राजा—अहो परि[1]भवोपहारिणो विनिपाताः । कुतः ।

प्रेष्यभावेन नामेयं देवीशब्दक्षमा सती ।
स्नानीयवस्त्रक्रियया प[2]त्रोर्णं वोपयुज्यते ॥ १२ ॥

देवी—भगवति त्वयाभिजनवतीं मालविकामनाचक्षाणयाऽसांप्रतं कृतम् । (ख)

परि०—शान्तं पापं शान्तं पापम् । का[3]रणेन खलु मया नैर्भृ[4]त्यमवलम्बितम् ।

देवी—किमिव तत्कारणम् । (ग)

राजा—यदि वक्तव्यं कथ्यताम् ।

परि०—श्रूयताम् । इयं पि[5]तरि जीवति केनापि लोक[6]यात्रागतेन सिद्धादेशेन[7] साधुना मत्समक्ष[8]मादिष्टा संवत्सरमात्रमित्थं प्रेष्यभावमनुभूय ततः सदृशभर्तृगामिनी भविष्यतीति । तद[9]वश्यंभाविनमादेशमस्यास्त्वत्पादशुश्रूषया परिणमन्तमवेक्ष्य कालप्रतीक्षया मया सा[10]धुकृतमिति पश्यामि ।

राजा—युक्ता प्र[11]तीक्षा ।

(क) किं णु खु संपदं भट्टा भणादि । (ख) भअवदि तुए अभिजनवदिं मालविअं अणाचक्खन्तीए असंपदं किदम् । (ग) किं वि[12]अ तं कारणम् ।

इति यावत् । अवसानं समाप्तिः । विनिपाता आपदः । परिभवमपमानमुपहरन्तीति परिभवोपहारिणः । **प्रेष्यभावेनेत्यादि** । [देवीशब्दक्षमा] देवीशब्दयोग्या सती इयं मालविका प्रेष्यभावेन परिचारकत्वेन उपयुज्यते नाम नियुज्यते किल । पत्रोर्णं वा धौतकौशेयमिव । वेत्युपमायाम् । 'उपमायां विकल्पे वा' इत्यमरसिंहः । स्नानीयवस्त्रक्रियया स्नानीयवस्त्रकरणेन । [स्नात्यनेनेति स्नानीयं स्नानोपयुक्तं वस्त्रम् । पत्रोर्णं धौतकौशेयमित्यमरः । नामेति कुत्सायां वा । मालविका दासीत्वेनोपयुक्तेति अयुक्तं कृतमित्यर्थः । उपमालंकारः । पथ्यावक्त्रं वृत्तम् ।] ॥ १२ ॥ [अभिजनवतीमुन्नतवंशसंभवाम् । असांप्रतमयुक्तम् । शान्तं पापम् । परोक्तानङ्गीकारार्थमेतत् । कारणेन विशिष्टहेतुना । नैभृत्यं मौनमिति यावत् । नैर्घृण्यमिति पाठे निर्दयत्वम् । लोकयात्रा जीवनार्थं भ्रमणम् । सिद्धादेशेन सिद्धो निश्चयेन भावी आदेशो यस्य तेन । प्रेष्यभावं दास्यमित्यर्थः । परिणमन्तं सिध्यन्तम् । कालस्य प्रतीक्षया संवत्स-

---

१ परिभवप्रहारिणः. २ पत्रोर्णंवो०; पत्रोर्णमुप०. ३ केन च का०. ४ नैर्घृण्यं; नैर्भृत्यं. ५ परिदीव्यन्ती. ६ देव. ७ ०देशकेन. ८ ०मक्षं समा. ९ ०एवंभावि०. १० तत्साधु. ११ उपेक्षा. १२ विअ एत्थ का०.

कञ्चुकी[1]**—**देव कथान्तरेणान्तरितम्[2] । अमात्यो विज्ञापयति । विदर्भगतमनुष्ठेयम्[3]अवधारितमस्माभिः । देवस्य तावदभिप्रेतं[4] श्रोतुमिच्छामीति ।

राजा—मौद्गल्य तत्रभवतोर्भ्रात्रोर्यज्ञसेनमाधवसेनयोर्द्वैराज्यमिदानीमवस्थापयितुकामोऽस्मि[5] ।

तौ पृथग्वरदाकूले शिष्टामुत्तरदक्षिणे ।
नक्तंदिवं[6] **विभज्योभौ शीतोष्णकिरणाविव ॥ १३ ॥**

कञ्चुकी—देव एवममात्यपरिषदे निवेदयामि[7] ।

राजा—(अङ्गुल्या अनुमन्यते ।)

(निष्क्रान्तः कञ्चुकी ।)

प्रथमा—(जनान्तिकम् ।) भर्तृदारिके दिष्ट्या भर्तृदारकोऽर्धराज्ये प्रतिष्ठां गमिष्यति । (क)

मालविका—एतत्तावद्बहु मन्तव्यं यज्जीवितसंशयान्मुक्तः । (ख)

(प्रविश्य ।)

कञ्चुकी—विजयतां देवः । देव अमात्यो विज्ञापयति । कल्याणी[8] देवस्य बुद्धिः । मन्त्रिपरिषदोऽप्येवमेवं[9] दर्शनम् । कुतः ।

द्विधा विभक्तां श्रियमुद्वहन्तौ धुरं रथाश्वाविव संग्रहीतुः ।
तौ स्थास्यतस्ते नृपती[10] **निदेशे परस्परावग्रहनिर्विकारौ**[11] **॥ १४ ॥**

(क) भट्टदारिए दिट्ठिआ भट्टदारओ[12] अद्धरज्जे पडिट्ठं गमिस्सदि । (ख) एदं दाव बहु मन्तव्वं जं जीविदसंसआदो मुत्तो ।

रावसानं प्रतीक्षमाणया । विदर्भगतं विदर्भनृपसंवद्धम् । अनुष्ठेयं करणीयं कार्यम् । द्वैराज्यं द्वयो राज्ञोर्भावः कर्म वा । ब्राह्मणादित्वात् ष्यञ् । अवस्थापयितुं कामः यस्य सः । 'तुं काममनसोरपि' इति मकारलोपः ।] **तौ पृथगित्यादि** । तौ यज्ञसेनमाधवसेनौ पृथक्पार्थक्येनोत्तरदक्षिणे वरदाकूले । वरदा नाम तत्रत्या नदी तस्याः कूले उभे तीरे शिष्टां रक्षताम् । [वरदाया दक्षिणोत्तरयोस्तयोः पार्थक्येन राज्यमस्तु । काविवेत्याह–शीतकिरणश्चन्द्रः उष्णकिरणः सूर्यस्तौ । द्वंद्वान्ते श्रूयमाणः किरणशब्दः प्रत्येकं संबध्यते । नक्तंदिवं रात्रिदिने । 'अचतुरविचतुर...' इति निपातनात्साधु । विभज्य पृथक् कृत्वा इव । उपमालंकारः ॥ १३ ॥ दर्शनं विचार्य निश्चितं मतम् ।] **द्विधेत्यादि** । द्विधा विभक्तां धुरम् उद्वहन्तौ धारयन्तौ रथाश्वौ रथस्य वोढारौ अश्वौ संग्रहीतुः संयन्तुः । सारथेरित्यर्थः । इव द्विधा विभक्तां श्रियं राज्यलक्ष्मीमुद्वहन्तौ तौ नृपती परस्परस्यावग्रहेण नियन्त्रणेन निर्विकारौ

---

१ अस्मात्प्राक्–प्रविश्य कञ्चुकी । इत्य० २ ०रितमिदम्. ३ अनुष्ठितमभूत्. ४ अभिमतं, अभिप्रायं. ५ द्वयो राज्यं स्थापयितुमिच्छामि. ६ नक्तंदिनं. ७ विज्ञापयामि. ८ अहो देवस्य. ९ एतदेव. १० नृपते, नृपतेः. ११ ०रोपग्रह. १२ महिणा भट्ट...गमइस्सदि.

राजा—तेन हि मन्त्रिपरिषदं ब्रूहि । सेना[1]पतये वीरसेनाय लि[2]-ख्यतामेवं क्रियतामिति ।

कञ्चुकी—यदाज्ञापयति देवः । (इति निष्क्रम्य सप्राभृतकं लेखं गृहीत्वा पुनः प्रविष्टः ।) अनुष्ठिता प्रभोराज्ञा । अयं पुनरिदानीं देवस्य सेनापतेः पुष्पमित्रस्य सकाशात्स[3]प्राभृतको लेखः प्राप्तः । प्रत्यक्षीकरोत्वेनं देवः ।

(राजा सहसो[4]त्थाय सोप[5]चारं गृहीत्वा प्राभृतकं परिजनायार्पयति ।)

(लेखं च नाट्येनोद्वेष्टयति ।)

देवी—(आत्मगतम् ।) अहो ततोमुखमेव नो हृदयम् । श्रोष्यामि तावद्गुरुजनस्य कुशलानन्तरं वसुमित्रस्य वृत्तान्तम् । अधिकारे खलु मे पुत्रकः सेनापतिना नियुक्तः । (क)

राजा—(उपविश्य वा[6]चयति ।) स्वस्ति । यज्ञशरणात्सेनापतिः पुष्पमित्रो वैदि[7]शस्थं पुत्रमायुष्मन्तमग्निमित्रं स्नेहात्परि[8]ष्वज्यानुदर्शयति । विदितमस्तु । योऽसौ रा[9]जयज्ञदीक्षितेन मया राजपुत्रशतपरिवृतं वसुमित्रं गोप्तारमादिश्य सं[10]वत्सरोपावर्तनीयो निरर्गलस्[11]तुरगो वि[12]सृष्टः [13]स

(क) अह्महे तदोमुहं एव्व णो हिअअं । सुणिस्सं दाव गुरुअण[14]स्स कुसलाणन्तरं वसुमित्तस्स वुत्तन्तं । [15]अहिआरे खु मे पुत्तओ सेणावदिणा णिउत्तो ।

निर्बाधौ । यद्वा परस्परबाधाशून्यौ । रथाश्वयोरपि एतद्योज्यम् । तव निदेशे स्थास्यतः आज्ञानुरोधेन वर्तिष्येते । उपमालंकारः । वृत्तमुपजातिः । ॥ १४ ॥ प्राभृतमुपायनमेव प्राभृतकम् । स्वार्थे कः । प्राभृतकेन सहितं सप्राभृतकम् । 'प्राभृतं तु प्रदेशनम् । उपायनम्' इत्यमरः । सोत्तरीयप्रा० इति पाठे उत्तरीयं संव्यानम् । उत्तरस्मिन्देहभागे भवमुत्तरीयम् । सोपचारं उचितसमानसहितम् । ततोमुखं ततो लेखश्रवणे एव मुखं यस्य तत् । तच्छ्रवणोत्सुकमित्यर्थः । अतिघोरे इति पाठे अतिसंकटे सैनापत्यरूपे कर्मणि ।] अह्महे इति हर्षे । [स्वस्ति लेखस्याग्रे मङ्गलार्थे एतत्प्रयुज्यते । यज्ञशरणाद्यज्ञगृहात् । वैदिशस्थं विदिशास्थम् । अनुदर्शयति आत्मवृत्तान्तं पुरतो लिखति ।] राजयज्ञो नामाश्वमेधः । [राजयज्ञो राजसूयाख्यः । 'राजसूयो नृपाध्वरः' इति त्रिकाण्डशेषः । तत्र दीक्षितेन गृहीतदीक्षेण ।] राजपुत्रशतपरिवृतं राजपुत्राणां शतेन परिवेष्टितम् । तथा च श्रुतावश्वमेधप्रकरणे 'शतेन राजपुत्रैः सह' इति । [संवत्सरेण एकेन वर्षेण उपावर्तनीयो निवर्तनीयः । ०पात्तनियम इति पाठे संवत्सरं यावदुपात्तो गृहीतः नियमः प्रतिनिवर्तनरूपो येनेति स एवार्थः । निरर्गलः निर्गता अर्गला निरोधो यस्मात् ।

१ सेनान्ये. २ लेख्यताम्. ३ सोत्तरीयप्रा. ४ उपसृत्य. ५ सप्राभृतकं लेखं सोप० परिजनायार्पयति । परिजनो लेखं नाट्येनोद्घाटयति. ६ लेखं सोपचारं गृहीत्वा वाचयति. ७ वैदिशस्तत्रत्यं; वैदिश्यम्. ८ ०ष्वज्येदं. ९ राजसूय. १० वत्सरोपात्तनियम. ११ तुरंगः. १२ विसर्जितः. १३ स सिद्धार्थः. १४ अणकुस० १५ अदिघोरे, तुरगरक्षाधिकारे.

सिन्धोर्दक्षिणरोधसि चरन्नश्वानीकेन यवनानां[1] प्रार्थितः । तत उभयोः सेनयोर्महानासीत्संमर्दः[2] ।

(देवी विषादं नाटयति[3] ।)

राजा—कथमीदृशं संवृत्तम्[4] । (शेषं पुनर्वाचयति ।)

> ततः परान्पराजित्य वसुमित्रेण धन्विना ।
> प्रसह्य[5] ह्रियमाणो मे वाजिराजो निवर्तितः ॥ १५ ॥

देवी— अनेनाश्वस्तं मे हृदयम् । (क)

राजा—(लेखशेषं[6] वाचयति ।) सोऽहमिदानीमंशुमतेव[7] सगरः पौत्रेण प्रत्याहृताश्वो यक्ष्ये । तदिदानीमकालहीनं विगतरोषचेतसा भवता वधूजनेन सह यज्ञसेवनायागन्तव्यमिति[8] ।

राजा—अनुगृहीतोऽस्मि ।

परिव्राजिका—दिष्ट्या पुत्रविजयेन दंपती वर्धेते[9] । (देवीं विलोक्य ।)

> भर्त्रासि वीरपत्नीनां श्लाघ्यानां[10] स्थापिता धुरि ।
> वीरसूरिति शब्दोऽयं तनयात्त्वामुपस्थितः ॥ १६ ॥

विदूषकः[11]—भवति परितुष्टोस्मि यत्पितरमनुगतो वत्सः । (ख)

(क) इमिणा[12] आसंसिदं मे हिअअं। (ख) भोदि परितुठ्ठोम्हि जं पिदरं अणुगदो वच्छो ।

निष्प्रातिवन्धचारीत्यर्थः । सिन्धोर्नाम नदस्य । दक्षिणरोधसि दक्षिणतीरे । अश्वानीकेन अश्वारोहसैन्येन । प्रार्थितः युद्धचिकीर्षया निगृहीतः । संमर्दो युद्धम् ।] **ततः परानित्यादि** । [ततो जाते युद्धे धन्विना प्रशस्तधनुर्धरेण वसुमित्रेण परान् शत्रून् पराजित्य प्रसह्य बलान्नीयमानो मे वाजिराजः अश्वश्रेष्ठः निवर्तितः प्रत्याहृतः । ॥ १५ ॥ अनेन स्वपुत्रजयवृत्तान्तेन । सगरः सूर्यवंशसंभवो नृपविशेषः । अंशुमान् तस्य पौत्रः । अकालहीनं कालेन हीनं न भवति तथा अकालक्षेपम् । अविलम्बितमित्यर्थः । विगतो रोषो यस्मात्तादृक् चेतो यस्य तेन । यज्ञसेवनाय यज्ञसेवार्थम् ।] **भर्त्रासीत्यादि** । [भर्त्रा श्लाघ्यानां प्रशस्तानां वीरः पतिर्यासां तासां वीरस्त्रीणां धुरि अग्रे स्थापितासि । तव पतिर्वीरश्रेष्ठ इति त्वं सर्वासु वीरपत्नीषु श्रेष्ठासीति भावः । अधुना च तनयात् पुत्राद्धेतोः वीरं सूते असौ वीरसूर्वीरमातेति शब्दः अपि त्वामुपस्थितः प्राप्तः । अतो धन्या त्वमिति निष्कर्षः ॥ १६ ॥ कलभेन

---

१ यवनेन. २ विमर्दः. ३ नि—रूपयति. ४ समरं प्रवृ०. ५ संगृह्य. ६ ०शेषं पुनः. ७ अंशुमता सगरपुत्रेणेव प्र० ८ ०संदर्शनाय ९ वर्तेते. १० श्लाघ्यानां. ११ देवी—भअवदि परितुठ्ठम्हि (०तुठ्ठम्हि). १२ दाणिं आस्ससदि.

परिव्राजिका—कलभेन खलु यूथपतिरनुकृतः।

कञ्चुकी—देव[2] अयं कुमारः

नैतावता वीरविजृम्भितेन
चित्तस्य[3] नो विस्मयमादधाति।
यस्याप्रधृष्यः प्रभवस्त्वमुच्चै-
र[4]ग्नेरपां दग्धुरिवोरुजन्मा ॥ १७ ॥

राजा—मौद्गल्य यज्ञसेनश्यालमूरीकृत्य मुच्यन्तां सर्वे बन्धनस्थाः।

कञ्चुकी—यदाज्ञापयति देवः। (इति निष्क्रान्ताः।)

देवी—जयसेने गच्छ। इरावतीप्रमुखेभ्योऽन्तःपुरेभ्यः पुत्रस्य विजयवृत्तान्तं निवेदय। (क)

प्रतीहारी—तथा। (इति प्रस्थिता।)

देवी—एहि तावत्। (ख)

प्रतीहारी—(परिवृत्य।) इयमस्मि। (ग)

देवी—(जनान्तिकम्।) यन्मयाशोकदोहदनियोगे मालविकायै प्रतिज्ञातं तदस्या अभिजनं च निवेद्य मम वचनेनेरावतीमनुनय। त्वयाहं सत्यान्न परिभ्रंशयितव्येति। (घ)

(क) जयसेणे गच्छ। इरावदिप्पमुहाणं अन्तेउराणं पुत्तस्स विजअवुत्तन्तं णिवेदेहि। (ख) एहि दाव। (ग) इअं ह्मि। (घ) जं मए असोअदोहलणिओए मालविआए पइण्णादं तं[6] से अहिजणं च णिवेदिअ मह वअणेण इरावदिं अणुणेहि। तुए अहं सच्चादो ण परिब्भंसइदव्वेत्ति।

करिपोतेन। यूथपतिः अनुकृतस्तत्सदृशः पराक्रमः कृतः।] नैतावतेत्यादि। [एतावता एतत्परिमाणेन वीरविजृम्भितेन शत्रुपराजयपूर्वमश्वप्रत्याहरणरूपेण शूरचेष्टितेन नः चित्तस्य विस्मयं न आदधाति। तत्र हेतुमाह-यस्य अप्रधृष्यः परैः प्रधर्षयितुं पराभवितुमशक्यः उच्चैः महान् त्वम्। अपां समुद्रजलानां दग्धुः दाहकस्य अग्नेः और्वाग्नेः। ऊरुजन्मा ऊरोर्जन्म यस्य स ऊरुजन्मा मुनिः इव त्वं प्रभवः। इतोऽप्यधिकस्य पराक्रमस्य स्थानमयं यस्य त्वं पिता इति भावः। इन्द्रवज्रा वृत्तम्।] ॥ १७ ॥ [यज्ञसेनश्यालं मौर्याख्यं मौर्यसचिवं वा। ऊरीकृत्य अङ्गीकृत्य। तत्प्रभृतय इत्यर्थः अन्तःपुरेभ्यः अन्तःपुरस्थस्त्रीभ्यः। दोहदनियोगे दोहदं पूरयेति नियोगदानावसरे। अनुनय प्रवणीकुरु। कस्मिन्नर्थे इत्याह-त्वयाहमिति।

---

१ राजा-मौद्गल्य ननु कलभेन यूथ०. २ देवेत्यादि नास्ति कुत्रचित्. ३ पुत्रस्य. ४ वह्नेः. ५ उररी. ६ ण [illegible]

प्रती०—यद्देव्याज्ञापयति । (इति निष्क्रम्य पुनः प्रविश्य ।) भट्टिनि पुत्रविजयनिमित्तेन परितोषेणान्तःपुराणामाभरणानां मञ्जूषास्मि संवृत्ता । (क)

देवी—किमत्राश्चर्यम् । साधारणः खलु तासां मम चायमभ्युदयः । (ख)

प्रतीहारी—(जनान्तिकम् ।) भट्टिनि इरावती पुनर्विज्ञापयति । सदृशं खलु देव्याः प्रभवन्त्या वचनं प्रथमसंकल्पितं न युज्यतेऽन्यथा कर्तुमिति । (ग)

देवी—भगवति त्वयानुज्ञातेच्छाम्यार्यसुमतिना प्रथमसंकल्पितां मालविकामार्यपुत्राय प्रतिपादयितुम् । (घ)

परिव्राजिका—इदानीमपि त्वमेवास्याः प्रभवसि ।

देवी—(मालविकां हस्ते गृहीत्वा ।) इदमार्यपुत्रः प्रियनिवेदनानुरूपं पारितोषिकं प्रतीच्छतु । (राजा सव्रीडं जोषमास्ते ।) (ङ)

देवी—(सस्मितम् ।) किमवधीरयति मामार्यपुत्रः । (च)

विदू०—भवति एष लोकव्यवहारः सर्वोऽपि नववरो लज्जातुरो भवति (छ)

(राजा विदूषकमवेक्षते ।)

(क) जं देवी आणवेदि । भट्टिणि पुत्तविजअणिमित्तेण परितोसेण अन्तेउराणं आहरणाणं मञ्जूसह्मि संवुत्ता । (ख) किं[3] एत्थ अच्चरिअं । साहारणो खु ताणं मह अ अअं अब्भुदओ । (ग) भट्टिणि इरावदी उण विण्णवेदि । सरिसं क्खु देवीए पहवन्तीए वअणं पुढमसंकप्पिदं ण जुज्जदि अण्णहा कादुं ति । (घ) भअवदि तुए अणुण्णादा इच्छामि अज्जसुमदिणा पुढमसंकप्पिदं मालविअं अज्जउत्तस्स पडिवादेदुं । (ङ) ईदं अज्जउत्तो पिअणिवेदणाणुरूवं पारितोसिअं पडिच्छदु । (च) किं अवधीरेदि मं अज्जउत्तो । (छ) भोदि एसो लोअव्ववहारो सव्वो वि णववरो लज्जादुरो होदि ।

मञ्जूषास्मीति सर्वाभिरन्तःपुरस्त्रीभिर्दत्तानामाभरणानां मञ्जूषेवैकनिवासोहं जातेत्यर्थः । कल्पितां दातव्यतया मनसा निश्चिताम् । प्रतिपादयितुं दातुम् । प्रियनिवेदनं लेखवाचनेन पुत्रस्य विजयप्राप्तिवृत्तान्तकथनम् ।] पारितोषिकं प्रतीच्छतु [अङ्गीकरोतु] । अत्र प्रीत्युत्पादनात् प्रसादो नाम संध्यङ्गमुक्तं भवति ॥ [लज्जातुरः लज्जाकुलः ।

१ व्रीडां नाटयति. २ ०विजएण अविभत्तपरितोसाणं (अविभक्तपरितोषाणां); अविहद–अस्सन्त (अश्रान्त) परि०; दिण्णपारितोसिआणं. ३ एदं किं अच्च० ४ णं साधा० ५ खु पहव० तुह वअणं. ६ अणुमदा. ७ ०संभाविदं. ८ इमं...सिअं. मालविअं. ९ लज्जालुओ (लज्जाकुः)

विदूषकः—अथ वा देव्या प्रणयविशेषं दत्तदेवीशब्दां मालविकामत्रभवान्प्रतिग्रहीतुमिच्छति । (क)

देवी—एतस्या राजदारिकाया अभिजनेनैव दत्तो देवीशब्दः । किं पुनरुक्तेन । (ख)

परिव्राजिका—मा मैवम् ।

अप्याकरसमुत्पन्ना[1] मणिजातिरसंस्कृता ।
जातरूपेण कल्याणि न हि संयोगमर्हति ॥ १८ ॥

देवी—(स्मृत्वा ।) मर्षयतु भगवती । अभ्युदयकथयोचितं मया न लक्षितम् । जयसेने गच्छ तावत् । कौशेयपत्त्रोर्णमुपनय । (ग)

प्रती०—यद्देव्याज्ञापयति । (इति निष्क्रम्य पत्त्रोर्णं गृहीत्वा पुनः प्रविश्य ।) देवि एतत् । (घ)

देवी—(मालविकामवगुण्ठनवतीं[3] कृत्वा ।) आर्यपुत्र इदानीमिमां प्रतीच्छतु । (ङ)

राजा—देवि त्वच्छासनादप्रत्युत्तरा[4] वयम् ।

परि०—हन्त प्रतिगृहीता ।

विदूषकः—अहो देव्या अत्रभवतोऽनुकूलता । (च)

(देवी[5] परिजनमवलोकयति ।)

परिचारि—(मालविकामुपेत्य) जयतु भट्टिनी । (छ)

(क) अह वा देवीए प्पणअविसेसं दिण्णदेवीसद्दं मालविअं अत्तभवं पडिग्गहीदुं इच्छदि । (ख) एदाएँ राअदारिआए अहिजणेण एव्व दिण्णो देवीसद्दो । किं पुणरुत्तेण । (ग) मरिसेदु भअवदी । अब्भुदअकहाए उइदं मए ण लक्खिदं । जअसेणे गच्छ दाव । कोसेअपत्तोण्णं उवणेहि । (घ) जं देवी आणवेदि । देवि एदम् । (ङ) अज्जउत्तो दाणिं इमं पडिच्छदु । (च) अहो देवीए अत्तहोदो अणुऊलदा । (छ) जेदु भट्टिणी ।

प्रणयस्यानुरागस्य विशेषो यस्मिन्कर्मणि तद्यथा तथा] । अप्याकरेत्यादि । [हे कल्याणि शोभने । आकरसमुत्पन्ना रत्नाकरजातापि मणिजातिः रत्नजातं असंस्कृता अनुत्तेजिता सती जातरूपेण सुवर्णेन संस्कारं नार्हति । महाकुलसंभूतापि एषा देवीशब्देन अनलंकृता राज्ञा संयोगं नार्हतीति भावः ।] अत्र लब्धार्थस्य स्थिरीकरणात्कृतिर्नाम संध्यङ्गमुक्तं भवति ॥ १८ ॥ [अभ्युदयकथया उत्कर्षकथाव्यापृततया उत्सवे क्वचित्प्रमादः क्षन्तव्य एवेति भावः । कौशेयस्य कृमिकोशोत्थस्य पत्त्रोर्णं धौतवस्त्रम् ।]

१ ०त्पन्नो रत्नजातिपुरस्कृतः...मणिः संयोग०. २ स. ३ अवगुंठ्य. ४ ०नात्प्रवृत्ता एव, शासनंप्रत्यनुरक्ता वयम् । (अपवार्य ।) हन्त प्रतिगृहीतम् ५ धारिणी. ६ देवीए एव्व किदप्प०. ७ जदा राज० इअं...तदा दिण्णो. ८ ०पत्तोण्णजुअलं, ०ण्णणेवच्छं से सिग्घं उव०.

(देवी परिव्राजिकामवेक्षते ।)

परि०—नैताच्चित्रं त्वयि ।

प्रतिपक्षेणापि पतिं सेवन्ते भर्तृवत्सलाः साध्व्यः ।
अन्यसरितां शतानि हि समुद्रगाः प्रापयन्त्यब्धिम् ॥ १९ ॥

(प्रविश्य)

निपुणिका—जयतु भर्ता । इरावती विज्ञापयति । यदुपचारातिक्रमेण तदा भर्तुरपराद्धं तत्स्वयमेव भर्तुरनुकूलं नाम मयाचरितम् । सांप्रतं पूर्णमनोरथेन भर्त्रा प्रसादमात्रेण संभावयितव्येति । (क)

देवी—निपुणिके अवश्यं तस्याः संदेशमनुज्ञास्यत्यार्यपुत्रः । (ख)

निपुणिका—अनुगृहीतास्मि । (ग)

परिव्राजिका—देवाहममुना भवत्संबन्धेन चरितार्थं माधवसेनं सभाजयितुमिच्छामि यदि मे तव प्रसादः ।

देवी—भगवति न युक्तमस्मान्परित्यक्तुम् । (घ)

राजा—भगवति मदीयेषु लेखेषु तत्रभवते त्वामुद्दिश्य सभाजनाक्षराणि पातयिष्यामि ।

(क) जेदु भट्टा । इरावदी विण्णावेदि । जं उवआरादिक्कमेण तदा भट्टिणो अवरद्धं तं सअं एव्व भत्तुणो अणुऊलं णाम मए आअरिदं । संपदं पुण्णमणोरहेण भत्तुणा पसादमेत्तेण संभावइदव्वत्ति । (ख) णिउणिए अवस्सं ताए संदेसं अणुजाणिस्सदि अज्जउत्तो । (ग) अणुगहीदम्हि । (घ) भअवदि ण जुत्तं अम्हे परिच्चइदुं ।

हन्त हर्षे । प्रतिगृहीता वशीकृता । अत्र वाञ्छितावाप्तेरानन्दो नाम संध्यङ्गमुक्तं भवति । जयतु भट्टिनी । अत्र बहुमानप्राप्तेर्भाषेति संध्यङ्गमुक्तं भवति ॥ **प्रतिपक्षेणेत्यादि** । [भर्तृवत्सलाः भर्तरि प्रिये वत्सलाः प्रेमवत्यः साध्व्यः पतिव्रताः । प्रतिपक्षेणापि आत्मनः सपत्नीवर्गेणापि भर्तारं सेवन्ते । तस्य सपत्नीकरणमनुमन्यन्ते इत्यर्थः । अत्र दृष्टान्तमाह । समुद्रगा महानद्यः हि अन्यसरितां शतानि अब्धिं उदधिं प्रापयन्ति आत्मना सह प्रवेशयन्ति । दृष्टान्तालंकारः । आर्याछन्दः ॥ १९ ॥ उपचारातिक्रमेण उपचारस्य तृतीयाङ्कावसाने कृतस्य प्रणिपातरूपस्य अतिक्रमेणोल्लंघनेन । भर्तुरनुकूलं मालविकाया समागमे विघ्नभूतमात्मन आगमनं परिहृत्येति भावः । नाभेत्यभ्युपगमे । संदेशमनुज्ञास्यति संदेशानुरूपमाचरिष्यति । चरितः अर्थः येन स चरितार्थः कृतार्थः तम् । सभाजयितुं अभिनन्दि-

---

१ ०निरी०, निर्वर्णयति. २ सरितामपि जलं; ...न्त्युदधिम्. ३ देव अमुना युक्तसं० जयितुं गच्छामि....४ ०ऽत्रैव...भवतः....५ तं भट्टिणो अणुऊलं ण मे आ०; जह हि उवआरादिक्कमेण किदावराधाए ण मए भट्टिणो अणु०; अणुरूवं. ६ अहं वि भट्टिणा. ७ से सेविदं...जाणि०; रोषं आर्यपुत्रो हास्यति. ८ जं देवी आणवेदि. ९ भअवदीए.

परिव्राजिका—युवयोः स्नेहेन[1] परवानयं जनः ।

देवी—आज्ञापयत्वार्यपुत्रः किं भूयोपि प्रियमनुतिष्ठामि । (क)

राजा—किमतः परमपि[2] प्रियमस्ति । तथापीदमस्तु ।

त्वं मे प्रसादसुमुखी भव देवि[3] नित्य-
मेतावदेव हृदये प्रतिपालनीयम्[4] ।

(भरतवाक्यम् ।)

आशास्य[5]मीतिविगमप्रभृति प्रजानां
संपद्य[6]ते न खलु गोप्तरि नाग्निमित्रे ॥ २० ॥

(इति निष्क्रान्ताः सर्वे ।)

इति श्रीकालिदासस्य कृतौ मालविकाग्निमित्रे पञ्चमोऽङ्कः ।

(क) आणवदु अज्जउत्तो किं भूओवि पिअं अणुचिट्ठामि ।

तुम् । दिष्टिवृद्ध्या संभावयितुमित्यर्थः । सभाजनाक्षराणि अभिनन्दनशब्दान् । स्नेहेन परवान्स्नेहाधीन इत्यर्थः । युवयोः स्नेहं मनसि कृत्वा गन्तुं न पारयामीति भावः ।] **त्वं मे प्रसादेत्यादि** । हे देवि त्वं मे मम नित्यं सर्वदा प्रसादसुमुखी प्रसादेन प्रसन्नतया शोभनं मुखं यस्यास्तथोक्ता भव भूयाः । एतावदेवेदमेव हृदये मनसि प्रतिपालनीयमपेक्षणीयम् । इतः परं भरतवाक्यम् । **आशास्यमित्यादि** । प्रजानां जनानाम् [ईतीनामनावृष्ट्यादिमहानर्थानां विगमो दूरीभवनं स प्रभृति यस्य तत् । ईतयस्तु " अतिवृष्टिरनावृष्टिः शलभा मूषकाः शुकाः । प्रत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः ॥ " इत्युक्ताः । पाठान्तरे] अभ्यधिगमात्संप्राप्तेः । परिग्रहादित्यर्थः । तस्मात्प्रभृत्यारभ्याग्निमित्रेऽस्मिन्नायके गोप्तरि रक्षके सति तासां प्रजानामाशास्यमपेक्ष्य-वस्तु न संपद्यत इति न न संभवतीति न । संभवत्येवेत्यर्थः । अनेन आशास्यसिद्ध्य-नुरूपेण शुभशंसनेन प्रशस्तिर्नाम संध्यङ्गमुक्तं भवति । यदुक्तम्–'प्रशस्तिः शुभशंसनम्' इति । सर्वनाटकप्रयोगान्ते भरतेन सर्वकालसाधारणे आशीर्वचने (सर्वकालसाधारण्ये-नाशंसावचने इ. पा.) कर्तव्ये सति अत्र प्रजानामाशास्यासिद्धिं प्रति गोप्तुरग्निमित्रस्य कथनं तत्कालराजोपलक्षणमिति मन्तव्यम् ॥ २० ॥

श्रीमत्काटयवेमस्य कृतिर्विज्ञानशालिनः ।
कुमारगिरिराजीया जीयादाचन्द्रतारकम् ॥

इति श्रीकाटयवेमभूपविरचिते कुमारगिरिराजीये
मालविकाग्निमित्रव्याख्याने पञ्चमोऽङ्कः ।

---

१ स्नेहात्. २ अतः परम्–तथापि भवत्वेवं तावत्. ३ चण्डि. ४ मृगये प्रतिपक्षहेतोः. ५ ०स्यामित्य–०मभ्यधिगम[illegible]मात्. ६ संपत्स्यते. [illegible] अज्जउत्त किं ते...उपहरामि.

An Alphabetical Index of Verses occurring in this Drama.

Index of Important Words.

(The figures refer to the Pages of this Edition.)

